
संस्कृतशिक्षणम्

स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्



डॉ. कम्भम्पाटि साम्बशिवमूर्तिः

संस्कृतशिक्षणम्

(Samskruta Sikshanam)

लेखकः
डॉ. कम्भम्पाटि साम्बशिवमूर्तिः
सहाचार्यः, (शिक्षाविभागः)
जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः
ग्राम–मदाऊ, पोस्ट–भाङ्करोटा
जयपुरम्–राजस्थानम्

दीपशिखा प्रकाशन
जयपुर

Publisher :
Deepshikha Prakashan,
Katewa Nagar, Gujar Ki Thadi,
New Sanganer Road, Jaipur
Mob. 9414779316

Title :
संस्कृतशिक्षणम्


By :
Dr. Kambhampati Samba Siva Murty,
Associate Professor,
Department of Education,
JRRSANSKRIT UNIVERSITY
JAIPUR, RAJASTHAN

Edition : 2009

Price : Rs. 250/-

Computer Typesetting :
M.M. Computers & Graphics
Jaipur, Mob. 9784354865

Distributors :
Smt. Tangirala Valli Mahalakshmi
Mahalakshmi Prakashanam,
Dr. K. Samba Siva Murty,
Associate Professor,
J R R Sanskrit University,
Madau (V.), Bhankarota (P.O.)
Jaipur, Rajasthan



भजे नारायणं दासं साक्षाद्दैवस्वरूपिणम्।
रामानन्दस्य वेदान्तज्ञानिनं योगिनं सदा॥
यस्य दर्शनमात्रेण सत्यं भगवतो ध्रुवम्।
स्पष्टं सुरूपं तं वन्दे तारकं भवहारकम्॥

गुरुप्रपत्तिः

हिन्दूधर्मप्रचाराय संस्कृते रक्षणाय च।
सततं यत्नशीलान् श्रीरेवासाधामवासिनः॥
वेदवेदान्तनिष्णातान् साक्षाद्राघवरूपिणः।
एतान् प्रतिदिनं वन्दे वारं-वारं जगद्गुरून्॥
निधीन्निगमशास्त्राणां शिष्याणां शुभकारिणः।
सरस्वतीस्वरूपांश्च गुरून् विज्ञानदायिनः।
विश्वख्यातान् कुलपतीन् स्मेरास्यान् धीमतां वरान्।
अनुष्ठानगरिष्ठांश्च वन्दे विद्वन्मतल्लिकाः॥
वैदुष्यं शासनं यत्र युगलं युगले गुरौ।
विराजते मिश्रवर्ये साञ्जलि प्रणमामि ते॥
श्रीवेम्पटिश्रेष्ठकुलेऽभिजातः साहित्यवेदान्तविशेषविज्ञः।
गीर्वाणवाणीसमुपासको यस्तस्मै नमः श्रीगुरुपुङ्गवाय॥
वन्दे कन्दालवंशाब्धिचन्द्रं शिष्यैकवत्सलम्।
नैकभाषासुदक्षं तं पाणिनेः प्रतिरूपिणम्॥
कलानाथाख्यगुरवे गैर्वाणीहितकारिणे।
नानाशास्त्रप्रवीणाय नौमि "देवर्षये" सदा॥
शिष्टाय कर्मनिष्ठाय गुरूणां गुरवे मुदा।
श्रेष्ठशिक्षकधाम्ने श्रीवासिष्ठाय नमो नमः॥
जामखण्डिभवायास्मै ऋग्वेदाधीतिने सदा।
अर्लीकट्टीत्युपाह्वाय नमोवाकं ब्रवीमि ते॥
मोतीलालं सुविख्यातं सरस्वत्याः सुपुत्रकम्।
वन्दे तं भारतीभाग्यविधातारं पुनः पुनः॥

युगल किशोर मिश्र
कुलपति
Yugal Kishor Mishra
Vice-Chancellor

जगद्गुरुरामानन्दाचार्य
राजस्थान संस्कृत विश्वविद्यालय
मदाऊ, भांकरोटा, जयपुर-26
JAGADGURU RAMANANDACHARYA
RAJASTHAN SANSKRIT UNIVERSITY
Madau, Bhankrota, Jaipur-26
Phone : 0141-5132001 (O)
0141-5132002 (R)
website : jrrsanskrituniversity.ac.in

स्वस्तिवाक्

विद्या वेदितव्या स्याद्वा ब्रह्म वेदितव्यमुभयत्रापि उभयविधवित्तौ महती भूमिकाऽऽचार्यस्य यो हि ज्ञानात्मकेन ज्योतिषा जिज्ञासुशिष्यान्तर्मनसि व्यापितमन्धन्तमो दूरीकृत्य शाब्दं परात्परं ब्रह्म वावगन्तुं दीक्षाशीक्षाभ्यां सामर्थ्यमादधान आचार्यदेवत्वकोटिमाटीकते। विद्योपादानकर्मणि छान्दसः शीक्षाशब्द एव शिक्षायां परिष्कृतः समुपयुज्यते साम्प्रतिकैराचार्यैर्वैयाकरणैः शिक्षाविद्भिर्वा। तत्रापि च वेदषडङ्गेषूपनिबध्देयं शिक्षा छान्दसीं स्वरादिप्रक्रियां बोधयन्त्यपि नानाविधप्रकल्पानां विधीनां वावबुद्ध्यै शिक्षाशास्त्ररूपेणाङ्गीक्रियते। वर्तमाने प्रचलिते शिक्षाशास्त्रे स्वीकृतानां सिद्धान्तानां मौलिकस्वरूपं प्राचीनशास्त्रीयग्रन्थेष्वपि प्राप्यतेऽस्मिन् महाकविकालिदासविरचितरघुवंशीयपद्येऽपि यथा–

श्रियः समग्रैः स गुणैरुदारधीः
क्रमाच्चतस्रश्चतुर्णवोपमाः।
ततार विद्याः पवनातिपातिभि-
र्दिशो हरिद्भिर्हरितामिवेश्वरः॥

अत्र गुरुसेवा-तन्मुखारविन्दश्रवण-ग्रहण-धारणादयो बुद्धेः सप्त गुणाः

संकेतिता:। एत एव गुणा आचार्यकामन्दकेनापि समुपवर्णिता यथा–

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।
ऊहापोहार्थविज्ञानं तत्वज्ञानं च धीगुणा:।।

एक: शब्द: सम्यग्ज्ञात: सुप्रयुक्त: स्वर्गे लोके च कामधुग्भवतीति वचनानुसारं शास्त्रोक्तनानाप्रकारकै: शिक्षाविधिभि: शब्दब्रह्मणो ज्ञानाय ज्ञापनाय वा या शिक्षासरणि: साम्प्रतं शिक्षाजगति प्रचलिता शिक्षाशास्त्रं तदेव बोध्यते। सन्दर्भेऽस्मिन् संस्कृतशिक्षणे ये सिद्धान्ता:, नियमा:, विधय:, प्रकल्पा वा समुपयुज्यन्ते तेषां छात्रवर्गे बाहुल्येन प्रचाराय प्रसाराय प्रयोगायैव भाविन: शिक्षका: शिक्ष्यन्ते तेषामेव महदुपकाराय जयपुरस्थ–जगद्गुरुरामानन्दाचार्यराजस्थान–संस्कृत–विश्वविद्यालयस्य शिक्षाशास्त्रसंकाये सहाचार्यपदभाग्भि: डॉ. कम्भम्पाटि साम्बशिवमूर्तिभि: प्रस्तुतपुस्तकमाध्यमेनापूर्व: कोऽपि सार्थक: प्रयासो विहित:, एतदर्थं हार्दिकान् साधुवादान् वितरामि। आयति कालेऽपि मन्ये कञ्चन नूत्नं प्रकल्पं समुपस्थाप्य छात्रेभ्यो नवपन्थानं सर्जयेदिति शम्।

युगलकिशोरमिश्र

(युगलकिशोरमिश्र:)
कुलपति:
ज.रा.राजस्थान–संस्कृत–विश्वविद्यालयस्य,
जयपुरम्

द्विवर्षि कलानाथ शास्त्री C/8 पृथ्वीराज रोड, जयपुरम्
(राष्ट्रपतिसम्मानितः)
पीठाध्यक्षः, नित्यानन्दशास्त्र्याधुनिकसंस्कृतपीठस्य,
जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः,
प्रधानसम्पादकः, 'भारती' संस्कृतमासिकस्य,
(भूतपूर्वोऽध्यक्षः, राजस्थानसंस्कृत-अकादम्याः,
निदेशकचरश्च संस्कृतशिक्षाभाषाविभागयोः, राजस्थानसर्वकारीययोः)

पूर्वाभाषः

संस्कृतभाषा खलु विश्वभाषासु, प्राचीनतमा , भारतीयभाषाणां जननी, अमूल्यस्य वाङ्मयनिधेर्वाहिका चाऽस्तीति विश्वविदितं तथ्यम्। इयममरभाषेत्याख्याते इत्यस्य रहस्यं न केवलमिदं यदियं देवभाषाऽस्ति "संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिरित्यादीनि वचनानि सुचिरादुद्ध्रियन्त एव तदिदं स्फोरयितुं, किन्त्वस्या अमरभाषात्वस्य तात्पर्यं वस्तुतस्तदिदमस्ति यदियं निर्जरामराऽस्ति, सहस्राब्दीभ्योऽस्याः स्वरूपं तथैवाऽक्षुण्णमस्ति, तादृशमेवाऽस्ति यादृशं वैदिकैर्महर्षिभिः प्रत्यक्षीकृतमभूत्। "सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात्" इत्यादि वेदवचनमद्याऽप्यवबुध्यते। महर्षेः पतञ्जलेर्भाषां यथाऽद्य वयं सानन्दं पठामोऽवगच्छामश्च तथैव शताब्दीनां व्यत्ययानन्तरं भाषामिमां विलिखितो भगवत्पादशङ्कराचार्यस्य लेखनमपि सहजरूपेणाऽनायासमेव अवगच्छामः। तदनन्तरं शताब्दीनामनेकासां व्यपगमनानन्तरमद्य संस्कृतभाषायां ये वदन्ति वा लिखन्ति वा, तेऽपि नूनं सर्वथा तादृशीमेव भाषां प्रयुञ्जते या सहस्राब्दीभ्यः पूर्वं प्रयुज्यते स्म। इदमेव कारणं यदियममरभाषेत्याख्यायते, एतस्याः स्वरूपमजरामरम्।

मन्त्रद्रष्ट्रा महर्षिणा पुरा उषाः सम्बोधिताऽभूत् 'पुराणी देवि युवति पुरन्धिः'। उषाः सहस्राब्दीभ्यः पुरातनी किन्तु तथैव युवतिरुपलक्ष्यते। एवमेव संस्कृतभाषाऽपि पुराणी युवतिः। किमस्त्येतस्याश्चिरयौवनस्य रहस्यम् ? यदवधि पाणिनिना व्याकरणमस्या उपदिष्टं, तदवधि तस्यानुसरणवशादस्या भाषायाः स्वरूपमविकृतं तिष्ठतीति कारणं तु सुविदितमेव। तदिदमप्यपरं कारणं यदियं नवयुगीनानामपेक्षाणामनुरूपं नवीना अभिव्यक्तिविधा जनयति, बहवो नूतनाः शब्दा उद्भवन्ति प्रतियुगं, किन्तु तेषां समावेश

उपयोगश्च तस्मिन्नेव स्वरूपे समञ्जितत्वेन संजायते यदारम्भात् सुप्रतिष्ठितम्। इत्थं सत्यपि परिवर्तनं, सातत्यं सत्यपि सातत्ये, परिवर्तनं च किञ्चन सर्वदाऽत्र तिष्ठति। एतस्यां भाषायां तादृशमपि वस्तुजातमस्ति यदविकलं तिष्ठति, तादृशमपि वस्तु वर्तते यद्युगानुरूपं परिवर्तते परिवर्धते च।

सत्यपि परिवर्तने भाषायाः अस्याः सातत्यस्य किं कारणम् ? बहून्यत्र कारणानि। तेष्वेकमिदमपि कारणमस्ति यदस्याः स्वाध्यायः प्रवचनं च, अध्ययनमध्यापनं च गुरुकुलेषु, विदुषां गृहेषु, पाठशालासु, विद्यालयेषु, महाविद्यालयेषु, विश्वविद्यालयेषु वा सहस्राब्दीभ्यः सततं प्रचलति। एतस्या भाषाया ये शिक्षकाः सश्रममिमामधीत्य छात्रान् पाठयन्ति, ते एतस्यास्तदेव स्वरूपं तेभ्यः परिचाययन्ति यत्पाणिनिमारभ्याऽद्यावधि तादृशमेव तिष्ठति, सहैव तान् नूतनानुद्भवान् नवान् शब्दान् युगानुरूपाणि परिवर्तनान्यपि बोधयन्ति यानि युगे युगे समुद्भवन्ति, युगे युगे परिवर्तन्ते। शिक्षणपरम्परायास्तदिदं सातत्यं भाषाज्ञानस्य हितायात्यावश्यकम्। छात्राणां सुखबोधाय शिक्षणविधयोऽप्यस्मादेव कारणात् परिवर्तन्ते युगे युगे। भाषाया आधारभूतं स्वरूपं तु तदेव तिष्ठति किन्तु युगानुरूपाणां परिवर्तनानां समावेशाय शिक्षणविधयः, प्रकाराः, उपकरणानि, उपागमाः सततं परिवर्तन्ते, परिवर्धन्ते, नवीक्रियन्ते, परीक्ष्यन्ते च। इदमेव भाषाणां सातत्ये सहायकं भवति। न खल्वेकेनैव पुरातनेन वाहनेन नूतनेषु युगेषु कस्या अपि भाषाया ज्ञानराशिः शक्यते प्रापयितुं नूतनेष्वध्येतृषु।

विश्वस्य सर्वास्वपि भाषासु, सर्वेषु देशेषु, युगानुरूपाः शिक्षणविधय उद्भवन्ति, परिवर्तन्ते, परिवर्धन्ते च। नवीनेऽस्मिन् युगे तु यथा-यथा ज्ञानराशिरेधते तथा शिक्षणविधयोऽपि परिवर्तनं विकासं च लभन्ते। गतायां शताब्द्यां तु कश्चन तादृशो नूतनो ज्ञानविधिः, ज्ञानसञ्चारविधि; सूचनासञ्चारविधिः उपकरणसम्भारश्च समुदभवद् येन समस्तेऽपि जगति युगान्तरमेवोपस्थापितम्। सोऽयं नूतनो विधिरस्ति कृत्रिमबोधयन्त्रोपगमः (Artifical Intelligence); अस्यैवापरमभिधानमस्ति सूचनाप्रविधिः यद्धि कम्प्यूटर टेक्नोलॉजी पदेनाप्यवगन्तुं शक्यते। सूचनाप्रविधिरयं (Information Technology) समस्तमपि विश्वमधीनीकृतवानस्ति। कम्प्यूटराख्यस्य यन्त्रस्य (यस्य हि नामधेयं संगणक-संगणित्र-अभिकलित्रादि पदैर्भारतीयभाषास्वप्यनूदितमभूत्) परिज्ञानमुपयोजनं चाऽद्यतनी सर्वतः प्रमुखी अपेक्षा। एतत्परिज्ञानं 'कम्प्यूटर लिटरेसी' इत्याख्यायते यस्याऽयमप्याशयो निष्कृष्यते यद् ये

कम्प्यूटर साक्षरतां न बिभ्रति, ते निरक्षरा एव। इत्थं या नूतना क्रान्तिर्गतेषु दिवसेषु ज्ञानसंसारे समजनि तया हि शिक्षणविधिष्वपि काचन समग्रा क्रान्तिरानायिता।

एतस्या ज्ञानसञ्चारविधिक्रान्तेः कश्चनान्तरङ्गः सम्बन्धः संस्कृतभाषयाऽपि सह सहसैव समुदजम्भत यदाऽमरीकीयेन वैज्ञानिकेन 'नासा' स्थले (NASA) कार्यरतेन रिक ब्रिग्स (Rick Briggs) इत्याख्येन समुद्घोषितं यत्संस्कृतभाषा खलु विश्वभाषासु कम्प्यूटरप्रविधेः कृते सर्वाधिकमुपयुक्ताऽनुकूला चेति।

यत्किमपि भवतु, संस्कृतवाणीयं सर्वदैव नूतनान् ज्ञानविषयान् शिक्षणप्रकारान् प्रविधीन् अनुप्रयोगांश्च युगे युगे स्वीकृत्य, समावेश्य, संयोज्य च स्वकीयां सार्वकालिकतां युगानुरूपतां चाक्षुण्णतया बिभर्ति। अतोऽस्याः शिक्षणाय नूतनाः पाठ्यग्रन्था, व्याकरणशिक्षणपुस्तकानि, युगानुरूपान्युदाहरणानि प्रस्तूय छात्रान् सुदक्षान् विधातुं लिखिता मार्गदर्शिग्रन्थाश्च प्रणीयन्ते प्रकाशयन्ते च।

विगतेषु दशकेषु शिक्षाशास्त्रे प्रशिक्षणविधीनां, नूतनशिक्षणप्रकारान् प्रस्तुवन्तीनाम् अध्यापनविधानां चोद्भवेन भूयान् विकासः समाजनीति विदन्त्येव सुधियः। विश्वविद्यालयेषु विषयस्यास्य कृते पृथक् शिक्षासङ्कायाः [Education Faculty] प्रादुरभूवन्, नवीनाः प्रणाल्यो नूतनाः प्रविधयश्च पाश्चात्यदेशेभ्य आनाय्याऽत्र समावेशिता, अनुकूलिता, अन्तर्भाविता वा। संस्कृतशिक्षणविधीन् प्रस्तुतवन्तः शतशो ग्रन्था अद्य हिन्दीभाषायामन्यासु च भारतीयभाषासु प्रणीयन्ते, प्रकाश्यन्ते, प्रयुज्यन्ते च। किन्तु संस्कृतभाषायामल्पीयांस एव ग्रन्था मया तादृशा दृष्टा नूतनशिक्षणसिद्धान्तानां, प्रविधीनामुपागमानां, प्रकाराणामन्यस्याश्च सहायकसामग्र्या कश्चिदपि सन्निवेशो दृश्यते।

यदा हि जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य शिक्षासङ्काये सहाचार्य (Associate Professor or Reader) पदमधितस्थुषा, प्राच्य-पश्चात्यभाषासु प्राचीन-नूतन विधिषु, विविधशास्त्रेषु च दक्षत्वं बिभ्रता, सौजन्यमूर्तिना **डॉ. कम्भम्पाटि साम्बशिवमूर्तिना** प्रणीतः "संस्कृतशिक्षणम्" शीर्षको ग्रन्थो मया व्यलोकि, सुमहान् प्रमोदो मयाऽनुभूतो यतो ह्यत्र प्रायः सर्वेषामेवाऽऽधुनिकप्रविधीनां, प्रकाराणां , शिक्षणसम्बन्धिनो विषयजातस्य च सुबोधया भाषया, प्राञ्जलया शैल्या च संस्कृते

प्रतिपादनमुपलभ्यते। संस्कृते नाऽन्यः कश्चन ग्रन्थो मयाऽद्यावधि दृष्टो यः सर्वविधानां संस्कृतशिक्षकाणामेतादृशं मार्गदर्शनं कर्त्तुमलम्भूष्णुः स्यात्।

अस्मिन् हि ग्रन्थे पञ्चविंशत्यध्यायेषु सर्वविधाः शिक्षासिद्धान्ताः प्रविधयश्च निरूपिताः, तेषामनुप्रयोगः कथं संस्कृतशिक्षणाय क्रियेत इति स्पष्टीकर्त्तुमधिकृतग्रन्थानां प्रमाणैरुद्धरणैश्च सह भाषावैज्ञानिकसिद्धान्तानुसारं शिक्षकाणां साङ्गोपाङ्गमार्गदर्शनाय समग्रतया सर्वोऽपि विषयः प्रतिपादित इति सर्वात्मना सन्तोषास्पदम्। संस्कृतस्य कुशलेनाध्यापकेन कथं गद्यस्य, पद्यस्य, व्याकरणस्य, अनुवादस्य, नाटकानां, कथादीनां च सरलतया शिक्षणं विधेयम्, कथं च छात्राणामभिरुचिरुत्पादनीया, कथं मूल्याङ्कनं विधेयम्, इत्यादयो विषयास्तु सम्यग् विवेचिताः सन्त्येव, भारते शिक्षाऽऽयोगानामितिहासः , संस्कृतस्य महत्त्वं, संस्कृतविश्वविद्यालयानां संख्या इत्यादयः सूचना अपि सन्ति, पाठयोजनाया विषये पाश्चात्यानां सिद्धान्ताः, तेषां संस्कृतशिक्षणेऽनुप्रयोगः इत्यादयो विषया अपि समावेशिताः, तदनु पाठयोजनाया आदर्शा अपि मार्गदर्शनाय प्रस्तुता इति सर्वविधेयं सामग्री सर्वविधानां संस्कृतशिक्षकाणां भूयसे समुपकाराय भवेदिति निश्चप्रचमेव।

प्राञ्जलशैलीपरिष्कृतः संस्कृते निबद्धोऽयं ग्रन्थः प्रायो वर्षद्वयात् पूर्वमभूत् प्रकाशितः। एतस्य स्वागतं समुपयोगश्च संस्कृतशिक्षकैः सुभृशमनुष्ठितः, सम्प्रति द्वितीयमस्य संस्करणं प्रकाश्यत इति प्रमोदास्पदम्। सोऽयं ग्रन्थः शिक्षणसङ्कायेषु शिक्षाशास्त्र-शिक्षाचार्य-विद्यानिष्णात (एम.फिल.)-विद्यावाचस्पति (पीएच.-डी.) प्रभृतीनामुपाधीनां कृतेऽधीयानानां सुमहान्तमुपकारं विधाय ग्रन्थकारस्य यशोऽपि समेधयेत्, सुरभारत्याः समर्चनेन भगवतीं शारदामपि प्रीणयेदित्याशासानो वर्धापनैः सभाजयामि द्वितीयसंस्करणस्यास्यावतरणोपलक्ष्ये प्रो. साम्बशिवमूर्तिम्।

देवर्षि कलानाथ शास्त्री

(देवर्षि कलानाथ शास्त्री)

Vidyavaridhi & Darsanakalanidhi, Mahamahopadhyaya,
Dr. R.N. Aralikatti,
M.A. (Skt), M.A. (Hin), M.Ed., Ph.D., F.U.W.A.
Retd. Registrar & H.O.D.,
Rashrtiya Sanskrit Vidyapeeth, Tirupati
Recipient of President of India,
Shasthrachudamani Prof., T.M.U., Pune
Govt. of Maharashtra & Govt. of Karnataka Awards

Ganesh Baug, Bldg. No. 6, Flat No. 3,
Opp. Indian Hume Pipe CO.,
Sinhagad Road, Manik Baug,
Pune - 411 051
Phone : 020-24350667

अभिप्रायः

आयुष्मता विदुषा शिक्षाशास्त्रविदा **डॉ. साम्बशिवमूर्तिना** लिखितः "**संस्कृतशिक्षणं**" नामको ग्रन्थः आमूलचूलं मया अवलोकितः। नितरां प्रमुदितान्तरङ्गोऽहम्। अस्मिन् ग्रन्थे संस्कृतशिक्षणपद्धतिसम्बद्धाः प्रायः सर्वे विषयाः तत्र सम्यक् निरूपिताः सन्ति ये यावत् सामान्यतया भारते सर्वेषु विश्वविद्यालयेषु शिक्षाशास्त्री (बी.एड्.) उपाधिकृते निर्दिष्टाः भवन्ति। ग्रन्थोऽयं षड्विंशति-अध्यायेषु विभक्तः यत्र भाषा, संस्कृतभाषामहत्वं, पाठ्यक्रमे संस्कृतस्य स्थानं, भाषाकौशलानि, संस्कृतशिक्षणोद्देश्यानि, संस्कृतशिक्षणसिद्धान्ताः, शिक्षणपद्धतयः, गद्यपद्यव्याकरणरचनानुवादकथादीनाम् अध्यापनविधयः, शिक्षणोपकरणानि, मूल्याङ्कनं, संस्कृतप्रायोगिकपाठयोजनाः इत्यादयः महत्वपूर्णा विषयाः सोदाहरणं सम्यग्विवृताः। तत्र तत्र बहूनां प्राच्य-प्रतीच्यविदुषां विचाराणामुल्लेखाः कृताः। नैकग्रन्थान् परिशील्य, तत्रस्थाः उपादेयाः अंशाः सङ्गृहीताः। अमरकोशस्य "समाहृत्यान्यतन्त्राणि संक्षिप्तैरिति संस्कृतैः" इति वचनानुगुणं योग्यस्थले तेषां वचनानां प्रयोगोऽपि कृतः। न केवलं शिक्षाशास्त्रिकक्ष्याच्छात्राणां कृते एवोपादेयमिदं पुस्तकम्, अपि तु सर्वेषां संस्कृताध्यापकानां कृतेऽपि नित्यवाचनार्थं सङ्ग्रहणीयोऽयमिति मे विश्वासः। अत्र प्रयुक्ता भाषापि सरला, शुद्धा, हृद्या, मधुमती, यथा लेखकमुखेऽपि विलसति तादृशी विमला वाणी।

राजस्थान-संस्कृतविश्वविद्यालयस्य शिक्षाशास्त्रविभागे सहाचार्यपदमलङ्करोति। इत पूर्वं डॉ. मूर्तिमहोदयः प्राध्यापकः आसीत्।

प्रो. वेम्पटि कुटुम्बशास्त्रिमहोदयस्य शिष्योऽयं डॉ. मूर्तिमहोदयः बहूनि पुस्तकानि लिखितवान्। तस्यामेव लेखनशृङ्खलायां इदमपि शिक्षाप्रविधिनूतनशिक्षणतकिनीकिप्रभृति-नवाचारभरितं संस्कृतशिक्षणमिति पुस्तकम्।

अस्य ग्रन्थस्य सम्यगध्ययनेन, परिशीलनेन च मयाऽवापि यदयं नूतनशिक्षणपद्धतिसंवलितो ग्रन्थो न केवलं राजस्थानराज्यस्थितानां विश्वविद्यालयानां संस्कृतविषयकशिक्षाशास्त्रपाठ्यक्रमेऽध्ययनरतानां छात्राणां कृते एव महत्त्वमावहति, प्रत्युत सम्पूर्णस्य भारतस्य सर्वेषां संस्कृतविश्वविद्यालयीयछात्राणां, संस्कृतं प्रति तिजुषामन्येषां जनानां, जिज्ञासूनाञ्च कृतेऽप्ययं ग्रन्थः महत्त्वं बिभर्त्ति।

सर्वेषु पुस्तकालयेष्वयं ग्रन्थः सन्दर्भग्रन्थरूपेणापि ग्राह्यः, सङ्ग्रहणीयश्चास्ति। एतादृगुत्तमपुस्तकरचनायाः कृतेऽयं विद्वान् डॉ. कम्भम्पाटि साम्बशिवमूर्तिमहोदयः साधुवादार्हः।

विजयदशमी, संवत् - २०६३ गोपीनाथः

दि. २, अक्टोबर, २००८

पुरो वाक्

दिव्यां भव्यां सुबोधां च शुद्धामर्थप्रदायिनीम्।
जननीं बहुभाषाणां वन्दे गीर्वाणभारतीम्॥

सुरभारती सार्वजनीना, सार्वकालिका च वर्त्तते। वैदिककालादारम्भ अद्यावधि अस्याः पठनपाठनम् अविच्छिन्नतया प्रचलदस्ति। परिवर्त्तमाने संसारे संस्कृतशिक्षणमपि स्वकीयं महत्त्वपूर्णं पुरातनं स्वरूपम् नूतनशिक्षणपद्धतीः स्वान्तः करोति। अत एव वयमिदानीं प्राचीनपद्धतिभिस्साकं नूतनविधींश्च स्वीकृत्य संस्कृतशिक्षणप्रक्रियामग्रे अग्रे प्रचलन् स्मः। गुणैकग्राहिणो वयं पुरातननूतनपद्धतिषु विद्यमानान् गुणान् स्वीकृत्य शिक्षणं कर्त्तुं प्रयतामहे। भाषाशिक्षणम् अन्यशिक्षणप्रकारापेक्षया भिन्नमेव भवति। अत्रापि संस्कृतभाषाशिक्षणम् अन्यभाषाशिक्षणात् भिन्नं भवति। अतः संस्कृतशिक्षणे त्रयः विषयाः अन्तर्भवन्ति। १. भाषाशिक्षणम्। २. साहित्यशिक्षणम्। ३. शास्त्रशिक्षणम् इति। अपि चेयमिदानीं कुत्रापि कस्यापि च मातृभाषारूपेण नास्ति। तेन कारणेन संस्कृतशिक्षणं मातृभाषाशिक्षणादपि भिन्नं भवति। संस्कृतं प्राचीनभाषा इति कारणतः प्राचीनविधीनां माध्यमेनैव शिक्षणं कुर्मश्चेत् आधुनिकसन्दर्भे उपयुक्तं न भवति। आधुनिकपरिप्रेक्ष्यमनुसृत्य आधुनिकविधीनां माध्यमेन केवलं पाठयामः चेत् पुरातनस्य अतिमहत्त्वपूर्णस्वरूपस्य अवगमनमेव न भवति। अतः संस्कृतशिक्षकस्य उत्तरदायित्वं सुमहदस्ति।

शिक्षाक्षेत्रे विगतदशवर्षेभ्यः अतिशीघ्रतया परिवर्त्तनानि जायमानानि सन्ति। शिक्षणप्रक्रिया सर्वा सङ्गणकाधारिता जाता। गुरो गुरुः इदानीं सङ्गणकमेवास्ति। सैद्धान्तिकशिक्षणापेक्षया प्रायोगिकशिक्षणं बलवत्तरमभवत्। औपचारिकशिक्षायाः अनौपचारिक-निपचौराकिशिक्षायाः प्राधान्यम् एधमानं भवति। विश्वविपण्यां शिक्षापि क्रयविक्रयवस्तुरूपेण स्थापिता वर्त्तते। अपि च सर्वत्रेदानीं मातृभाषामाध्यमेन शिक्षणमिति विषयः श्रूयते, दृश्यते च।

एवं स्पर्धात्मके प्रपञ्चे संस्कृतस्य अस्तित्वं कथं वा संरक्षणीयम् ? अत्र के उपायाः ? कस्य वा उत्तरदायित्वम् ? इत्येतादृशानां सर्वेषां विषयाणाम् एकमात्रः उपायो मार्गो वा भवतु, संस्कृतमाध्यमेन संस्कृतशिक्षणम्। संस्कृतमाध्यमेन संस्कृतशिक्षणाय संस्कृतमाध्यमेन संस्कृतग्रन्थानाम् आवश्यकता वरीवर्त्ति। तत्पूरणाय अयं कञ्चन लघुप्रयत्नः।

शिक्षाशास्त्रिपाठ्यक्रमान्तर्गतं संस्कृतशिक्षणम् इति प्रश्नपत्रं सम्पूर्णतया संस्कृतमाध्यमेनैव लेखनीयमिति यदा निर्णयः जातः तदानीं मनसीयं भावना आगता यत् यावत्पर्यन्तं शिक्षकाः संस्कृतमाध्यमेन न पाठयन्ति, तावत् पर्यन्तं कथं वा छात्राः संस्कृतमाध्यमेन लेखितुं पारयन्ति ? यदा शिक्षकाणां पाठ्यपुस्तकानि संस्कृते नोपलब्धानि भवन्ति, तावता कथं ते संस्कृते एव पाठयितुं प्रभवन्ति ? अनयोः द्वयोः प्रश्नयोः समाधानमेव अयं कश्चन साहसिकः यत्नः।

अनन्तविषयरत्नप्रभवं महासागरं संस्कृतशिक्षणम्। प्रायः ग्रन्थेऽस्मिन् संस्कृतशिक्षणसम्बद्धैः पुरातन-नूतनांशैः पञ्चविंशत्यध्यायेषु स्पृष्टाः, परामृष्टाश्च। नायं ग्रन्थः केवलं शिक्षाशास्त्रिच्छात्राणां, परं तु सर्वेषां संस्कृताध्यापकानां कृते चावश्यं पथप्रदर्शकः भवेदिति मे दृढसम्प्रत्ययः। तदा मे प्रयत्नः सफलः यदा सर्वेषां संस्कृत छात्राणां, संस्कृतशिक्षकाणां, संस्कृतानुरागिणां, संस्कृतसम्बद्धानां विविधविभागीयानां ग्रन्थोऽयमुपकाराय भवति। गुणैकग्राहिणां विपश्चितां समक्षं ममेयं प्रार्थना—

यदि भवति मदीये ग्रन्थमध्ये प्रमादः
क्वचिदपि विनीतः सूचनीयो महद्भिः। इति।

अत्र संस्कृतशिक्षकाः ! निवेद्यन्ते—

आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥

दृढेन आत्मविश्वासेन संस्कृतशिक्षणं कुर्वन्तु। संस्कृतमाध्यमेनैव संस्कृतमातुः सेवां कुर्वन्तु। स्वगौरवं, राष्ट्रगौरवं च वर्धयन्तु।

जयतु भारतम्। जयतु संस्कृतम्॥

विजयदशमी, इत्थं

०९, अक्टोबर, २००८ बुधजनविधेयः

डॉ. कम्भम्पाटि साम्बशिवमूर्तिः

कृतज्ञतानिवेदनम्

वेदवेदाङ्गपारगाः, सन्तातानुष्ठानगरिष्ठाः, शिष्यचित्तापहारकाः संस्कृतप्रचारप्रसारदीक्षादक्षाः, जगद्गुरु रामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य कुलपतयः, स्मेराननाः स्वकरुणाकटाक्षवीक्षणेनास्मान् रक्षमाणाः गुरुवर्याः प्रो. युगल किशोर मिश्र महोदयाः। तेभ्यः त्रिकरणशुद्ध्या पुनः पुनः नमो वाकं प्रशास्महे।

प्रातः स्मरणीयाः, परमपूज्याः, नैकशास्त्रपारङ्गताः, विद्वत्तल्लजाः, मद्गुरुवर्याः वाराणसीय-सम्पूर्णानन्दसंस्कृत विश्वविद्यालयस्य कुलपतयः **प्रो. वेम्पटि कुटुम्बशास्त्रि** महोदयाः। तेषां पदारविन्दयोः सभक्तिकं कृतज्ञताकुसुमानि समर्पये।

परमश्रद्धेयाः, शिष्यहितैकपरायणाः, अव्याज-अनन्तकरुणान्तरङ्गा, दिग्दिगन्तव्याप्तसुयशोभूषिताः, जगद्गुरुमानानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य मान्यकुलपतयः मद्गुरुवर्याः **प्रो. के. वि. रामकृष्णमाचार्यु**महोदयाः। तेभ्यः साञ्जलिं भूयो भूयः नतिततिं विधाय आत्मानं धन्यं मन्ये।

वेदान्तविज्ञानसुनिश्चितार्थाः, संस्कृतभाषाप्रचारप्रसारनिष्ठैकमानसाः, शुद्धसत्वाः, स्वधर्मसंस्कृत्यनुरागिणः, वेदविद्याविज्ञानखनयः रेवासाधामपीठाधीश्वराः श्रीश्रीश्री **स्वामी राघवाचार्यवेदान्तिपूज्यपादाः**। तेभ्यः विनम्रपूर्वकं वारं वारं साष्टाङ्गप्रणामं विदधामि।

जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयीय-नित्यानन्दशास्त्रि-आधुनिकसंस्कृतपीठस्य पीठाध्यक्षाः, 'भारती' संस्कृतमासिकस्य प्रधानसम्पादकाः, राजस्थानसंस्कृत-अकादम्याः भूतपूर्वोऽध्यक्षाः, संस्कृतशिक्षाभाषाविभागयोः, राजस्थानसर्वकारीययोः निदेशकचराः राष्ट्रपति पुरस्कारः पुरस्कृताः स्वकीयेनामूल्येन आशीर्वचनेन अनुग्रहीताः, अन्वर्थनामानः देवर्षिबिरुदांकिताः प्रो. कलानाथशास्त्रि महोदयाः। तेभ्यः साष्टाङ्गं प्रणम्यात्मानं धन्यं मन्ये।

कलासु कुशलाः, स्मितमुखाः, प्रशासनदक्षाः अस्माकं कुलसचिववर्याः **श्री मदनमोहन शर्म महाभागाः**। तेभ्यः सश्रद्धं कार्त्तज्ञं विनिवेदयामि।

भारतसंस्कृतजगति लब्धप्रतिष्ठाः, संस्कृतशिक्षाभाग्यविधातारः, गुरुकल्पाः **श्री मोतीलाल जोषि** महोदयाः। तेभ्यः सानुकम्पम् आधमर्ण्यं प्रकटयामि।

साहित्यशास्त्रविशारदाः सरल-सरसहृदयाः गुरुवर्याः प्रो. विन्ध्येश्वर प्रसाद हिमांशु महोदयाः, ये सदा मे शिवं कामयमानाः सन्ति। तथैव अस्मद्गुरुवर्याः प्रो. रवि शङ्कर मीनन् महोदयाश्च। तेभ्यः प्रणामाञ्जलिं विदधे।

अग्रजकल्पेभ्यः, शिक्षाशास्त्रनिष्णातृभ्यः, शुभाशंसनलेखनेनानुगृहीतवद्भ्यः सहृदयेभ्यः संकायाध्यक्षेभ्यः प्रो. गोपीनाथशर्ममहोदयेभ्यः पुनः पुनः धन्यवादं वितरामि।

क्रमेऽस्मिन् विश्वविद्यालयस्य वित्ताधिकारिणः श्री विमल कुमार गुप्तामहोदया, परीक्षानियन्त्रकाः श्री नरेन्द्र चतुर्वेदीमहाभागाः । तेभ्य सादरम् अभिवन्दनानि ज्ञानपयामि।

गुरुकल्पेभ्यः राष्ट्रियसंस्कृतसंस्थानस्य पुरीस्थ-श्रीसदाशिवपरिसरस्य प्राचार्यवर्येभ्यः प्रो. गुव्वल गङ्गन्ना महोदयेभ्यः, प्रो. आर् देवनाथन्, प्रो. पी. यन् शास्त्री, प्रो. वी. मुरलीधर शर्मा, डॉ. जम्मलमडक भानुमूर्तिहमहोदयेभ्यः कार्त्तज्ञं विनिवेदयामि।

मम अनुजकल्पेभ्यः डॉ. दिवाकर मिश्र, डॉ. माता प्रसाद शर्मा, श्री नन्दि मुरला, श्री सर्वेश शर्म महोदयेभ्यः शुभाशिषः प्रददामि।

प्रियसुहृद्भ्यः श्रीसदाशिवपरिसरस्य डॉ. यस्. वि. रमणमूर्तिमहोदयेभ्यः, डॉ. सुकान्त कुमार सेनापतिः, डॉ. सत्यनारायण आचार्य, डॉ. मदन मोहन झा श्रीगोविन्द पाण्डे महोदयेभ्यः धान्यवादान् वितरामि।

ग्रन्थममुं सुन्दरतया मुद्राप्य दत्तवद्भ्यः दीपशिखाप्रकाशनस्य मुख्येभ्यः श्री राजेश गुप्ता महोदयेभ्यः कार्त्तज्ञं विदेयामि ।

कर्मण्यस्मिन् सर्वविधसहयोगं कृतवत्यै सहधर्मचारिण्यै श्रीमत्यै वल्ली महालक्ष्म्यै धन्यवादं वितरामि।

चि. हेमन्तभार्गवाय, आलोकाय, चि. राकेशाय कु. सुषमायै, चि. तेजस्विने च शुभाशिष इति शम्।

विजयदशमी, गुरुजनविधेयः

०९. १०. २००८ **डॉ. कम्भम्पाटि साम्बशिवमूर्त्तिः**

संस्कृतशिक्षणम्

विषयसूची

संस्कृतशिक्षणम्

१. भाषा

देवीं वाचमजनयन्त देवास्तां

विश्वरूपाः पशवो वदन्ति।

सा नो मन्द्रेषमूर्जं दुहाना

धेनुर्वागस्मानुपसुष्टुतैतु ॥[1]

देवाः वाग्देवीमसृजन्। तां वाचं व्यक्तवाचिनः मानवाः, अव्यक्तवाचिनः जन्तवोऽपि वदन्ति। प्रकर्षेण स्तुता सा वाग्देवी अन्न-क्षीर-घृतादिर सप्रदात्री धेनुरिव अस्मान् प्राप्नुयात्। अत एव उच्यते-धेनुरिव पयो अस्मासु धुक्ष्व।

भाषाभावसम्बन्धः

भाष व्यक्तायां वाचि इत्यस्मात् धातोः (भ्वा.आ.से.) गुरोश्च हलः[2] इति सूत्रेण अप्रत्यये कृते भाषा इति पदं निष्पन्नं भवति। भाषाशब्दस्य आङ्गलभाषायां language इति पदं समानार्थकं भवति। Language इति पदं लाटिन् भाषायाः Lingua इति पदात् सिद्धं यस्य अर्थः भवति-जिह्वा। भाषा प्रायः पञ्चविंशतिसहस्रवर्षेभ्यः पूर्वमेव आविर्भूता इति भाषाशास्त्रविदामभिप्रायः।

आहारनिद्राभयमैथुनं च समानमेतत् पशुभिर्नराणाम्।

भाषा हि तेषामधिको विशेषः भाषाविहीनाः पशुभिः समानाः॥

मानवस्य यथा जलभोजनादिकम् आवश्यकं तथैव भाषणमपि अतीव आवश्यकम्। अत एव संभाषणाय प्रधानविषयाः न भवन्ति चेदपि अप्रधानान् विषयान् आश्रित्य, अधिकृत्य वा संभाषते मानवः।

वागर्थाविव संपृक्तौ वागर्थः प्रतिपत्तये।

जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

इति महाकविः कालिदासः वागर्थाविव सम्भूयमानौ, जगतः मातापितरौ पार्वतीपरमेश्वरौ भाषाभावगौरवाय नमामि इति भाषाभावयोः अविनाभावं प्राकटयत्।

---

1. ऋग्वेदे- ८-८९-११
2. ३.३.१०३

भाषाप्रयोजनानि

सामाजिकस्य मानवस्य प्रधानाधारः केवलं भाषैव। भाषा समाजमाश्रित्य तिष्ठति। भाषां विना विश्वमेव नास्ति। भाषायाः आधारेण मानवः नूतनानुभूतिं प्राप्नोति। स्वपूर्वजेभ्यः ज्ञानविज्ञाने सङ्क्राम्य परेभ्यः सङ्क्रामयति। भाषाप्रयोजनानि द्विप्रकारकाणि—

१. **सामाजिकम्**—सामाजिककार्यसम्पादने भाषा एकं मुख्यं दृढं च साधनम्। सामाजिकपुरोगतिः तत्रत्यां भाषायां प्रतिफलति। भाषा विविधान् सामाजिक-अंशान् सामर्थ्येन निर्वहति। समाजः परम्परानुगतम् इतिहासं, संस्कृतिं च भावि समाजं प्रापयति। तत्तत्कालीनसाहित्येन, साहित्यगतभाषया तत्तत्कालिकी सामाजिकव्यवस्था अभिज्ञायते। भाषा समाजं प्रभावयति च।

२. **वैयक्तिकम्**—इदं पुनः द्विप्रकारकम्। साङ्केतिकप्रयोजनम्, उद्दीपनप्रयोजनञ्चेति।

साङ्केतिकप्रयोजनम्—अक्षराणि, पदानि च सङ्केताः इति वक्तुं शक्यन्ते। एभिः सङ्केतैः वयं भावान् अभिव्यक्तीकुर्मः। साङ्केतिकं बुद्धिगम्यं भवति। अस्मिन् प्रयोजने रसानुभूतिः न भवति। बुद्धिगम्यानि शास्त्राणि सर्वजनसंवेद्यानि न भवन्ति। केवलं ज्ञानप्राप्तिरेव परं प्रयोजनम्। न तु आनन्दप्राप्तिः।

उद्दीपनम्—कवित्वादिसारस्वतकलासु उद्दीपनस्य महत्त्वपूर्णं स्थानं वरीवर्त्ति। सहृदयहृदयगम्यं साहित्यं, कलाश्च सर्वेषां मनांसि रञ्जयित्वा रसनिष्पत्तेः हेतुः भवन्ति। भाषायाः इयमुद्दीपनशक्तिरेव श्रोतृपठितृभ्यः रसानन्दं जनयति। अत एव इदं प्रयोजनं सार्वजनीनम्, सार्वकालीनञ्च।

भाषायाः परमं प्रयोजनं भवति-भावविनिमयः। अर्थात् भावग्रहणम्, भावाविष्करणञ्च। भावग्रहणं साङ्केतिकोद्दीपनैः, सामाजिकवैयक्तिकैश्च क्रियते। श्रवणपठनाभ्यां ग्रहणं, भाषणलेखानाभ्यां भावाभिव्यक्तिश्च भवतः।

भाषाप्रयोजनानि एवं प्रकारेण संक्षेप्तुं शक्नुमः—

१. भावग्रहणम्, भावाभिव्यक्तीकरणं च करोति।
२. संस्कृतिं, सभ्यतां च परिरक्षति।
३. व्यवहारज्ञानं सम्पादयति।
४. श्रोतृपठितृणां रसानन्दं कल्पते।
५. विज्ञानाभिवृद्धिं जनयति।
६. चिन्तनाशक्तिं वर्धयति।
७. व्यक्तित्वं विकासयति।
८. साहित्याभिरुचिं वर्धयति।

९. मनोभावनायाः रूपं कल्पयति।

१०. जीवितं कलात्मकं, सुखदायकं च करोति।

११. सर्जनात्मकशक्तीः बहिरानयति।

१२. सर्वेषां यथार्थं मित्रम्।

भाषापरिभाषाः

१. ध्वन्यात्मकशब्दैः विचाराणां प्रकटनमेव भाषा।

२. भाषा, अर्थसहितध्वनिप्रतीकानां तादृशी व्यवस्था–यया प्रयोक्ता, श्रोता च परस्परं विचाराणाम् आदानप्रदानं कुरुतः।

३. **बृहदारण्यकोपनिषदि** उक्तम्—

वाग्वै सम्राट्। परं ब्रह्म।

भाषा वै लोकस्य सम्राट्। परब्रह्म च।

४. भाष्यते–व्यक्तवाग्रूपेण अभिव्यज्यते इति भाषा।

५. **आचार्यदण्डिना** प्रोक्तम् यत्—

वाचामेव प्रसादेन लोकयात्रा प्रवर्त्तते।

अस्माकं जीवनयात्रा वाग्देवतायाः अनुग्रहेण संभवति। अपि च

इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥

यदि शब्दरूपिणी ज्योतिः संसारे न प्रकाशते, तर्हि संसारे चतसृष्वपि दिक्षु अन्धकारः एव भवति।

६. **भर्तृहरिणा** उक्तम् यत्—

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमविज्ञातं सर्वं शब्देन भासते॥ इति।

७. **छान्दोग्यपनिषदि**—

पुरुषस्य वाग्रसः। वाच ऋग्रसः।[1]

८. **ऋग्वेदे**—

जिह्वा देवानाममृतस्य नाभिः।[2]

९. **तैत्तरीयोपनिपदि**—

जिह्वा मे मधुमत्तमा।

---

1. १-१-२
2. ४-५८-१

१०. डॉ. वी.पी. गुणे महोदयः अकथयत् यत्—

Language in its widest sense means, therefore the sum total of such things of our thoughts and feelings as are capable of external perception and as could be produced and repeated at will.

व्यापकार्थे भाषा नाम अस्माकं विचाराणां, भावानां च साधनतत्त्वम्। अपि च अस्माकमिच्छानुसारं पुनरावृत्तियोग्या च।

११. भाषाशास्त्रकोशे—

भाषा नाम सा या सार्थक-विश्लेषणशक्ति-मानवोच्चारितध्वनीनाम् अभिव्यञ्जिका। अपि च या मानवनियमानुसारं भावानां च नितराम् अभिव्यक्तीकरणाय प्रयुज्यमाना।

भाषालक्षणानि

मानवभाषायाः प्रधानतया सप्त लक्षणानि सन्ति। एतानि एव लक्षणानि अन्येषां प्राणिनां ध्वनिरूपभाषायाः, वार्त्ताप्रसाराच्च मानवीयां भाषां पृथक्कुर्वन्ति।

१. **निर्माणद्वैविध्यम्** (Duality)—मानवभाषायां द्विप्रकारकनिर्माणं वर्त्तते। केचन ध्वनयः पदतया परिणमन्ते। कानिचन सार्थानि परस्परसम्बन्धयुक्तानि पदानि वाक्यरूपेण भवन्ति। एतादृशः प्रकारः प्रायः सर्वासु भाषासु भवति।

२. **उत्पादनशक्तिः** (Productivity)—वयं श्रुतानां वाक्यानां निर्माणमनुश्रुत्य अश्रुतानि नूतनानि वाक्यानि प्रयोक्तुं प्रभवामः। सामान्यतः शिशूनां भाषाभ्यासे इयमेव उत्पादनशक्तिः उपकरोति।

३. शब्दार्थसम्बन्धसिद्धिः (Arbitrariness)—अस्याः एव सङ्केतशक्तिरिति नामान्तरं विद्यते। अस्मात् पदात् अयमर्थो बोद्धव्यः इतीश्वरसङ्केतः शक्तिः। अर्थात् अस्य पदस्य अयमेवार्थः इत्येतादृशाः सङ्केताः प्रत्येकं भाषायां सन्ति।

४. वक्तृश्रोतृविपरिणामः (Interchangebility)—प्रत्येकं व्यक्तौ भाषमाणशक्तिः तथा अन्यैरुक्तानां वचनानाम् अवबोधनात्मकशक्तिः च भवतः। मधुमक्षिकासु, वानरेषु च एषा शक्तिः वर्त्तते।

५. विशिष्टता (Specialization)—वार्त्ताप्रसारे प्रेरणा, प्रतिक्रिया च स्तः। अनयोः मध्ये कश्चन सहजसम्बन्धः स्यात्। यदि सहजसम्बन्धः न भवति तर्हि तस्मिन् वार्त्ताप्रसारे काचन विशिष्टता भवति। उदाहरणाय—भोजनपरिवेषणं दृष्ट्वा वयं हस्तौ प्रक्षाल्य महानसं प्रविशामः। अनयोः क्रिययोः सहजसम्बन्धः अस्ति। अतः अस्मिन् विषये विशिष्टता नास्ति। परं परिवेषयामि, आगच्छतु इति गृहिण्या महानसे क्रियमाणं ध्वनिं श्रुत्वा अस्माभिः तत्र गम्यते। अतः नास्त्येव कश्चन सहजसम्बन्धः। यदि कदाचित् सम्बन्धः भवति, सः सम्बन्धः कृत्रिमः। न तु प्राकृतिकः किमिति चेत् यदि कश्चन जनः तां भाषां न जानाति, तस्याः वचनानि, ध्वनिञ्च श्रुत्वापि प्रतिक्रियां कर्तुं न प्रभवति।

६. **प्रेरणदूरता** (Displacement)—पशव: यदा मनोविकारं प्राप्नुवन्ति, तदानीमेव ध्वनिं कुर्वन्ति इति विषय: परीक्ष्य, निश्चित:। प्राय: तेषां भावप्रकटनं वर्त्तमानकालिकमेव भवति। परन्तु मानव: न केवलं वर्त्तमानं, किन्तु भूतभविष्यतौ च अधिकृत्य भाषते।

७. **सांस्कृतिकप्रसारणम्** (Cultural Transmission)—मानवा: इतरेषाम् आचारव्यवहारादीन् विलोक्य यथा व्यवहरन्ति, तथा भाषां श्रुत्वा तां भाषां च वक्तुं प्रभवन्ति। भाषाया: अभ्यासे अन्यस्य जनस्य अपेक्षा अस्ति। एकस्मात् अभ्यासानन्तरमेव यां कामपि भाषां वक्तुं पारयति मानव:। बाला: ज्येष्ठाननुसृत्यैव भाषामभ्यसन्ति। भाषणसमये आगतदोषान् अपाकृत्य ज्येष्ठा: बालान् शिक्षयन्ति। अयं विषय: अतीव साधारण:।

भाषाक्रम:

१. ध्वनिक्रम:

२. व्याकरणक्रम:

३. भाषासौष्ठवक्रम:

४. साहित्यक्रम:

भाषाविदां विचारा:

1. **R.W. Emerson-**

   Language is a city to building of which every human being brought a stone.

2. **Noah Webster-**

   Language as well as the faculty of speech was the immediate gift of God.

3. **S.T. Coleridge-**

   Language is the armour of the human and it contains the trophies of its past and the weapons of the future conquest.

4. **E.L. Muner-**

   The language of the individual is one of the qualities by which he is judged.

5. **Ravindranath Tagore-**

A language is not an umberalla or an overcoat that can be borrowed by unconscoius or deliberate mistake, it is like living skin itself.

6. **Johnson-**

Language is the dress of the thought.

7. **Voltaire-**

One great use of words is to hide our thoughts.

8. **Joubert-**

In the commerce of speech use only coins of gold and silver.

9. **Anonymous-**

The individual's whole experience is built upon the plan of this language.

10. **John Stuart Mill-**

Language is the light of the mind.

11. **Hippacrates-**

The chief virtue that language can have is clearness and nothing detracts from it so much as the use of unfamilliar words.

12. **George Orwell-**

If thought corrupts language, language can also corrupt thought.

13. **Voltaire-**

Men......employ speech only to conceal their thoughts.

14. **Ezra Pound-**

Great literature is simply language charged with meaning to the utmost possible degree.

15. **Thomas Fuller-**

The language of the law must not be foreign to the ears of those who are to obey it.

16. **George Orwell-**

The great enemy of clear language is insincerity. When there is a between one's real and one's declared aims, one turns as it were instinctively to long words and exhausted idioms.

17. **Annie Sullivan-**

Language grows out of life, out of it needs, experience....language and knowledge are indissolubly connected, they are interdependent.

Good work in language presupposes and depends one real knowledge of things.

18. **George Bernars Shaw-**

I cannot languages, men of ordinary can learn Sanskrit in less time than it takes me to buy a German dictionary.

भाषाप्रकृतिः

१. **भाषा आर्जितसम्पत्तिः**—भाषा परम्परागता भवति। प्राचीनेभ्यः तथा मातुः पितुश्च भाषाशिक्षणं भवति। परं भाषा पैतृकसम्पत्तिः नास्ति, स्वयं प्राप्स्यति। भाषाशिक्षणे मातापित्रोः तथा परिवेशस्य महान् प्रभावः भवति। कस्यचन शिशोः अनुकूलं वातावरणं न मिलति, तर्हि सः मूकः एव तिष्ठति। अपि च शिशुः यस्याः भाषायाः परिवेशे निवसति, तामेव भाषाम् अभ्यसति। तामेव भाषां वक्तुं समर्थः भवति। संस्कृतभाषाविषये अयमेव क्लेशः वर्तते यत् न कस्मिंश्चित् गृहे संस्कृतं भाषमाणा नास्ति। गृहात् बहिरपि तादृशपरिवेशः न मिलति।

२. **भाषा प्रतीकात्मका**—अस्मात् पदात् अयम् अर्थो बोद्धव्यः इतीश्वरसङ्केतः शक्तिरिति रीत्या प्रत्येकस्य पदस्य कश्चन प्रतीकात्मकः अर्थः भवति। ते एव शब्दाः सार्थकशब्दाः भवन्ति।

३. **सामाजिकसाधनम्**—भाषा भावविनिमयाय मुख्यं साधनं भवति। **बेन् जानसन्** महोदयः कथयति यत् भाषा समाजस्य साधनं वर्त्तते। (Language is instrument of society) विद्यमानेषु विविधसमाचारसाधनेषु (communication media) भाषा एवं प्रमुख साधनम् इति।

४. संस्कारचिह्नम्—भाषा स्वसम्बद्धसभ्यतायाः प्रतीका भवति। यतो हि तस्यामेव भाषायां सा सभ्यता उद्भवति, विकसति, पुष्णाति च। प्राचीनकाले या सभ्यता आसीत् सा वैदिकसभ्यता इत्युच्यते या ऋग्यजुस्सामाथर्वणवेदेषु चित्रिता वर्त्तते। वैदिककालीनभाषा तत्कालीनमुनीनाम्, ऋषीणां, महापुरुषाणां ये अमूल्यविचाराः सन्ति, तान् समृद्धान् अकरोत्।

५. व्यावहारिककुशलता—भाषा ज्ञानविषयापेक्षया कौशलात्मका अस्ति। श्रवण-भाषण-पठन-लेखनात्मकानि (Learning - Speaking - Reading - Writing (LSRW)) इत्येतानि चतुर्विधानि भाषाकौशलानि भवन्ति। भाषाशिक्षणाय निरन्तरम् अभ्यासः अपेक्षितः। अत एवोक्तम्—

अभ्यासो न हि त्यक्तव्यः अभ्यासो हि परं बलम्।
अनभ्यासे विषं भाषा (विद्या) अजीर्णे भोजनं विषम्॥

विद्या (भाषा) मभ्यसनेनैव प्रसाधयितुमर्हसि। इति॥

संस्कृतभाषाशिक्षणे अभ्यासस्योपरि अधिकं ध्यानं देयं वर्त्तते। अपि च -

तास्तु वाचः सभायोग्याः याश्चित्ताकर्षणक्षमाः।
स्वेषां परेषां विदुषां द्विषामविदुषामपि॥

ताः ताः वाचः एव प्रयोगार्हाः याः सर्वेषां मनोरञ्जकाः, सभायोग्याश्च भवन्ति।

६. अनुकरणशीलता-शिशवः प्रधानतया अनुकरणशीलाः भवन्ति। गृहे प्रायः सर्वेषु विषयेषु मातरं, पितरं च अनुकुर्वन्ति। भाषाशिक्षणे ते मातापितरौ नूनमनुकुरुताम्। तेषां मुख्यसाधनम् अनुकरणमेव। ततः स्वाग्रजान्, अध्यापकान्, समाजे स्थितान् अन्यान्यजनान् अनुकृत्य भाषन्ते। मातृभाषां विना अन्यां यां कामपि भाषां प्रायः अनुकरणेनैव शिक्षन्ति।

७. मौखिकसाधनम्—भाषायाः परमप्रयोजनमस्ति-भावव्यक्तीकरणम्। इदं च व्यक्तीकरणं द्विविधं भवति। मौखिकं, लिखितं चेति। लिखितं व्यक्तीकरणं कदाचित् साङ्केतिकाक्षरैः चिह्नैः कर्त्तुं प्रभवन्ति। परं मौखिकाभिव्यक्तीकरणाय साधनं तु भाषैव।

८. परिवर्तनशीलता—भाषायाः मुख्यलक्षणं भवति यत् परिवर्त्तनशीलता। अद्य एकस्मिन् अर्थे प्रयुक्तः शब्दः, परेद्युः अर्थविपरिवर्त्तनं प्राप्नोति। संस्कृतभाषायामपि यौगिकशब्दाः, रूढिशब्दाः भवन्ति खलु। तत्र शब्दस्य सामान्योऽर्थः भिन्नः भवति, परं रूढ्यर्थः तद्भिन्नः भवति।

भाषारूपाणि

१. मूलभाषा, २. मातृभाषा, ३. क्षेत्रीयभाषा, ४. राष्ट्रभाषा, ५. अन्ताराष्ट्रियभाषा, ६. सम्पर्कभाषा, ७. सांस्कृतिकभाषा।

भाषोत्पत्तिवादाः

१. **भगवद्दत्तवादः**—भगवानेव भाषां सृष्ट्वा मानवेभ्यः प्राददत् इति अस्य वादस्य सारः। हैन्दवानां संस्कृतं, महम्मदीयानाम् अरबिक्, क्रैस्तवानां हिब्रू च भगवता एव दत्ता इति, अत एव तासां नाम देवभाषाः इति वादस्यास्य विचारः। परमेतत् प्रामाणिकं न। यतो हि भगवान् एक एव स्यात् तर्हि भाषा अपि एका एव भवेत्। तथा नास्ति किल। अतोऽयं वादः निर्हेतुकः।

२. **धातुवादः**—क्रियाबोधकेभ्यः धातुभ्यः भाषा समजायत इति अस्य वादस्य मुख्यधारणा वर्त्तते। किन्तु धातवः कथमुत्पन्नाः ? इति विषयं निश्चेतुं प्रमाणं नास्ति। लोके धातुरहिता भाषा अपि काश्चन सन्ति। अतः भाषा धातूत्पन्ना इत्ययं वादः अप्रामाणिकः।

३. **विमर्शनवादः**—सर्वे मानवाः एकत्रीभूय सम्यक् विमर्शनमकुर्वन्। ततः भाषा समुद्भूता इति अस्य वादस्य मुख्योऽभिप्रायः। अपि च मानवानां मध्ये परस्परविमर्शनकारणात् भाषायाः जन्म अभवत्। प्रथमं विमर्शनम्, अनन्तरं भाषा इति एतेषां वादः। यदि भाषैव नास्ति तर्हि कुतो विमर्शः ? इति प्रश्नः। प्रथमं भाषा, तदनन्तरं विमर्शः इति वादः सहेतुकः भवति। अतोऽयं वादः अशास्त्रीयः।

४. **प्रकम्पनवादः**—इयं प्रकृतिः सर्वा लयात्मिका अस्ति। अतः प्रत्येकः पदार्थः प्रकम्पनयुक्तो भवति। तेषां प्रकम्पनानामानुकूल्येन मानवमुखात् शब्दाः निस्सरन्ति। ते एव शब्दाः भाषायाः आधारभूताः इत्ययं वादः। किन्तु प्रकम्पनानामाधारेण शब्दाः समुद्भवाः इत्ययं वादः प्रमाणरहितः।

५. **योहिहोवादः**—कार्यकरणसमये उच्छ्वासनिःश्वासौ अनुसृत्य नादतन्त्राणां प्रकम्पनेन कश्चन ध्वनिः निस्सरति। धीवराः नाविकाचालनसमये स्वश्रमस्यापनोदनाय योहिहो इति शब्दं कुर्वन्ति। तेन योहिहो इति शब्देनैव अस्येदं नाम जातम्। किन्तु ध्वनयः सर्वे सार्थाः न भवन्ति। केवलं कार्यकरणसमये एव भाषा उत्पद्यते इति विषयः आधाररहितः।

६. **विवक्षावादः**— भयं, क्रोधः, सन्तोषः इत्यादीनां भावानाम् अभिव्यक्तीकरणाय विना प्रयत्नेन ये शब्दाः क्रियन्ते ते एव भाषायाः मूलाधाराः इति वादः, विवक्षावादः। किञ्च ताँस्तान् भावान् व्यक्तीकरणाय ते ते शब्दाः साक्षात् उच्चार्यन्ते इत्ययं वादः समुचितः नास्ति।

७. **ध्वन्यनुकरणवादः**—ध्वनेः अनुकरणात् भाषा उद्भूता इति विवृणोति अयं वादः। आदिमानवः प्रकृतौ विद्यमानैः पशुभिः क्रियमाणान् शब्दान् श्रुत्वा तान् तैरेव शब्दैः वक्तुमारभत। उदा-कौ कौ इति काकः। भे भे इति भेकः। परम् अयं सर्वासु भाषासु एकधैव नास्तीति कारणात् अयं वादः केवलम् ऊहामात्रजनितः॥

❑

२. संस्कृतभाषामहत्त्वम्

या वाचः पठतां तनुं च हृदयं संशोधयन्ति ध्रुवं
या देवैरपि पूजिता व्यवहृता वेदेषु यासां स्थितिः।
याश्चाप्यभ्यसिताः सदा विदधते या स्वारवन्तं नरं
ताः श्लाघ्या गुणगुम्फिताः सुमहिता माधुर्यधुर्या गिरः ।।

सम् पूर्वक कृञ् धातोः क्त प्रत्यये कृते संस्कृतम् इति पदं निष्पन्नम्। संस्कृतम् इति पदं प्रथमं आदिकाव्ये रामायणे वाल्मीकिमुनिना भाषारूपार्थे व्यवहृतम्। यथा—

यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम्।
रावणं मन्यमाना मां सीता भीता भविष्यति ।।

संस्कृतम्-भाषा

पूर्वं भाषाशब्दः एव अस्मिन् अर्थे प्रयुक्तः आसीत्।

एतस्य वचनस्य प्रमाणानि अत्र प्रदीयन्ते।

यास्केन निरुक्ते—

भाषायामन्वध्यायश्च ।[1]

पाणिनिनापि—

भाषायां सदवसश्रुवः ।[2]

प्रथमायाश्च द्विवचने भाषायाम् ।[3] इत्युक्तम्।

एतेषु सूत्रेषु प्रयुक्तः भाषाशब्दः संस्कृतपर्यायवाचकः।

संस्कृतम्-देवभाषा

आचार्यदण्डिना उक्तं यत् संस्कृतम् देवभाषा, अस्माकं मुनिभिरपि सा एव भाषा व्यवहृता। यथा—

संस्कृतं नाम देवीवागन्वाख्याता महर्षिभिः ।[4]
अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ।।
अमृतं मधुरं सम्यक् संस्कृतं हि ततोऽधिकम्।
देवभोग्यमिदं तस्माद्देवभाषेति कथ्यते ।।

---

1. १-४
2. ३-२-१०८
3. ७-२-८८
4. काव्यादर्शः १-३३

संस्कृतम् - प्रभावोत्पादकभाषा

विरोधिवचसो मूकान् वागीशानपि कुंवते।
जडानप्यनुलोमार्थान् प्रवाचः कृतिनां गिरः॥[1]

काव्यभाषा पण्डितान् अपि मूकान् करोति। मन्दमतीनपि अनन्य-प्रतिभासम्पन्नान् करोति।

शमयसि भवतापं ब्रह्मविद्याप्रचारैः
जनयसि हृदि मोदं कालिदासदिकाव्यैः।
गमयसि शुभमार्गं मानवान् धर्मसूत्रे
जगति विबुधवाणि! त्वत्समा काऽस्ति मान्या॥

अमरवाणी वेदान्तविद्यातत्वप्रचारैः लोके विद्यमानानां मानवानां संसारदुःखं दूरीकरोति। कालिदासप्रभृतीनां महाकवीनां काव्यैः हृदयोल्लासं जनयति। धर्मसूत्रैः मानवान् उन्नतमार्गं प्रापयति। हे अमरवाणि! त्वत्तुल्या वन्दनीया अन्या लोके का अस्ति ? काऽपि नास्तीत्यर्थः।

प्रत्यक्षरं बहूनर्थनाश्रित्यामरभारति!।
विराजसेऽनल्परत्नाद्याश्रयः सागरो यथा॥

संस्कृतम् - भाषितभाषा

१. निरुक्तकारः यास्कः प्रत्यपादयत् यत् भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते इति। तदानींतनकाले विभिन्नप्रदेशेषु संस्कृतशब्दानां यानि रूपाणि तेषां सर्वेषाम् उल्लेखः निरुक्तग्रन्थे कृतः। यथा "शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकारमेव त्वेनमार्या भाषन्ते शव इति। दातिर्लवनकर्मा प्राच्येषु प्रयुज्यते, दात्रमुदीच्येषु" इति।

२. पाणिनिमुनिः संस्कृतस्य व्यावहारिकस्वरूपमेव भाषाशब्देन व्याहरत्। अत एव दूराद्धूते इत्यत्र प्लुतस्वरमनुशासितवान्। अपि च पाणिनिः भाषितभाषाव्यवहाराय एव योग्यानां दण्डादण्डि, केशाकेशि, मुष्टामुष्टि, उदरपूरं भुङ्क्ते इत्यादीनां शब्दानामनुशासनमकरोत्।

३. कात्यायनोऽपि तस्मिन् काले व्यवहृतशब्दान् नूतनान् दृष्ट्वा तेषां साधनाय नियमान् अकरोत्।

४. महाभाष्यकारेण पतञ्जलिना देशभेदेन क्रियाभेदं प्रादर्शयत्। तथा हि-"हम्मतिः सुराष्ट्रे प्राच्येषु रंहतिः। आर्यस्तु गच्छतिः प्रयुज्यत इति"।

---

1. शिशुपालवधे- २-५५

५. अपि च वैयाकरणरथवाहकयोः संवादः एकः प्रस्तुतः। यथा— एवं हि कश्चिद्वैयाकरण आह—

कोऽस्य रथस्य प्रवेता ?

सूत आह—

अहमायुष्मानस्य रथस्य प्राजिता।

वैयाकरण आाह—

अपशब्द इति।

सूत आह—

प्राप्तिज्ञो देवानां प्रियो, न तु इष्टिज्ञः। इष्यत एतद्रूपमिति।

वैयाकरण आह—

अहो खल्वनेन दुरुक्तेन बाध्यामहे इति।

सूत आह—

न खलु वेञः सूतः, सुवतेरेव सूतः। यदि सुवतेः कुत्सा प्रयोक्तव्या, दुस्सूतेनेति वक्तव्यम्॥ [1]

अनेन ज्ञायते यत् संस्कृतं भाषित—भाषारूपेण आसीदिति।

६. रूपकेष्वपि शिष्टानां संस्कृतभाषा, तदितरपात्राणां च प्राकृतम् इति दृश्यते।

७. प्राचीनकाले सर्वे जनाः संस्कृतभाषया एव व्याहरन् इति, सामान्यजनानामपि संस्कृतव्याकरणज्ञानमासीत् इत्यत्र अयमपि एकः दृष्टान्तः। यथा—

एकदा भोजराजः पल्लङ्किकायां गच्छन् भारवाहकम् एवमपृच्छत्।

अयमान्दोलिकादण्डः स्कन्धे किं तव बाधति।

श्रुत्वेदं वाक्यं भारवाहकः अवदत् यत्

न बाधते तथा मां हि यथा बाधति बाधते॥

अर्थात् तव बाधति इति अशुद्धप्रयोगः यथा मां कष्टं ददाति, तथा अयं भार कष्टं न ददाति इति। अतो ज्ञायते यत् पुरा काले भारतीयाः सर्वे अनया एव भाषया व्यवहरन्ति स्म। स्वमनोभावं प्रकटयन्ति स्म। परम् काले गच्छति प्राकृतभाषायाः प्राचुर्यम् अधिकमभवत्। तेन संस्कृतस्य व्यवहारः सङ्कोचतां गतः। एतैः प्रमाणैः संस्कृतं भाषितभाषात्वेन आसीदिति वक्तुं शक्यते॥

संस्कृतम् - शुद्धभाषा

दिव्यां भव्यां सुबोधां च शुद्धामर्थप्रदायिनीम्।
जननीं बहुभाषाणां वन्दे गीर्वाणभारतीम्॥

---

1. सूत्रभाष्ये-२-४-५६

दिव्यस्वरूपां, भवसम्बन्धिनीं, सुलभतया अवगन्तुं योग्यां, सुपरिष्कृताम्, अत एव शुद्धां, धनार्जनसाधिकां, बहुभाषाणां मूलरूपिणीं गीर्वाणवाणीं नमस्करोमि।

केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥

भाषायाः शुद्धताया पञ्च अंशाः भवन्ति—

(अ) शब्दशुद्धता—अस्याः अपरं नाम व्याकरणशुद्धता। व्याक्रियन्ते-पृथक् क्रियन्ते-साधुशब्दान् असाधुशब्देभ्यः इति व्याकरणम्। व्याकरणशास्त्रं साधुशब्दप्रयोगे प्रवृत्तिम् असाधुशब्दप्रयोगे निवृत्तिं च साधयति। अतः साधुशब्दानां प्रयोगः एव व्याकरणशुद्धता। यथा—शब्दरूपाणि, धातुरूपाणि, लिङ्ग-वचन-पुरुषकाल-लकारादिज्ञानं वाक्यरचनादिव्याकरणविषयेषु शुद्धता च अत्र अन्तर्भवन्ति।

(आ) भावशुद्धता—शब्दप्रयोगे दोषः न भवेत्। परं भावे दोषः स्यात्। अमङ्गल-अश्लीलभावाभिव्यञ्जकशब्दानां प्रयोगं न कुर्यात्। तदानीमेव भाषाशुद्धता सिद्ध्यति।

(इ) वर्त्तनीशुद्धता—अस्या एव अपरं नाम भवति-उच्चारणशुद्धता। एकस्य वर्णस्य स्थाने अपरः वर्णः न उच्चारणीयः। तेन अपेक्षितार्थं न प्राप्नोति। कदाचित् विपरीतार्थमप्यागच्छति। व इति वर्णस्य स्थाने ब इति, य इति स्थाने ज इति, स इत्यत्र श, ष वा उच्चरन्ति। लिखन्ति च।

(ई) प्रयोगशुद्धता—लोके केचन प्रसिद्धप्रयोगाः सन्ति। तेषां प्रयोगः तथैव करणीयः।

उदा—कलत्रम्, दाराः, मित्रम्-मित्रः, विश्वपाः इत्यादयः।

(उ) संबोधनशुद्धता—भाषणावसरे तथा संबोधनं करणीयं यथा लोकाचारः वर्त्तते। निर्दिष्टप्रयोगविरोधेन प्रयोगः न कर्त्तव्यः। यथा—राजा-देव!, पतिः-आर्यपुत्र, पुत्रः-वत्स, मित्रम्-प्रियवयस्य गुरुः-भगवन्! शिष्यः-सोम्य! इत्यादयः प्रयोगाः।

संस्कृतम् - सांस्कृतिकभाषा

संस्कृतिस्संस्कृताश्रिता।
भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा।
विना वेदं विना गीतां विना रामायणीं कथाम्।
विना कविं कालिदासं भारतं भारतं न हि॥

नाहं जानामि केयूरे नाहं जानामि कुण्डले।
नूपुरे त्वभिजानामि नित्यं त्वत्पादाभिवन्दनात्॥
अपि स्वर्णमयी लङ्का न मेऽरोचत लक्ष्मण!
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी॥
संस्कृतेः संस्कृतिर्ज्ञेया संस्कृतेः सकलाः कलाः।
संस्कृतेः सकलं ज्ञानं संस्कृते किन्न विद्यते ?॥

संस्कृतं भारतीयसंस्कृतेः आत्मा। संस्कृतभाषायाः माध्यमेन भारतीयसंस्कृतिः सुप्रतिष्ठिता अस्ति। बालकस्य जननादारभ्य क्रियमाणाः जातकर्म-नामकरण-अन्नप्राशनादिषोडश संस्काराः अनया एव भाषया विधीयन्ते। पूजापाठः, यज्ञयागादिक्रियाश्च अस्यां भाषायामेव प्रचलन्ति। वस्तुतः संस्कृतभाषाः अस्माकं संस्कृतेः अजस्रस्रोतः भवति।

संस्कृतेः संरक्षणाय संस्कृतभाषा अनिवार्या। अस्माकं सभ्यता-संस्कृतिश्च संस्कृतग्रन्थेष्वेव दरीदृश्यते। संस्कृतेन सह संस्कृतेः सम्बन्धः यदि विच्छिन्नः भवति, तर्हि भारतीयसंस्कृतेः संरक्षणं न भवत्येव। अत एवोक्तम्—

संस्कृतेन सुसम्पन्नं भारतं भारतमुच्यते।
संस्कृतेन विना देशः केवलं चेण्डियोच्यते॥

संस्कृतम्-धार्मिकभाषा

धर्मो नाम इन्द्रियविषयप्राप्तिजन्यां क्षणिकां सन्तुष्टिमनपेक्ष्य वस्तुतः आत्मकल्याणलाभस्य आचरणम्। यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः इति काणादाः। अत्र अभ्युदयो नाम लौकिकोन्नतिः। निःश्रेयसो नाम पारलौकिकी सिद्धिः।

धर्मस्य लक्षणम्—

चोदनालक्षणो धर्म इति जैमिनिः। यत्त्वार्याः क्रियमाणं प्रशसन्ति स धर्मः। यद्गर्हन्ते सोऽधर्म इति आपस्तम्बाचार्याः।

श्रीशङ्करभगवत्पादाः—

जगतः स्थितिकारणं प्राणिनां साक्षाद् अभ्युदयनिःश्रेयसहेतुः यः स धर्मः।

मनुस्मृतौ—

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्॥
यतो धर्मस्ततो जयः।

बोधायनाचार्यः—

धर्मशास्त्ररथारूढा वेदखड्गधरा द्विजाः।
क्रीडार्थमपि यद्ब्रूयुः स धर्मः परमो मतः॥

एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः।

शरीरेण समं नाशं सर्वमन्यद्धि गच्छति॥

धर्मो रक्षति रक्षितः।

तैत्तरीयोपनिषदि—

धर्मो विश्वस्य जगतः प्रतिष्ठा। लोके धर्मिष्ठं प्रजा उपसर्पन्ति। धर्मेण पापमपनुदति। धर्मे सर्वं प्रतिष्ठितम्। तस्माद्धर्मं परमं वदन्ति।

धर्म इति धर्मेण सर्वमिदं परिगृहीतं धर्मान्नातिदुष्करं तस्माद्धर्मे रमन्ते।

धर्म-अर्थ-काम-मोक्षाः चतुर्विधपुरुषार्थाः। अत्र धर्म एव मुख्यः। भारतदेशः धर्मप्रधानदेशः। आस्तिक्यभावना अत्रत्यजनानां प्रधानधारणा। हैन्दवानां धार्मिक ग्रन्था सर्वे प्रायः संस्कृतभाषायामेव विरचिताः। बौद्धजैनधर्मावलम्बिनां केचन ग्रन्था अपि संस्कृतभाषायां विरचिताः। भारतीय-आध्यात्मिकतायाः आधारः धर्मग्रन्था एव। वेद-उपनिषत्-पुराण-रामायण-महाभारत-भागवतादिधार्मिकग्रन्थानां पठनपाठने सततं प्रचाल्यमाने भवतः। संस्कृतं भारतीयं धर्मम् अनुप्राणयति। संस्कृतं विना अस्माकं धार्मिकजीवनमपूर्णमेव भवति।

श्रुतिस्मृतिपुराणधर्मजैनतत्त्वागम-

रघूत्तमचरित्रभागवतभारतोद्दीपितः।

रजोयुततमःक्षयाय सकलोत्तमश्रेयसे

चिराय भुवि राजतां जननि धर्मदीपस्तव॥

संस्कृतम् - ऐतिहासिकभाषा

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।

बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति॥

इति + ह + आस = अनेन प्रकारेण आसीत् इत्यर्थः॥

प्राचीनसंस्कृतसाहित्ये भारतीयम् ऐतिहासिकं सर्वं वर्त्तते। वेदानां सम्यक् अवगमनेन प्राचीनार्यजातीनां सभ्यता-संस्कृति-धर्म-राजनीतीत्यादीनां विषयाणाम् इतिहासो ज्ञातुं शक्यते।

धर्मार्थकाममोक्षाणाम् उपदेशसमन्वितम्।

पूर्ववृत्तं कथायुक्तम् इतिहासं प्रचक्षते॥

पुराणेषु, उपनिषत्सु, रामायण-महाभारतमहाभागवतादिमहाकाव्येषु बौद्ध-जैनसंस्कृतग्रन्थेषु प्राचीनेतिहासः परिनिष्ठतः। कौटिल्यार्थशास्त्रे, मनुस्मृत्यादिग्रन्थेषु इतिहासः सप्रमाणिको वर्त्तते।

पद्मगुप्तस्य नवसाहसाङ्कचरितं, बिल्हणस्य विक्रमाङ्कदेवचरितं, कल्हणस्य राजतरङ्गिणी, हेमचन्द्रस्य कुमारपालचरितं, सोमेश्वरस्य कीर्त्तिकौमुदीकाव्यं वा भवतु, एतेषां काव्यानां पठनेन प्राचीनभारतस्य सामाजिकं राजनीतिकं ज्ञानं नूनमस्माभिः प्राप्यते।

संस्कृतम् - साहित्यिकभाषा

सङ्गीतमपि साहित्यं सरस्वत्याः स्तनद्वयम्।
एकमापातमधुरम् अन्यदालोचनामृतम्॥
काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन च॥
सङ्गीतसाहित्यकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।
तृणन्न खादन्नपि जीवमानः तद्भागधेयं परमं पशूनाम्॥

संस्कृतस्य साहित्यं सुसम्बद्धं वर्त्तते। तत्साहित्यं द्विविधमस्ति। वैदिकं, लौकिकञ्चेति। पुनः लौकिकं गद्य-पद्य-चम्पू-नाटकादि विविध-साहित्यरूपेण उपलभ्यते। एतदतिरिच्य साहित्य-ज्योतिष-गणित-दर्शन-नीति-इतिहासादिविषयेषु सहस्रशः ग्रन्थान् व्यरचयन्। अपि च संस्कृतात् भारतीयभाषाः न केवलं शब्दभण्डारं, किन्तु संस्कृतसाहित्यं, साहित्यस्य विचारधारां च समगृह्णन्। संस्कृतभाषामनुकृत्य अन्यभारतीयभाषासु लक्ष्यलक्षणग्रन्थान् व्यलिखन्। संस्कृतकाव्यशास्त्रविषयिणो ग्रन्थाः भूरिशोऽनूदिताः। संस्कृतसाहित्ये पञ्च महाकाव्यानि अतिप्रसिद्धानिः—

१. रघुवंशः २. कुमारसम्भवः
३. मेघसन्देशः ४. किरातार्जुनीयम्
५. शिशुपालवधः/नैषधम्

गद्यकाव्यानि-कादम्बरी, हर्षचरितम्, वासवदत्ता इत्यादीनि।

नाटकानि-अभिज्ञानशाकुन्तलम्, उत्तररामचरितम्, मृच्छकटिकम् इत्यादीनि।

संस्कृतम् - मधुरभाषा

न जाने विद्यते किं तन्माधुर्यमिह संस्कृते।
सर्वदैव समुन्मत्ता येन वैदेशिका वयम्॥

संस्कृतभाषायाः माधुर्येण आकृष्टा वैदेशिका अपि तद्भाषागतरसामृतपाने बहुधा निमग्ना समभूवन्। किमुत भारतीयाः ?

भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती।
तस्माद्धि काव्यं मधुरं तस्मादपि सुभाषितम्॥

विश्वे विद्यमानासु भाषासु प्रधानभूता, आधारभूता, देवसम्बन्धिनी भाषा संस्कृतम्। अपि चेयं अमृततुल्यमधुररसपूर्णा।

संस्कृतम् - वैज्ञानिकभाषा

वैज्ञानिकाश्च कपिलाः कणादः सुश्रुतस्तथा।
चरको भास्कराचार्यो वराहमिहिरः सुधीः॥
नागार्जुनो भरद्वाज आर्यभट्टो वसुर्बुधः।
ध्येयो वेंकटरामश्च विज्ञा रामानुजादयः॥

खगोलविज्ञानम्—

प्रज्ञानाय नक्षत्रदर्शम्।[1]

आकाशीयदर्शनेन प्रज्ञानं भवतीति अस्य मन्त्रस्यार्थः।

ऋग्वेदे—

यत्वा सूर्य स्वर्भानुस्तमसा विन्ध्यदासुरः।
अक्षेत्रविद्यथामुग्धो भुवनान्यदीधयुः॥
यं वै सूर्यं स्वर्भानुस्तमसा विन्ध्यदासुरः।
अत्रयः तम् अन्वविन्दन् न ह अन्ये अशक्नुवन्॥[2]

हे सूर्य! यदा अद्भुतगुणसम्पन्नेन राहुणा (स्वर्भानुना) त्वयि छायावरणं कृतं यतो समस्तविश्वस्य प्रजा आश्चर्यचकिताः समभवन्। अपि च भवन्तं विलोक्य सर्वे विस्मृताः यतो हि चतुर्दिक्षु अन्धकारः व्याप्तः। तदा केवलम् अत्रिमहर्षिः एव भवतः स्थितिं ज्ञातुं समर्थः इति।

पश्चात् लल्ला स्वकीये शिष्यधीवृद्धिदा नामके ग्रन्थे सूर्यग्रहणस्य वैज्ञानिकव्याख्यां चकार—

सवितुश्च यदन्यथाऽन्यथा प्रतिदेशं सकलं समीक्ष्यते।

न च कुत्रचिदित्यवेत्य कः कुरुते राहुकृते ग्रहे ग्रहम्॥

विश्वस्य विविधभागेषु जनाः सूर्यस्य भिन्नभिन्नभागानां ग्रहणं पश्यन्ति। कुत्रचित् ग्रहणं नैव पश्यन्ति। अतः इदं स्पष्टं भवति यत् ग्रहणस्य राहुः कारणं न भवति। यतो हि स्वर्भानुशब्दस्य बहवो अर्थाः सन्ति। तत्रैकोऽर्थः राहुः। एतदतिरिच्य, स्वरभानुशब्दस्य सूर्येण प्रकाशितः इत्यपि अर्थः विद्यते। छायारूपः अन्धकारः इत्यपि अर्थः वर्त्तते। उपर्युक्त ऋग्वेदीयमन्त्रः नूनं ग्रहणविषयं वर्णयति। सूर्यग्रहणस्य कारणं राहुः नास्ति इति लल्लाप्रतिपादितः विषयः नितान्तं साधुरेव। अत्र स्वरभानु इति शब्दस्यार्थमेवं व्याख्येयम्-सूर्येण प्रकाशितः छायारूपः अन्धकारः इति।

---

1. तै.सं-४/४/११
2. ५-४०

रासायनिकं विज्ञानम्—

तैत्तरीयसंहितायां चतुर्थकाण्डे सप्तमप्रश्ने चतुर्थाध्याये—**हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मे** इत्येव प्रकारेण षट्प्रकारकलोहविशेषाणां प्रतिपादनं कृतं विद्यते।

रसार्णवनामके ग्रन्थे—

सुवर्ण रजतं ताम्रं तीक्ष्णं वंगभुजङ्गमाः।
लौहिकं षड्विधं तच्च यथापूर्वं तदक्षयम्॥

रसरत्नसमुच्चयनामके ग्रन्थे—

रसानां वर्गीकरण दशधा कृतमस्ति। यथा—

महारसाः	रत्नानि	धातवः	विषाणि
	क्षाराणि	आम्लानि	लवणानि
	लौहिकभस्मानि		

पुनः एतेषां दशविधानां वर्गीकरणं विद्यते—उपरसाः, सामान्यरसाश्चेति।

गणितविज्ञानम्—

एका च दश शतं च सहस्त्रं चायुतं च।
नियतुं च प्रयुतं चार्बुदं च न्युर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्च॥
यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद्वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम्॥
कल्पसूत्रान्तर्गतशुल्बसूत्रेषु विस्तृततया गणितविज्ञानं वर्णितम्।

प्राचीनगणितप्रणाल्यः

भूतसंख्याप्रणाली—

आकाश–०	चन्द्र–१	नयन–२	अग्नि–३
वेद–४	भूत–५	शास्त्र–६	ऋषि–७
वसु–८	ग्रह–९	अवतार-१0	रुद्र–११
सूर्य–१२	गन्धर्व–१३	मनु–१४	तिथि–१५
कला–१६	तारा–२७	वर्ष–६०	

उदा–भूतग्रहशास्त्र–५९६

एवंप्रकारेण क्रमः भवति।

कतपायदीप्रणाली—

कादिनव, टादिनव, पादिपञ्चकं, याद्यष्टकमिति।

आर्यभटप्रणाली—

आर्यभटीयनामके ग्रन्थे शब्दाङ्कप्रणाल्याः प्रस्तावः विद्यते। तदनुसारं देवनागरीलिप्यां क अक्षरात् म अक्षरं यावत् २५ संख्याकानि व्यञ्जनानि भवन्ति। अतः एकसंख्यातः २५ पर्यन्तं संख्याः दत्ताः। य अक्षरादारभ्य पुनः ३०, ४०, ... एवं क्रमेण दीयते। एवं संस्कृतसाहित्यं सर्वं विज्ञानसमोपेतम्।

अतएव तैत्तरायोपनिषदि विज्ञानं ब्रह्मेति व्यजानात्। विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते। विज्ञानेन जातानि जीवन्ति। विज्ञानं प्रयन्त्यभिशंविशन्तीति इति सम्यक्तया विज्ञानस्य महिमा प्रतिपादिता।

संस्कृतम् - राष्ट्रभाषा

वैदिकं राष्ट्रगानम्—

आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसीजायतामाऽस्मिन् राष्ट्रे राजन्य इषव्यश्शूरो महारथो जायतां दोग्ध्री धेनुर्वोढाऽनड्वानाशुस्सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठास्सभेयो युवाऽस्य यजमानस्य वीरो जायताम् निकामे निकामे नः पर्जन्यो वर्षतु फलिन्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्॥[1]

भारतदेशः विभिन्नधर्म-भाषा-संस्कृतिभूयिष्ठः। अस्माकं भावना अस्ति-भिन्नत्वे एकत्वम्। यद्यपि बहुव्यः भाषाः, तथापि संस्कृतविषये उत्तरे, दक्षिणे पूर्वे, पश्चिमे वा भवतु, द्वेषभावो नास्ति। अपि च विशेषादरः दरीदृश्यते।

दुर्लभं भारत जन्म मानुष्यं तत्र दुर्लभम्।

पुराणेष्वपि उत्कृष्टा राष्ट्रियभावना उद्घोषिता वर्त्तते—

विष्णुपुराणे यथा—

अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने।
यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः॥
अत्र जन्मसहस्राणां सहस्रैरपि सत्तम!
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात्॥
गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे।
स्वर्गापवर्गस्य च हेतुभूते भवन्ति भूयः पुरुषाः सुरत्वात्॥
स्वर्गापवर्गस्य च हेतुभूते भवन्ति भूयः पुरुषाः सुरत्वात्॥
उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तद्भारतं नाम भारती यत्र संततिः॥

---

1. तै. सं.-७

अयोध्यां मथुरा माया काशी काञ्च्यवन्तिका।
पुरी द्वारावती चैव सप्तैते मोक्षदायकाः॥
गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥
महेन्द्रो मलयस्सह्यः देवतात्मा हिमालयः।
ध्येयो रैवतको विन्ध्यो गिरिश्चारावलिस्तथा॥
प्रयागं पाटलीपुत्रं विजयानगरं पुरीम्।
इन्द्रप्रस्थं गयां चैव प्रत्यूषे प्रत्यहं स्मेरत्॥
यावद्भारतवर्षं स्यात् यावद्विन्ध्यहिमाचलौ।
यावद्गङ्गा च गोदा च तावदेव हि संस्कृतम्॥

किं नाम राष्ट्रियत्वमिति विचार्यमाणे सति यद् राष्ट्रियत्वं विकसितं सत् स्वभावतः एव विश्वबन्धुत्वे विलीनं भवेत् तदेव खलु राष्ट्रियत्वम् इति। अपि च-या मानवजीवनध्येयविषयिण्यो भावनाः मानवजीवने दिव्यं रम्यं च कुर्वन्ति, याश्च मनोभूमिकायां समवतीर्णा वंशो, भाषा, सवाङ्मया वार्त्ताहितैकता, परम्परा, देशो, राजतन्त्रम्, दक्षता च इमे सप्तभिः अङ्गैः अभिव्यक्ताः भवन्ति, ताः समुदिताः राष्ट्रियत्वस्य स्वरूपम्। एतादृशराष्ट्रियत्वविशिष्टो जनसमाजो राष्ट्रं नाम। तस्य समाजस्य घटकश्च राष्ट्रम्।

राष्ट्रभाषा—

भाषा हि मानवजीवनस्य प्रतिबिम्बभूता। मानवजीवने याः धारणाः भवन्ति, ताभिरेव मानवजीवनं निर्मितं वर्त्तते। अत एव विभिन्नमानवैः निर्मितासु भाषासु विशिष्टलक्षणानि परिलक्ष्यन्ते। तैरेव लक्षणैः तत्तद्भाषायाः व्याकरणं जायते। यस्याः भाषायाः सुप्रतिष्ठिता भारतीयसंस्कृतिः समजायत, सा भाषैव खलु संस्कृतभाषा। अस्या प्रतिपदं भारतीयजीवनविचारधारणाः सुस्पष्टं प्रतिफलन्ति। अत एव संस्कृतं राष्ट्रभाषा भवितुमर्हति॥

संस्कृतम् - विश्वभाषा

अयं निजः परो वेति गणाना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥
सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्॥
कल्याणमस्तु सर्वेषां, विलसन्तु समृद्धयः।
सुखाः समीरणा वान्तु भान्तु सर्वा दिशः शुभाः॥

समानीव आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुमहासति॥
संगच्छध्वं सवदध्वं सं वो मनांसि जानताम्॥
उच्चावचैरास्तिकनास्तिकाद्यैः
मतैश्च भाषाव्यवहारभेदैः।
विचक्षणा विश्वविधातृसृष्टं
यं विश्वविद्यालयमामनन्ति॥

अनया रीत्या संस्कृतं विश्वभाषात्वेन व्याप्तुंमर्हति। अयं तु देशः विश्वविद्या लयत्वेन कीर्तिं प्राप्नोति। विश्वस्य सकलस्य गुरुः भवति।

संस्कृतभाषाप्रशस्तिः

१. भो विद्वन् यदि काम्यते सुरपदं देहात्मशुद्धिस्तथा
सेवा वा परमात्मनः सुजनता यद्वा मनोरञ्जनम्।
देशस्यास्य समुन्नतिर्बहुविधा तस्यैव चाखण्डता
तद्भो भारतवर्षजात! मतिमन्! मा स्म त्यजः संस्कृतम्।

२. या वै मुक्तिप्रदात्री कलिकलुषहरा ज्ञानविज्ञानगर्भा
प्रख्याताऽपौरुषेयी विबुधबहुमता कामनाकल्पवल्ली।
धर्मस्याधारभूमिः श्रवणसुखकरी मानवादर्शपूणा
सन्तानार्था सदेयं जगति विजयतां वन्दिता वेदवाणी॥

३. मातर्गीर्वाणवाणि त्वममरनगरीप्राङ्गणे ब्रह्ममुख्यै-
र्देवैस्सौलाल्यमाना, चिरमवनितले स्तूयमाना महद्भिः।
वाल्मीकिव्यासमुख्यैर्मुनिभिरनुदिनं कालि दासादिभिश्चा-
नीताऽलङ्कारशोभा कविभिरनुपमा सन्तु नस्ते नमांसि॥

४. मातः काऽस्ति त्वदन्या जगति बहुजनैर्भर्त्स्यमानोऽपि या त्वम्
वात्सल्यस्यन्द्युरोजा शिशुमिव जननी दश्यमानस्तनापि।
शान्ता लीना प्रजा वै रमयसि बहुविधज्ञानविज्ञानदुग्धैः
स्तोतुं त्वां कः समर्थो जगति विबुधगीर्लोकशोकापनेत्रम्॥

५. न खलु विबुधलोके मानवानां विहारः
न च सुररमणीभिस्सौख्यभोगप्रसक्तिः।

इति किल करुणार्द्रीभूतचित्ता स्वयं त्वं
धरणिममरवाणि प्राप्य नाकीकरोषि॥

६. यदि विबुधनिवासान्नागता त्वं हि देवि
भगवत इह तत्त्वं कोऽपि विज्ञातवान् स्यात्।
कृतनिरयनिवासा उज्झितात्मस्वरूपा
जननमरणकूपे मानवाः पातिताः स्युः॥

७. तव जननि जगत्यां प्राप्य सम्पर्कमन्याः
विधुमिव कुमुदिन्यो भान्ति भाषा नितान्तम्।
न भवति खलु शक्तस्त्वां विना कोऽपि वक्तुं
भवसि सकलभाषाजन्मदात्री यतस्त्वत्वम्॥

८. निन्दन्तु केचिदनिशं भवतीं पुमांसः
मातस्तथाप्यपचयो न हि तेऽस्ति नूनम्।
उल्का दिवानिशमपि स्फुरतु प्रकामं
वारांनिधिर्न खलु शुष्यति तावतासौ॥

९. को वाल्मीकिः कश्च वा कालिदासः
को वा व्यासो नास्ति चेत्तेऽनुकम्पा।
कालेऽतीतेप्यम्ब यत्तान् स्मरामः
देवीवाक् ते सन्तनोति प्रभावम्॥

१०. राकेटाख्यविमाननिर्मितकलापारङ्गताः सन्तु वा
व्योम्न्युड्डीय सुधांशुमण्डलमथो वेगेन ते यान्तु वा।
स्वर्गं वा सशरीरमेव मनुजा गच्छन्तु गीर्वाणवाक्
तत्राप्यम्ब तव प्रसादमतुलं काङ्क्षेयुरुच्चैस्तमाम्॥

११. कामं सन्तु सहस्रशो भुवि गिरः कस्ताभिरर्थोऽस्ति निः
शक्ता तोषयितुं त्वमेव मनुजान् शब्दैः सुधास्यन्दिभिः।
वर्षासु प्रवहन्तु नाम सरितः कूलङ्कषाः किं फलम्
ग्रीष्मे या पथिकान् नदी खलु जलं सन्तर्पयेत् स्रोतसा॥

१२. रे रे चातक मारणायुधविनिर्माणे यदि श्राम्यसि
स्वात्मा किं भविता विचारय मनाक् तस्यैव विस्फोरणात्।

नेहरूबोधितपञ्चशीलविषये यद्यस्ति वाञ्छा तवा-
ऽध्यात्मज्ञानविवर्धिनीं सुरगिरं भ्रातर्भजेस्सत्वरम्॥

शिक्षायाः महत्त्वम्

शिक्ष् धातोः भावार्थे अप्रत्यये, टापि च कृते शिक्षा शब्दः निष्पन्नः। अस्य अर्थः भवति-उपदेशः, शिक्षणं, ज्ञानार्जनम्, अध्ययनम्। वेदज्ञः सायणः कथयति-स्वरवर्णाद्युच्चारणप्रकारो यत्र शिष्यते सा शिक्षा इति। प्रायः सायणः प्रारम्भिकस्तरम् अभिलक्ष्यैव एनां संज्ञामकरोत्।

आङ्गलभाषायां शिक्षा शब्दस्य पर्यायवाची शब्दः भवति-एजुकेषन्। अस्यार्थः भवति-पालनम् अथवा आत्मप्रकाशः। अतः शिक्षा व्यक्तौ अन्तर्निहितानां शक्तीनां आत्मप्रकाशने सहकरोति। अन्यशिक्षाविदः मन्वते यत् शिक्षा नाम सा यया ज्ञानं दीयते। अर्थात् सततशिक्षणप्रक्रिया। सोक्रटीस् महोदयः चिन्तयति यत् शिक्षा नाम व्यक्तिषु सद्गुणानां सदभ्यासानां चोन्नतिः, विकासो वा इति। पेष्टालाजी महोदयः कथयति मानवस्य सहजातशक्तीनां स्वाभाविका, सुसंहता, प्रगतिशीला उन्नतिरेव शिक्षा इति। **फ्रोबेल** महोदयः अभिप्रैति यत् मनुष्यस्य स्वर्गीयसत्तायाः परिप्रकाश एव शिक्षा।

महात्मा गान्धिः वदति - By Education, I mean alround drawing out the best in the child and man-body, mind and spirit.

परिभाषाः—

मानवे निहितं सर्वाङ्गीणविकासं प्रकटयति।

काण्ट् महोदयस्य अनुसारं शिक्षायाः क्षमतया एव मानवस्य विकासः समग्रतया, सम्पूर्णतया च भवति। वैदिकशिक्षायाः उद्देश्यानि-

मोक्षप्राप्तिः, संस्कृतेः संरक्षणं, प्रचारश्च, ज्ञानार्जनं, गुरुशिष्यसम्बन्धस्य संरक्षणम् इत्यादीनि। गुरुशिष्ययोर्मध्ये दृढतरः सम्बन्धः आसीत्। तैत्तरीयोपनिषदि—

सहनाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु। मा विद्विषावहै इति।

प्राचीनभारतीयशिक्षायाः महत्त्वम्—भारतं नाम निरन्तरज्ञानसंलग्नमिति। परमपवित्रे भारतभूखण्डे शिक्षायाः महत्त्वं विदितचरमेव विदुषाम्। महत्त्वाधायकाः केचन अंशाः अत्र उदाह्रियन्ते।

ईशावास्योपनिषदि—

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।

तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्।

अत्र निःस्वार्थपररूपगुणः प्रस्तूयते। प्राचीनभारतीयशिक्षायाः उत्तराधिकारी सम्प्रति जानीते यत्-दुखोऽस्यामहमेक एव जगतां लोकः सुखं जीवतु इति।

आध्यात्मिकता-आत्मा वा रे द्रष्टव्यः, श्रोतव्यः, मन्तव्यः, निदिध्यासितव्यो वा। आत्मज्ञानजन्यशक्तिरेव शिक्षायाः सारभूतं तत्त्वम् इति। अत एवोच्यते-सा विद्या या विमुक्तये। विद्ययाऽमृतमश्नुते। विद्यया विन्दतेऽमृतम् इति।

चरित्रसंगठनम्-अधीतिनश्चरित्र सर्वथा अवाच्यं विधातुं प्राचीनभारतीयशिक्षा निबोधयति।

मातृवत्परभार्याश्च परद्रव्याणि लोष्टवत्।
आत्मवत्सर्वभूतानि यः पश्यति स पण्डितः॥

इत्यादिमहनीयशिक्षाप्रदानेन शिष्यान् उत्तमचरित्रयुक्तान् कर्त्तुं पुराणी अनवद्या ि क्षा नितरां प्रयतते।

यदाह स्मृतिकारः मनुः—

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥

जगदुरुशङ्कराचार्यः उदबोधयत् यत् आत्मानुभूतिरेव शिक्षा। अर्थात् शिक्षया एव आत्मनः साक्षात्कारः भवति। शिक्षया जन्मजातशक्तीनां विकासः भवति। व्यक्तित्वस्य विकासो जायते।

व्यक्तेः सर्वाङ्गीणविकासः भवति। मूलप्रवृत्तीनां नियन्त्रणं, मार्गान्तरणं, परिशोधनश्च शिक्षया एव सिद्धयति। सामाजिकभावनायाः विकासः भवति।

प्राचीनशिक्षणविधिः—

प्राचीनकाले शिक्षणं सर्वं मौखिकपद्धत्या एव प्रचलितम् आसीत्। गुरुः उच्चवर्गीयान् छात्रान् पाठयति स्म। उच्चवर्गीयाः छात्राः पुनः अन्यान् छात्रान् पाठयन्ति स्म। उच्चवर्गीयस्य छात्रस्य नाम आसीत् पित्ति आचार्यः इति।

ज्ञानं तृतीयं मनुजस्य नेत्रम्, विद्याविहीनः पशुः, किं किं न साधयति कल्पलतेव शिक्षा इत्यादिभिः वाक्यैः शिक्षायाः महत्त्वं ज्ञातुं शक्नुमः।

❑

३. संस्कृतविषये महापुरुषाणां विचाराः

भारतीयाः

स्वामी विवेकानन्दः—

संस्कृतध्वनिषु, शब्दभण्डारे च जीवनशक्तेः जागरणस्य क्षमता अस्ति। भारते क्षेत्रीयभाषाभिः सह संस्कृतमपि अनिवार्यरूपेण अध्यापनीयम्।

श्री अरविन्दः—

संस्कृतस्य ज्ञानं समस्तहिन्दूनाम् अत्यावश्यकमस्ति। संस्कृतस्य अध्ययन-अध्यापनाय एका विशिष्टा व्यवस्था अपेक्षिता वर्तते।

श्री पी.वी. गजेन्द्रगड़करः—

संस्कृतं भारतस्य पुरातनं, भारतस्य वर्तमानेन योजयति, यत् राष्ट्रं स्वकीयम् अतीतं विस्मरति, तेन वर्तमानं, भविष्यदपि उज्ज्वालयितुं न पारयति। अतः भारतीयशिक्षणपद्धतौ संस्कृतस्य समुचितं स्थानं देयम्।

मौलाना अब्दुल कलाम् आजाद्—

संस्कृते एव भारतस्य दर्शनं, साहित्यस्य प्रमुखं रूपं च उपलभ्येते। अतः संस्कृतस्य अध्ययनाय विशिष्टव्यवस्था करणीया।

डॉ. श्यामप्रसाद मुखर्जी—

संस्कृतम् असीमितो, अनन्तश्च ज्ञानभण्डारः, येन समस्तविश्वे ज्ञानप्रज्ञे प्रासरताम्। अतः राष्ट्रियशिक्षानीतौ संस्कृतस्य समुचितं स्थानं स्यात्।

जनरल के. यम्. करियप्पा—

भारते प्रत्येकं विद्यालये किरण्डर्गार्टन् आरभ्य एव संस्कृतम् अनिवार्यरूपेण पाठनीयम्। तेन आगामिनि काले संस्कृतं भारतस्य राष्ट्रभाषा भविष्यति।

डॉ. हरेकृष्ण मेहतावः—

संस्कृतस्य अध्ययनं न केवलं भारतीयधर्माणां, दर्शनानां च ज्ञानाय, अपि तु भारतीयराजनीतेः ज्ञानाय भवति। अतः विद्यालयेषु, कलाशालासु च संस्कृतम् अनिवार्यरूपेण शिक्षणीयम्।

धर्मपिता जे. डिसौजा—

मानवीयतायाम् आधारिता या कापि शिक्षा संस्कृतस्य अध्ययनं विना पूर्णं न भवति। संस्कृतं भारतस्य सर्वातिरिक्ता सम्पत्। संस्कृतं हि भारतम्। यदि संस्कृतं सुरक्षितं भवति, भारतं च सुरक्षितम्।

डॉ. जवहर् लाल् नेहरू—

यदि मां कोऽपि पृच्छति-भारतस्य निकटे सर्वविशिष्टं बहुमूल्यं वस्तु किमस्तीति, अथवा भारतस्य सर्वाधिका, सुन्दरा सम्पत् का इति। तर्हि अहं निस्सन्देहं वदिष्यामि-संस्कृतभाषा, साहित्यं, तद्गतज्ञानं चेति।

डॉ. रघुवीरः—

संस्कृतमेव भारतम्। भारतस्य प्रतिष्ठा संस्कतेन, साहित्येन च सुग्रथिता। यदि संस्कृतं सुरक्षितम्, तर्हि भारतमपि सुरक्षितम्। संस्कृतस्य ह्रासः भारतस्यापि ह्रासः।

डॉ. राजेन्द्राप्रसादः—

यदि वयं पूर्वजैः कृतं योगदानं विस्मर्त्तुं नेच्छामः, अवश्यं संस्कृतेन परिचिता भवेम। संस्कृतस्य प्रोत्साहनं राष्ट्रियकार्यम्।

राजगोपालाचारी—

संस्कृतगौरवनिरूपणम् असम्भवकार्यम्।

डॉ. सर्वेपल्लि राधाकृष्णन्—

संस्कृतम् एका तादृशी भाषा या अस्मान् विचारपरम्परया, संस्कृत्या सह योजयति। अद्यावधि अस्माकं देशवासिषु एकतायाः सौभ्रातृत्वस्य च भावनां संचारयन्ती अस्ति।

नवाब् जङ्ग—

संस्कृतमेव स मार्गः, यस्य साहाय्येन वयं विशालां समृद्धां भारतीयसांस्कृतिकसम्पदं ज्ञातुं शक्नुमः।

विनोबा भावे—

तत्त्वमसि इत्यादि-उदात्तसङ्कल्पनाभिः परिपूर्णं, सुन्दरं च वाङ्मयं संस्कृते एवास्ति। एतादृशं विश्वश्य न कस्याप्यन्यस्यां भाषायामुपलभ्यते। संस्कृते निबद्धमिदम् आध्यात्मिकसाहित्यमेव भारतस्य सर्वोत्कृष्टशक्तिः। अनेनैव हि कारणेन भारतं सम्पूर्णविश्वे सर्वोच्चः अभवत्।

लाल बहादुर् शास्त्री—

संस्कृतमस्य देशस्य एकम् अमूल्यं सञ्चितं रिक्थम्। संस्कृतमस्माकं संस्कृतेः, सभ्यतायाः च मूलस्रोतः। संस्कृतभाषाः, साहित्यस्य च इतिहासः एव अस्य देशस्य बौद्धिकविकासस्य इतिहासः। संस्कृते भारतीयात्मा अभिव्यक्ताऽभवत्। अपि चेयं भारतीयभाषाणां जननी, सोदरी, धात्री च।

सावर्करः—

संस्कृतं समस्तभारतीयानां मातृभाषा। इमाम् अस्माकं मातरः समभाषन्त। इयं सर्वासां भारतीयभाषाणां जननी।

वासुदेवशरण अग्रवालः—

संस्कृतं भारतीयसंस्कृतेः मनोरथान् पूरयति। भारतीयमनीषानां प्रतिफलानि संस्कृते एव लभन्ते।

श्रीप्रकाशः—

हिन्दीभाषायाः अपेक्षया संस्कृतमेव राष्ट्रभाषा भविष्यति, तर्हि अतिसमीचीनं भवति।

सम्पूर्णानन्दः—

ममायं विश्वासः यत् संस्कृतमेव भारतस्य राष्ट्रभाषा।

श्रीमतिइन्दिरा गान्धिः—

यदि संस्कृतं सरलं क्रियेत तर्हि भारतस्य विभिन्नराज्यानां जनेषु सम्पर्काय साधनं, माध्यमं च भवेत्। अनेन भाषासमस्यायाः अपि परिष्कारः भवेत्।

वैदेशिकाः

विलियम् जेम्स्—

संस्कृतभाषा ग्रीक् भाषापेक्षया समग्रा, लाटिन् भाषापेक्षया व्यापकी, द्वाभ्यां परिष्कृता, उत्कृष्टा च विराजते।

मोनियर् विलियम्स्—

संस्कृतं मृतभाषा नास्ति। इयं समग्रभारते भाषमाणा तथा अस्यां साहित्यमपि सृजदस्ति।

फै. मैक्स् मुल्लर्—

भारतस्य समस्तजीवद्भाषाः (आर्य, आर्येतर) संस्कृतादेव उदभूवन्। संस्कृते लिखितरूपेण विशालं साहित्यं वरीवर्त्ति। तत्सदृशसाहित्यं विश्वस्य न कस्याञ्चित् भाषायां नास्ति॥

एतैः विचारैः इदं ज्ञायते यत् संस्कृतं पाठ्यक्रमे सर्वस्तरीये अवश्यं प्रावेशनीयमिति।

❑

४. पाठ्यक्रमनिर्माणसिद्धान्ताः

आधुनिकशिक्षणव्यवस्थायां पाठ्यक्रमस्य महत्त्वपूर्णं स्थानं विद्यते। पाठ्यक्रममाधारीकृत्यैव शिक्षकः शिक्षार्थिनां कृते शिक्षणं ददाति। पाठशालायाम्, कस्यचित् सुनिश्चितस्य उद्देश्यस्य प्राप्तये अध्यापकेन, छात्रैश्च क्रियमाणानां समस्तक्रियाकलापानामेव पाठ्यक्रम इति नाम। **कनिंघम्** महोदयः अभिप्रैति यत् शिक्षकः एकः कलाकारः। यदा कलाकारः स्वसाधनैः, स्वसामग्रया अभिलषितं, आदर्शानुरूपं रूपं ददाति, तथैव शिक्षकोऽपि स्वसाधनेन पाठ्यक्रमेण छात्रेभ्यः विद्यालयोद्देश्यानुसारं वाञ्छितं रूपं ददाति इति।

माध्यमिकशिक्षायोगः कथयति यत् विद्यालयस्य सम्पूर्णं जीवनं पाठ्यक्रमः, यः छात्रजीवनं समस्तकोणेभ्यः प्रभावयति। अपि च तेषाम् आदर्शव्यक्तित्वस्य विकासे सहकरोति। यस्याः कस्या अपि भाषायाः शिक्षणस्य चत्वारि कौशलानि भवन्ति। श्रवण-भाषण-पठन-लेखनानि। अध्यापकेन एतेषां विकासः करणीयः। भाषाशिक्षणोद्देश्यानां पूरणं यथा भवति, तथा पाठ्यक्रमस्य निर्मितिः स्यात्।

पाठ्यक्रमनिर्माणेन एतेषां पूर्तिः अवश्यं भवेत्—

(क) १. भाषाप्रकृतेः ज्ञानम्।
 २. अर्थावगमनसामर्थ्यम्।
 ३. अभिव्यक्तीकरणस्य क्षमता।

(ख) देशभक्तानां, महापुरुषाणां जीवनचरित्रस्य पाठनमाध्यमेन छात्रेषु चारित्रिकगुणानां विकासः भवेत्। कथा-गद्य-कविता-जीवनचरित्र-सम्भाषण-निबन्धात्मकानि पाठ्यवस्तूनि पाठ्यपुस्तके स्युः।

(ग) पाठ्यक्रमस्य निर्माणं स्तरानुकूलं भवेत्।

(घ) समसमाजोपयोगिनो विषयाः पाठ्यक्रमे भवेयुः।

अवधेयाः अंशाः—

- पाठ्यक्रमः शिक्षोद्देश्यानाम् अनुकूलो भवेत्।
- छात्राणां स्तरं मनसि निधायैव पाठ्यक्रमः निर्मातव्यः।
- पाठ्यक्रमे मानवस्य यथार्थानुभवानां सन्निवेशः भवेत्।
- पाठ्यक्रमः छात्राणां रुचि-अभिवृत्ति-सामर्थ्य-अपेक्षाणामनुरूपो स्यात्।
- पाठ्यक्रमविषयः, क्रियाः, तासां क्रमश्च उपयोगितानुसारं भवेच्चेद् वरम्।

- पाठ्यक्रमे विद्यमानानां विभिन्नविषयाणां, क्रियाणां च मध्ये परस्परसम्बन्धः अवश्यं स्यात्।
- पाठ्यक्रमनिर्माणावसरे शिक्षायाः दार्शनिक-मनोवैज्ञानिक-वैज्ञानिक-सामाजिक-ऐतिहासिक-आधारेषु ध्यानं दद्यात्।

पाठ्यक्रमः - पाठ्यवस्तु

पाठ्यक्रमः विषयवस्तुनः नियोजितानुभवानां समूहः, येन एकः छात्रः विद्यालयस्य, महाविद्यालयस्य वा निर्देशनेन लभते।

पाठ्यवस्तु इति शब्दस्यायमर्थः यत् एकस्मिन् सम्पूर्णे सत्रे विभिन्नविषयेषु शिक्षकेन छात्रेभ्यः दीयमानं सुनिश्चितं ज्ञानं प्रस्तावयति। अतः एवं वक्तुं शक्नुमः- पाठ्यवस्तु, अध्ययनस्य विषयवस्तुनः मुख्यबिन्दूनां कथनम्, अथवा संक्षिप्तरूपरेखा।

❑

५. पाठ्यक्रमे संस्कृतस्य स्थानम्

संस्कृतम् अत्यन्तविशिष्टा भाषा इति अस्माभिः पठितम्। तर्हि एतस्याः स्थानं वर्तमानशिक्षाप्रणाल्यां, पाठ्यक्रमे वा कीदृशमिति विषयं विचारयामः। अस्मिन् विषये त्रयः विचाराः प्रधानतया दृश्यन्ते।

प्रथमः विचारः

(संस्कृतम् अनावश्यकम्)

केचन शिक्षाशास्त्रविदः चिन्तयन्ति यत् संस्कृतम् पाठ्यक्रमे अनावश्यकम् इति। एते संस्कृतसाहित्यं न पठितवन्तः, काव्यस्य रसास्वादनमपि न कृतवन्तः। एतेषां संस्कृतसाहित्यविषये, भाषाविषये वा किमपि ज्ञानं नास्ति। यदि कश्चन कारणं पृच्छति चेत् तर्हि एतेषां समाधानं वर्तते यत् संस्कृतं सार्वजनीनभाषा नास्ति। सार्वकालीनभाषा अपि नास्ति। इयं भाषा केवलं ब्राह्मणानां विद्यते। प्रायः एते असूयापरकाः कदापि विश्वामित्रः, जाबालिः, सूतः, जनकः इत्यादीनां नामापि न श्रुतवन्तः स्युः।

इयं मृतभाषा इति ये कुविमर्शं कुर्वन्ति, तेभ्यः इदमुत्तरं यत् देशे विविधकोणेषु कोटिशः संख्याकाः छात्राः संस्कृतं पठन्ति इति। एतद्विषयमपि एते न जानन्ति स्म। केरलमध्ये मुसल्मान् जनाः अधिकतया संस्कृतं पठन्ति। किमन्यप्रदेशस्थं वृत्तम् ?

अतः पाठ्यक्रमे संस्कृतम् अनावश्यकमिति ये प्रतिपादयन्ति, ते सर्वे द्वेषादिकुप्रभावैः बद्धाः सन् एवं वदन्ति। ज्ञानलवदुर्विदग्धं जनं ब्रह्मापि न रञ्जयति इति लोकोक्तिः। एतादृशजनानां कृते सम्यक् अवबोधयितुमपि कोऽपि समर्थः न भवति। तथापि संस्कृतमहत्त्वविषये भाषायाः पाठ्यक्रमे स्थानविषये केषाञ्चन महापुरुषाणां विचाराः अत्र प्रस्तूयन्ते।

संस्कृतशिक्षायाः अविलम्बित-अकुण्ठितसमुन्नतिः स्यात् इति वयं सर्वे आशास्महे। न केवलं विद्यापीठेषु, किन्तु नगरे नगरे ग्रामे ग्रामे, खेटे खेटेऽपि संस्कृतभाषा प्रसृता भवेत्। संस्कृतग्रन्थेषु प्रकटीकृतानि अनर्घ्याणि तत्त्वानि केवलं पण्डितानां, विदुषामेव भुक्त्यर्थमेव मा भवन्तु, साधारणजनैरपि तानि लभ्यानि इति श्रीजगन्नाथचरणयोः प्रार्थयामि।

(उत्कलराज्यस्य भूतपूर्वराज्यपालानां श्रीयशोवन्तनारायण-सुखठंकरमहाशयानां भाषणम्)

भौतिक-आध्यात्मिकशिक्षयोः मध्ये कश्चन समन्वयः अत्यावश्यकः अस्ति। एषः समन्वयः संस्कृतशिक्षणेनैव भविष्यति। अन्यत् किमपि कार्यम् संस्कृतशिक्षायाः संरक्षणाय उत्तरदायित्वं न स्वीकरोति। —डॉ. राजेन्द्र प्रसादः

संस्कृतभाषा भारतदेशस्य परम्परायाः, संस्कृतेः, नागरिकतायाः चिह्नम् अस्ति।

—वि. वि. गिरिः

संस्कृतभाषायां या अस्माकं संस्कृतिः सुरक्षिता अस्ति,सा आधुनिकपरिस्थितिषु अप्रासङ्गकी इति वक्तुं कदापि वयं न पारयामः। वेदस्य, बुद्धस्य, अशोकस्य महावीरस्य च विचाराः अस्माभिः अद्यापि स्वीक्रियन्ते। एतेषां माध्यमेन वयं चिन्तयामः यद् भारते वर्गहीनसमाजस्य निर्माणं कर्त्तव्यम्। यत्र स्त्रीपुरुषादिलिङ्गभेदः, जातिभेदः, मतविचारः न भवेत् इति। सर्वत्र समदृष्टिप्रदर्शनाय संस्कृतमस्ति एकमात्र उपायः।

डॉ. सर्वेपल्लि राधाकृष्णन्

संस्कृतं भारतीयशिक्षासम्बद्धभाषा। शिक्षासूत्रान्तर्गता च वर्तते।

—श्री यम्. सि. चाग्ला

संस्कृतसम्बद्धसंस्कतिः न केवलं जीविता, अपि तु सुदृढतया च वर्त्तते।

—सि. वि. रामस्वामि अय्यर्

उपर्युक्तविचाराणां परिशीलनेन इदं स्पष्टतया निश्चित्य वक्तुं शक्नुमः यत् ये संस्कृतशिक्षणस्य आवश्यकता नास्ति इति वदन्ति, ते प्रायः भारतीयसंस्कृतिं न जानन्ति। भारतदेशमपि सम्यक्तया नावगतवन्तः। पाश्चत्यविद्वांसः अपि भारतं समागत्य अत्र संस्कृतं पठन्ति, किमुत भारतीयानां विषये। अधुना नेतारः अपि चिन्तयति, भारतं नाम संस्कृतभारतम् इति। अर्थात् भारतस्य यत् स्वरूपं संस्कृतभाषायां विद्यते तदेव भारतस्य वास्तविकं स्वरूपम् इति।

इदं वयं महता गर्वेण वक्तुं सक्षमाः यद् विदेशेषु भारतस्य यद्गौरवं मिलति तत् सर्वं संस्कृतभाषाकारणतः एवेति। वैदशिका अपि जानन्ति, भारतं नाम संस्कृतम् इति, संस्कृतम् नाम भारतमिति। प्रायः वैदेशिकाः इच्छन्ति, भारतीयाः सर्वे संस्कृतभाषायामेव व्यवहारं कुर्वन्तु इति।

अतः संस्कृतभाषायाः शिक्षणं नितराम् अनावश्यकमिति विचारः न स्वीकरणीयः। न वा पालनीयश्च। भारते संस्कृतभाषाशिक्षणं भवेदेव।

द्वितीयः विचारः

(संस्कृतम् - ऐच्छिकम्)

संस्कृतम् अन्यैः आधुनिकविषयैः सह शिक्षणीयम्। यद्येवं भवति चेत् तदानीम् संस्कृतस्य उपरि अधिकं ध्यानं दातुं न शक्यते। एते संस्कृतम् अनावश्यकमिति न वदन्ति। किन्तु उपेक्षाभावं प्रदर्शयन्ति। संस्कृतं वैकल्पिकरूपेण स्थापयितुम् अभिलषन्ति। अर्थात् येषां संस्कृतपठने रुचिः अस्ति, ते संस्कृतं पठन्ति, येषां नास्ति, ते न पठन्ति। अनेन किम् भवतीत्युक्ते संस्कृतं यत्र यत्र पाठ्यते, तत्र तत्र एव भवति। संस्कृतभाषायाः व्याप्तिः न भवति। अन्यभाषाजनाः ये सन्ति, ते संस्कृतस्योपरि दुष्प्रचारं

कुर्वन्ति। संस्कृतविषये न जानन्ति, तर्हि कथं पठितुम् अग्रे आगच्छन्ति। अन्यः विचारणीयः विषयः यत् भारतसर्वकारः यदा संस्कृतायोगस्य नियुक्तिम् अकरोत्, तदानीं तस्य आयोगस्य अध्यक्षः डॉ. सुनीति कुमार चटर्जी महोदयः तमिलनाडुराज्यं गतवन्तः, तदा तत्रत्याः उक्तवन्तः यदि प्रतिदिनं संस्कृतभाषायां प्रार्थनां कुर्मः, तदा अन्ये चिन्तयन्ति, एषः विद्यालयः एकस्यैव वर्गस्य कृते एव भवति इति। एवं प्रकारेण जनानां मनः संस्कृतविरुद्धभावपूर्णं भवति, तदानीमपि अस्माभिः तूष्णीमेव स्थातव्यं वा ?

वस्तुतः संस्कृतभाषा भारतीयानां जीवनभाषा अस्ति। संस्कृतभाषामन्तरा काऽपि भाषा न केवलं समृद्धा भवति अपि तु जीवितुमेव शक्नुयात्। तथा संस्कृतभाषां विना कोऽपि भारतीयो यथार्थभारतीयो भवितुं न अर्हति। यदि कश्चन जनः भारतीयसंस्कृतिं प्रति श्रद्धां, राष्ट्रियैकतां प्रति निष्ठां च प्रदर्शयति, तर्हि संस्कृतेः संरक्षणं कर्तुं पारयामः. केचन एवं चिन्तयन्ति, यथा भारते संस्कृतं तथा पश्चिमदेशेषु ग्रीक्, लाटिन् भाषे स्तः। परं ते भाषे आधुनिकजीवनतः निर्गते। संस्कृत तथा नास्ति, अद्यापि देशे सर्वत्र प्रचलन्ती अस्ति। छात्राः पठन्ति। सभासु उपयुज्यते। काव्यानि लिखन्ति। पण्डितानां माध्यमभाषारूपेण संस्कृतमेव अस्ति।

भूतपूर्वप्रधानमन्त्री मोरार्जी देशाय् वदति स्म-यद्यपि विज्ञानेन देशस्य अत्युन्नतस्थितिः भविष्यति, तेन मानवस्य ज्ञानाभिवृद्धिः भवति। एतस्य ज्ञानस्य उपयोगः बुद्धिबलेन करणीयः। भारतीयानां बुद्धिकुशलता साहित्यपठनादेव भवति। साहित्यं सर्वं संस्कृतभाषायामेव वर्तते। अतः अस्याः भाषायाः अध्ययनं करणीयमेवेति।

अपि चोच्यते—भारतं-संस्कृतम् = India इति।

तृतीयः विचारः

(संस्कृतम् अनिवार्यम्)

संस्कृतस्य अध्ययनविषये भारतसर्वकारेण एका समितिः घटिता। तस्याः एव नाम संस्कृतायोगः। अस्य आयोगस्य अध्यक्षः डॉ. सुनीतिकुमार चटर्जी। संस्कृतभाषायाः महत्त्वदृष्ट्या अस्याः स्थानं पाठ्यक्रमे अनिवार्यतया भवेत् इति अनेन आयोगेन प्रस्तावः दत्तः। तदर्थं त्रिभाषासूत्रस्य परिवर्तनं करणीयमस्ति। अस्मिन् विषये चत्वारः अंशाः एवं प्रस्ताविताः। यथा—

(क) मातृभाषा, अथवा प्रान्तीयभाषा।
आङ्गलम् अथवा हिन्दी।
संस्कृतम्।

(ख) मातृभाषा अथवा क्षेत्रीयभाषा।
आङ्गलम्।
हिन्दी।
संस्कृतम्।

(ग) ''ख'' योजना इव भवति। परं संस्कृतस्य कृते परीक्षा न भवति। परीक्षाफले अपि संस्कृतस्य प्रभावः न पतति। किन्तु छात्रवृत्तये संस्कृतस्य अङ्कानां गणना क्रियते। परम् आयोगेन एषः प्रस्तावः तिरस्कृतः।

(घ) द्वितीययोजनायाम्, उल्लिखितासु त्रिभाषासु संस्कृतम् अङ्गभूततया, अनिवार्यतया पठनीयम्। अर्थात् संयुक्तभाषारूपेण। एवं प्रकारेण संस्कृतशिक्षणं न्यूनातिन्यूनं पञ्चवर्षं भवेत्।

संस्कृतायोगेन या प्रथमयोजना अस्ति सा सर्वोत्तमा इति निश्चिता।

❑

६. भाषाकौशलानि

श्रवणम् (Listening)

या काऽपि भाषा भवतु, तस्याः अभ्यासे अनुकरणम् अधिकतया सहकरोति भाषायाः अभ्यासाय, प्रथमम् अन्याननुकुर्यात्। एवमनुकरणमपि अत्यन्तश्रद्धया अवधानेन च करणीयम्। सम्यक् श्रवणेनैव सम्यक् अनुकरणं भवति। अथ भाषाशिक्षणविषये प्राथमिकं कार्यं भवति–श्रवणम् भाषायाः प्राथमिकं प्रयोजनं भावविनिमय एव। एषः भावविनिमयः अत्यन्तनैपुण्येन करणीयः। अतः श्रवण प्रथमं भाषाकौशलं भवति। एवमेव क्रमशः भाषणं, पठनं, लेखनमिति भाषाकौशलानि सन्ति। परं श्रवणकौशलमेव अन्येषां त्रयाणां कौशलानां मूलाधारः। भावविनिमये अंशद्वयं विद्यते। भावग्रहणम्, भावप्रकटनञ्च। भावग्रहणे श्रवणं, पठनञ्चान्तर्भवतः भावप्रकटने च भाषणं, लेखनञ्च भवतः।

बालकः शब्दान् श्रृणोति। बुद्धौ स्थापयति। ध्वनेरनुकरणं करोति शब्दानामुच्चारणं करोति। भाषाया अभ्यासं करोति। भाषायां व्यवहरति। चतुर्विध-भाषाकौशलानि श्रवणकौशले एव आधारितानि भवन्ति। श्रवणशक्तेः पटुत्वेन भावं स्पष्टतया ग्रहीतुं शक्यते। यदि भावसङ्ग्रहणं सम्यक् भवति चेत् पठनलेखने निर्दुष्टे भवतः। अतः सम्यक् श्रवणं–समीचीनभाषणे, निर्दुष्टपठने, उत्तमलेखने च उपकरोति।

श्रवणकौशलसम्पादनोपायाः

- अन्ये यदा भाषन्ते, तदा सावधानेन ध्वनीनां श्रवणं करणीयम्।
  अर्थात् ते कथमुच्चरन्तीति श्रोतव्यम्।
- ध्वनीन् सम्यक् श्रुत्वा पुनः स्पष्टं वक्तव्यम्।
- विभिन्नध्वनीनाम् उच्चारणसमये ते ध्वनयः कथं निस्सरन्तीति ज्ञातव्यम्।
- वादविवादसमये, कोलाहलसमयेऽपि अपेक्षितानां ध्वनीनां श्रवणं करणीयम्।
- कथनम् अतिशीघ्रम्, वा अतिमन्दं वा भवतु, सावधानेन श्रवणं कार्यम्।
- ह्रस्व–दीर्घ–प्लुतस्वरान् अभिज्ञाय कथनस्य अन्तरार्थं ज्ञातव्यम्।

श्रवणकौशलस्य साधनानि

- गुरुमुखम्
- परिवारसदस्याः
- आकाशवाणी

- दूरवाणी
- दूरदर्शिनी
- ध्वनिमुद्रणयन्त्रम्
- संगणकयन्त्रम्
- ध्वनिविस्तारकयन्त्रम्
- सान्द्रध्वनिमुद्रिकायन्त्रम्।

श्रवणकौशलस्य आवश्यकता

१. शब्दानां साधूच्चारणाय।

२. श्रुत्वा पुनः कथनाय।

३. शब्दानाम् अर्थाभिव्यञ्जनाय।

४. अनुवाचनाय।

५. शब्दस्य प्रत्यभिज्ञानाय।

६. अनुप्रयोगसामर्थ्यसम्पादनाय।

७. मनोरञ्जनाय।

८. भाषणसामर्थ्यसमुपार्जनाय।

श्रवणकौशलसम्पादनविधयः

अध्यापकः श्रवणकौशलसम्पादनाय यं कमपि कार्यं स्वीकरोति, तत् छात्राणां वयसः, मानसिकस्तरस्य च अनुरूपं भवेत्।

प्राथमिकस्तरे—एतेषु श्रवणकौशलवर्धनाय शिशुगीतानि, बालगीतानि, अभिनयगीतानि, श्रावणीयानि। अपि च हास्य-वीर-अद्भुतरसात्मकाः कथाश्च कथनीयाः। छात्रान् वृत्ताकारे उपावेश्य "**कर्णे वचनमिति**" क्रीडापि क्रीडयितुं शक्नोति। छात्राणां भाषणमपि ध्वनिमुद्रणयन्त्रेण मुद्राप्य श्रावयितुं शक्नोति, येन बालकाः प्रभाविताः, अभिप्रेरिताश्च भवन्ति। अपि च स्वकीयदोषान्, उच्चारणपद्धतिं च स्वयं जानन्ति।

माध्यमिकस्तरे—श्रवणकौशलसम्पादकाः पदक्रीडाः अस्मिन् स्तरे भवन्तु। करुण-वीर-हास्यरसोपेताः कथाः श्रावयितुं शक्नोति, अध्यापकः। छात्राः अपि एतादृशकथाः संगृह्य, कक्षायां यथा वदेयुः तथा अध्यापकेन प्रेरयितव्याः। पाठ्यपुस्तके विद्यमानान् पाठ्यांशान् यदि तैः प्रकाशपठनं कारयति, तदा अन्ये छात्राः श्रवणकौशलं सम्पादयन्ति। अध्यापकस्य आदर्शवाचनेन छात्राणां कृते सुवाचनस्य आदर्शप्रस्तुतीकरणं भवति। अनुवाचनाय प्रेरिताः च भवन्ति। केषाञ्चन छात्राणाम् आदर्शवाचनेन अन्ये छात्राः सम्यक् प्रभाविता भवन्ति।

एवमेव आकाशवाण्यां, दूरदर्शिन्यां च ये पाठाः प्रसारयन्ति, तेषां पाठानां श्रवणेनापि छात्राः सम्यक् श्रवणकौशलं सम्पादयन्ति। एतदर्थम् अध्यापकेन अपेक्षिता व्यवस्था विधेया। तत्र तैस्साकं स्थित्वा तस्मिन् कार्यक्रमे भागग्राही भविता। कार्यक्रमस्य अन्ते अध्यापकः प्रसारितं पाठमधिकृत्य छात्रैः सह कक्ष्यायां चर्चा करणीया। ये छात्राः ध्वन्यनुकरणं जानन्ति, तैः प्रसिद्धपुरुषाणां भाषणस्य अनुकरणं कारयित्वा कक्षायां श्रावयति चेत् महान् प्रभावः पतति। संवादात्मकपाठानाम् अभिनयपूर्वकवाचनमपि श्रवणकौशलसम्पादने महदुपकारकं भवति।

उच्चस्तरे—नवरसोपेतानां गीतानां, कथानां, श्लोकानां च श्रवणं कारणीयम्। सारस्वतसभासु, कविसम्मेलनेषु, चर्चायां, संगोष्ठीषु, कार्यशालासु च यथा भागग्रहिणो भवन्ति, तथा तेभ्यः अभिप्रेरणं दातव्यम्।

भाषणम् (Speaking)

वाग्रूपं भावप्रकटमेव भाषणम् इति कथ्यते। भाषणं विना व्यक्तिषु परस्परं भावविनिमयो न भवति। यदि भावविनिमयः एव नास्ति, तर्हि समाजः पुरोगतिं न प्राप्नोति। पठनं, लेखनं च विहायापि निरक्षराः भाषणेनैव स्वकार्याणि साधयन्ति किल। अतः जीवने भाषणम् प्रधानम्।

भाषणमेतत् द्वाभ्यां साधनाभ्यां सिद्ध्यति। १. अनुकरणम्। २. अभ्यासः। भाषणं जन्मजातकौशलं नास्ति। शिशोः भाषणशक्तिः वंशानुगता न भवति। परिसरप्रभावेण, आधारेण वा भाषणशक्तिः जायते, वर्धते च।

भाषणे मुख्यम् उच्चारणम्। भावप्रकटने साधूच्चारणं प्रधानं साधनं भवति। अतः छात्रेभ्यः बाल्यादेव भाषणकौशलसम्पादनाय अपेक्षितं शिक्षणं शिक्षकेण दातव्यम्। तदर्थं तेषु शब्दभण्डारस्य वृद्धिः करणीया। निर्दुष्टोच्चारणं, स्वच्छभाषणं च भाषणस्य सामान्योद्देश्यम्। अनर्गलं, मनोरञ्जकं च भाषणकौशलं तु भाषणस्य परमं प्रयोजनम्।

भाषणकौशलस्य आवश्यकता

१. भावग्रहणाय
२. भावव्यक्तीकरणाय
३. सम्यक् उच्चारणसामर्थ्यसम्पादनाय
४. भाषायाः उद्दीपनप्रयोजनसाधनाय
५. प्राचीनभारतीयविद्यास्वरूपज्ञानाय
६. विविधसभासु सक्रियभागग्रहणाय

प्राथमिकदेशायां भाषणकौशलसम्पादनाय अध्यापकेन महान् परिश्रमः करणीयः। यदा बालकाः पाठशालां प्रविशन्ति तदा तेषु भयं, सङ्कोचः इत्यादयः संवेगाः भवन्ति। अध्यापकः वैयक्तिकावधानं दत्त्वा तान् तेभ्यः संवेगेभ्यः दूरीकुर्यात्। ततः शिशुगीतानि,

अभिनयगीतानि, कथाकथनं, भाषाक्रीडाः इत्यादिषु अंशेषु भागग्रहणे प्रोत्साहः दातव्यः। प्रायः संस्कृतस्य कृते षष्ठकक्षा आरम्भकक्षा भवति, तत्र लघुसंस्कृतवाक्यानां भाषणाभ्यासः करणीयः। यदा गीतानाम् अभ्याससमये प्रथमं द्विवारं, त्रिवारं वा स्वयं तद्गानं गेयम्।

- ततः छात्रान् अनुगाने, सहगाने वा प्रोत्साहयेत्।
- छात्रान् लघुलघुसमूहरूपेण विभज्य, तस्मिन् समूहे यः सम्यक् गायति सः गायति। तथा प्रेरणा देया। अन्ये तमनुकृत्य गायन्ति।
- अन्ते प्रत्येकोऽपि छात्रः गीतं गायति।

भाषणप्रयोजनानि

- उच्चारणं स्पष्टं, निर्दुष्टं च भवति।
- छात्रेषु एकताभावः वर्धते।
- मनोरञ्जनं भवति।
- शब्दभण्डारस्य वृद्धिः भवति।
- सोत्साहं विद्यालयमागच्छन्ति।

अध्यापकेन अभिनयगीतानि, जन्मदिनगीतानि, शिशुगीतानि संग्रहणीयानि। यदि शक्येत चेत् ध्वनिमुद्रिकाद्वारा छात्रेभ्यः श्रावणीयानि। तेन सम्यक्तया भाषणकौशलस्य अभ्यासः भवति।

उदा-शिशुगीतम्—

मम माता देवता।
मम माता देवता॥
अतिसरला, मयि मृदुला
गृहकुशला, सा अतुला। ॥ मम माता ॥
पाययति दुग्धं, भोजयति भक्तं
लालयति नित्यं, तोषयति चित्तम् ॥ मम माता ॥
सायङ्काले नीराजयति
पाठयति च मां शुभङ्करोति

श्लो. शुभं कुरु त्वं कल्याणम्
आरोग्यं धनसम्पदः
दुष्टबुद्धिविनाशाय
दीपज्योतिर्नमोऽस्तु ते

पाठयति च मां शुभङ्करोति ॥ मम माता ॥
रात्रौ अङ्के मां स्वापयति
मधु-मधु मधुरं गीतं गायति
आ आ आ आऽऽ... ॥ मम माता ॥

(गीतस्य रचयिता श्री ल.म. चक्रदेवः गीतमिदं गीतसंस्कृतम्-संस्कृतभारतीतः उद्धृतम्)

अभिनयगीतम्

ज्ञानिन् ज्ञानिन् आम् तात।
अत्सि शर्करा ? नो तात॥
वदसि असत्यं ? नो तात।
वदनं दर्शय! हः हः हा॥
त्वं किल त्वं किल ललितस्तार।
आहश्चार्थं के यूयम्।
धरातलोपरि भासन्तो।
मन्ये ननु दिनमणयस्ते॥

कथाकथनम् (Story Telling)

कथासु छात्राणां विशेषादरः भवति। कथायां रुचिसम्पादनाय अध्यापकस्य कथनकौशलं बहु अपेक्षते। चित्राणां माध्यमेन कथां यदि श्रावयति तर्हि इतोऽपि वरम्। कथायां भाषा सरला, बोधगम्या च भवेत्।

कथाप्रकाराः—

पशुपक्ष्यादिकथाः
नीतिकथाः
पौराणिककथाः
अद्भुतकथाः
साहसिककथाः
यात्राकथाः
वीरकथाः
पञ्चतन्त्रकथाः

कथाकथने अवधेयाः अंशाः—

- कथाकथने प्रत्यक्षवाक्यानि भवेयुः। तदानीं छात्राः कथायाम् अन्तर्लीना भूत्वा आनन्दं प्राप्नुयुः।
- पुस्तकं दृष्ट्वा कथाकथनं समीचीनं न भवति।
- कथाकथनसमये वाचिकाभिनयस्य अधिकं प्राधान्यं दद्यात्।

- छात्राः कथां सावधानेन शृण्वन्ति न वेति परिशीलनीयम्।
- कथायाः प्रारम्भे अन्ते च उत्सुकतोत्पादकानि वाक्यानि वक्तव्यानि।
- चित्राणि दर्शयित्वा कथां कथयति चेत् वरम्। प्रभावोत्पादकं च स्यात्।
- तत्प्रभावेण पुनः छात्राः कथां स्वयं वक्तुं प्रयतन्ते। तदर्थम् अध्यापकः तान् प्रेरयेत्।
- उक्तकथायां प्रश्नान् पृष्ट्वा भाषणाभ्यासं कर्तुं शक्नोति।
- अन्ते कथायां नीतिं स्पष्टं कथयेत्। तेन तां नीतिं स्वजीवने पालनाय यतेयुः। उदा—

वञ्चना

एकदा नारयणः नामको बालकः कूपस्य समीपे त्रिचतुरैः बालकैः सह क्रीडति स्म। तस्मिन् समये प्रसिद्धः कश्चित् चोरः तं प्रदेशमागच्छत्। आगच्छन्तं तमवलोक्य नारायणः यद्यपि भीतः तथापि बुद्धिबलेन तं वञ्चयितुम् अमन्यत। तदा सः पार्श्वे स्थिते कूपे पुनः पुनः पश्यन् रुदति। तस्करः तत्रागत्य बालकं रोदनकारणम् अपृच्छत्। तदा बालः एवमकथयत्—

अयि भोः, मदीयम् अङ्गुलीयकम् एकः बालः अस्मिन् कूपे अपातयत्। अङ्गुलीयकं विना गृहं गच्छामि चेत् मे पिता मां ताडयिष्यति। किं करोमि ? को वा अस्मिन् कूपे अवतीर्य अङ्गुलीयकम् अन्विष्य प्रयच्छसि तर्हि मम मातापितृभ्यां ते महत्पारितोषिकं दापयेयम् इति।

तदाकर्ण्य मूढः सः तस्करः यथाकथञ्चित् अङ्गुलीयकं हरिष्यामि इति सन्तुष्य स्ववस्त्राण्यपनीय, एकत्र निक्षिप्य केवलं वस्त्रखण्डं धृत्वा कूपे अवततार। उत्तरक्षणे एव नारायणः चोरस्य वस्त्राण्यपहृत्य गृहं प्रति अधावत्।

तस्करस्तु कूपे बहुकालम् अन्विष्य अङ्गुलीयकम् अलभमानः निराशया कूपात् बहिरागत्य स्ववस्त्राणि, बालकं वा नापश्यत्। एवं बालकेन वञ्चितः सः विस्मितः लज्जितश्च अभवत्।

वञ्चकोऽपि कदाचित् वञ्च्यते खलु।

शठे शाठ्यं समाचरेत्।

अभ्यासः

प्रश्नाः—

१. नारायणः कुत्र क्रीडति स्म ?

२. नारायणः कुतः भीतः ?

३. चोरः नारायणं किमपृच्छत् ?

४. नारायण: रोदनकारणं किमित्यकथयत् ?

५. तस्कर: किं कृत्वा कूपे अवातरत् ?

६. कूपे चोरस्य अवतरणानन्तरं नारायण: किमकरोत् ?

७. तस्कर: किमर्थं विस्मित: ?

८. अनया कथया का नीति: ज्ञायते ?

९. कथाया: साराशं संस्कृते स्ववाक्येषु लिखत ?

१०. पाठे विद्यमाना: असमापकक्रिया: अन्विष्य लेखनीया: ?

लाभा:—

- साधूच्चारणस्य अभ्यास: भवति।
- भावाभिव्यक्तीकरणं सम्यक् कर्त्तुं सक्षम: भवति।
- शब्दभण्डार: वर्धते।
- सर्वेषां पुरत: धैर्येण वक्तुम् अभ्यास: भवति।
- आत्मविश्वास: जायते।
- वर्णन-सर्जन-कल्पनाशक्तय: एधन्ते।
- पठनासक्ति: उद्भवति।

एवमेव अध्यापक: चित्ररामायणं, चित्रभारतं, चित्रपञ्चतन्त्रं प्रभृतीन् विषयान् कथाकथनाय उपयोक्तुं प्रभवति।

भाषाक्रीडा: (Language games)

प्राय: छात्राणां क्रीडासु रक्ति: भवति। बालस्तावत् क्रीडासक्त: किल। भाषाकृत्यानि क्रीडारूपेण पाठयति चेत् भाषाक्रीडा: भवन्ति।

(अ) पदक्रीडा—कक्षायां प्रथमम् एक: छात्र: एकं पदं वदति। अन्य:, तस्य पदस्य अन्तिमाक्षरमाश्रित्य एकं पदं वदति। पुन: तस्य पदस्य अन्तिमाक्षरमाधृत्य अन्यं पदं वदति। अस्यैव नाम पदान्त्याक्षरी। यथा—राम:, मारुत:, तरु:, राधा, धाता, तात:, तपस्वी, स्वीकृति:, तितिक्षा, क्षेम:, मङ्गलं, लाभ:, भरत:, तनव: वसुदेव: .... एवं प्रकारेण क्रीडा चलति। कक्षायां सर्वे छात्रा: क्रीडायां यथा सक्रिया: भवेयु: तथा प्रयतेत् अध्यापक:।

(आ) अन्तिमाक्षरसमक्रीडा—यथा—राम:, सोम:, भीम:, श्याम: ....।

(इ) क्रियापदक्रीडा—गच्छति, पिबति, क्रीडति, लिखति ... .। एवम् विविधलकाराणाम् अभ्यासं कारयितुं प्रभवति।

(ई) संख्यावाचकपदक्रीडा—छात्राः एकैकशः क्रमशः संख्याः वदन्ति। एवम्-एकं, द्वे, त्रीणि, चत्वारि, ... ।

एकं, त्रीणि, पञ्च, सप्त, नव, ... ।

त्रीणि, षट्, नव, द्वादश इत्यादिषु एवम् अनुक्त्वा, केवलं रामः इति वक्तव्यम्। यदि अस्मिन् क्रमे राम इति स्थाने संख्यां वदति, तर्हि सः क्रीडातः बहिः प्रेषयति। यथा—एकं, द्वे, रामः, चत्वारि, पञ्च, रामः, सप्त, अष्टौ, रामः दश .... ।

(उ) व्यतिरेकपदक्रीडा—एक छात्रः एकं पदं वदति। अन्यः छात्रः तस्य विपरीतपदं वदति। यथा—

सत्यम् - असत्यम्	अन्धकारः - प्रकाशः
दीर्घः - ह्रस्वः	दृढः - दुर्बलः
मन्दम् - तीव्रम् .... ।	

एवं बहुविधाः भाषाक्रीडाः भवन्ति। अध्यापकः सम्यग्विचिन्त्य नूतनक्रीडाः आविष्कुर्यात्। एताभिः भाषाक्रीडाभिः छात्रेषु भाषणशक्त्या सह विज्ञानं, विनोदं च वर्धेते।

प्रहेलिकाः

छात्राणां मनोविनोदाय, तर्कशक्तेः वर्धनाय च प्रहेलिकाः बहूपकुर्वन्ति। अध्यापकः प्रहेलिकानामुत्तराणि कदाचित् चित्रमाध्यमेनापि दर्शयितुं पारयति। संस्कृतभाषायाम् अभिरुचिसम्पादनेऽपि प्रहेलिकाः सहकुर्वन्ति। अतः अध्यापकोऽपि सम्यक् प्रहेलिकाः संकलय्य कक्ष्यायां गच्छति चेत् तस्य शिक्षणम् सफलं भविष्यति। कानिचन उदाहरणानि प्रस्तूयन्ते—

एकचक्षुः न काकोऽयं बिलमिच्छत्यहिर्नहि।
क्षीयते वर्धते चैव न समुद्रो न चन्द्रमाः॥ **(सूची)**

कुलालस्य गृहेऽप्यर्थं तदर्थं हस्तिनापुरे।
लङ्कायामपि तद्युग्मं यो जानाति स पण्डितः॥ **(कुम्भकर्णः)**

अस्ति कुक्षिः शिरो नास्ति बाहुरस्ति निरङ्गुलिः।
निर्जीवश्च निराधारो नित्यं पुरुषभक्षकः॥ **(युतकम्)**

अपदो दूरगामी च साक्षरो न च पण्डितः।
अमुखः स्फुटवक्ता च यो जानाति स पण्डितः॥ **(समपत्रम्)**

वृक्षाग्रवासी न च पक्षिराजः त्रिनेत्रधारी न च शूलपाणिः।
त्वग्वस्त्रधारी न च सिद्धयोगी जलं न बिभ्रन्न घटो न मेघः॥ **(नारिकेलः)**

नाटकीकरणम् (Dramatisation)

छात्राणां पाठ्यपुस्तकेषु केचन सम्भाषणात्मकाः पाठाः भवन्ति। तान् पाठान् अध्यापकः छात्रैः नाटकीकरणेन प्रदर्शयितुं शक्नोति। नाटकीकरणं, छात्राणां भाषणशक्तिं, सम्भाषणकौशलं च वर्धयति। छात्राः स्पष्टं, सार्थकं, मनोरञ्जकं च भाषणं कर्तुं पारयन्ति। परस्परसहयोगभावः एधते। यथा—

विजयदशमी

इन्दिरा – रघो! शीघ्रमुत्तिष्ठ।

रघुः – मातः! अद्य विजयदशमी खलु। कुत्र मदीयानि नूतनवस्त्राणि ?

इन्दिरा – प्रबुद्ध एव नूतनवस्त्राणि पृच्छसि। एतदसाम्प्रतम्।

रघुः – तथा चेत् किं साम्प्रतम् ?

इन्दिरा – वत्स! प्रथमं दन्तधावनादिक्रियाः निर्वर्तय।

रघुः – तदा नूतनवस्त्राणि दास्यसि वा ?

इन्दिरा – नहि, नहि, ततः अभ्यङ्गस्नानं, तदनन्तरं नूतनवस्त्राणि धृत्वा देवान्, गुरूंश्च अभिवादय। पीठे पुस्तकानि निधाय सरस्वतीपूजां कुरु।

एवं प्रकारेण पाठः भवति चेत् एकः रघुरूपेण, अन्या बालिका मातृरूपेण पात्रधारणं विधाय नाटकीकरणं कुर्वन्ति। तदर्थम् अध्यापकेन प्रोत्साहः दातव्यः॥

भाषणस्पर्धा (Elocution)

पूर्वं प्रदत्तं विषयमाधृत्य द्वित्राः निमेषाः सङ्कोचं विना स्ववाक्येषु भाषणं दीयते चेत् तद् भवति उक्तरचनम्। प्राथमिकदशायां धाराप्रवाहरूपेण वक्तुं न पारयन्ति। माध्यमिकस्तरे अध्यापकः अस्मिन् विषये शिक्षणं दातुं शक्नोति। छात्राणामभिरुचिं, सामर्थ्यं च मनसि निधाय वक्तव्यांशः प्रदातव्यः। कक्षास्तरानुसारम् आधुनिककालसम्बद्धः कश्चन अंशः प्रदेयः।

लाभाः—

- विषयव्यक्तीकरणं कस्मिंश्चित् क्रमे भवति।
- श्रेष्ठवक्तारः भवन्ति।
- वादपटुतायाः अभ्यासः भवति।
- नायकलक्षणानां वृद्धिः भवति।

सारस्वतसभाः (Literary Meetings)

विद्यालये अभ्यस्तविषयेषु, वर्तमानसामाजिकांशेषु, पाठ्य-पाठ्येतरसम्बद्धेषु, साहित्यविषयेषु एवं छात्राणां स्तरानुकूलं व्याख्यानानि गोष्ठीः, कविसम्मेलनानि

पाठशालायाम् आयोजनीयानि। तत्तत्क्षेत्रेषु प्रसिद्धान् पण्डितान् आहूय तेषां कार्यक्रमाणाम् आयोजनं कार्यम्।

लाभाः—

- भावानुकूलव्यक्तीकरणस्य अभ्यासः भवति।
- विविधकविशैलीभेदान् ज्ञातुं प्रभवन्ति।
- सम्भाषण-वर्णन-विश्लेषणरीतीनां परिचयः भवति।
- सर्जनात्मकशक्तेः वृद्धिः भवति।

पठनम् (Reading)

पठ - व्यक्तायां वाचि इत्यस्मात् धातोः निष्पन्नस्य **पठन** इति शब्दस्य अर्थग्रहणपूर्वकं स्पष्टरूपं वाचनम् इत्यर्थः। अर्थात् लिखितरूपे विद्यमानम् अंशं मनसि, प्रकाशे वा पठित्वा तद्गतभावग्रहणमेव पठनमित्युच्यते। अयं सामान्यार्थः। दिन-सप्ताह-पत्रिकाः वयं पठामः। तथैव काव्येतिहासान्, पाठ्यांशान् वा पठामः। उत्तमश्रवणम्, उत्तमभाषणम्, उत्तमपठनाय आधारः भवति। भाषणे अर्थमनुसृत्य शब्दः अन्विष्यते। परं पठने प्रथमं शब्दः, तस्मात् अर्थः अन्वेष्यः भवति। उत्तररामचरिते—

लौकिकानां हि साधूनामर्थं वागनुवर्त्तते।

ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति॥

छात्राः श्रवणापेक्षया, पठनेन अधिकज्ञानं समुपार्जयन्ति। अस्य लिपिबद्धध्वनिरूपं मूलाधारं भवति।

उद्देश्यानि

प्राथमिकस्तरे—

- पठने क्रमोच्चारणसामर्थ्यसम्पादनम्।
- अवगमनपूर्वकपठनकौशलसम्पादनम्।
- गति-लयपुरस्सरं पठनाय अवसरप्रदानम्।

माध्यमिकस्तरे—

- समगत्या पठने क्षमतासम्पादनम्।
- वाचकाभिनयेन सह पठनस्य अभ्यासप्रदानम्।
- भावानुकूलं शब्दान्, वाक्यानि विभज्य पठने कौशलसम्पादनम्।
- विविधशैलीनां पठने क्षमतोत्पादनम्।

उच्चस्तरे—

- आनन्दानुभूत्या सह पठने अभ्यासः।
- स्वीयशैलीमाध्यमेन पठने सामर्थ्यसम्पादनम्॥

- कविहृदयज्ञानप्रदानम्।
- विरामकालस्य सद्विनियोगः।
- विमर्शनशक्तेः विकासः।
- सर्जनात्मकशक्तेः वर्धनम्।

पठनप्रकाराः—

१. बाह्यपठनम् २. मौनपठनम् ३. क्षुण्णपठनम् ४. विस्तारपठनम्

- विशिष्टव्यक्तिनिर्माणं भवति।
- विस्तृतज्ञानसम्पादनं भवति।
- व्यवहारदक्षतायाः प्राप्तिः सिद्ध्यति।
- भाषणे साधूच्चारणं प्राप्नोति।
- रचनाकौशलं ददाति।
- ग्रन्थपठनसमये विषयज्ञानं सम्पादयति।
- साहित्ये अभिलाषां जनयति।

बोधनपद्धतयः

१. **अक्षरपद्धतिः**—अस्यैव वर्णसमाम्नायपद्धतिरिति नाम वर्तते। इयं प्राचीनपद्धतिः। अत्र वर्णः प्रधानः भवति। वर्णं प्रातिपदिकतया स्वीकृत्य वर्णमालायां विद्यमानानाम् अक्षराणां सर्वेषां पठने क्रमेण बोधनं भवति। ततः द्वित्वाक्षराणि संयुक्ताक्षराणि। ततः वर्त्तन्यः। अनन्तरं पदानि। ततो वाक्यानि। एवं पद्धतिरियं वर्णात् पदं, पदात् वाक्यमिति क्रमेण पठनं भवति। किन्तु पद्धतिरियं मनोवैज्ञानिकनियमानां प्रतिकूला वर्त्तते।

२. **पदपद्धतिः**—पदानि आधारीकृत्य छात्रैः दृष्ट्वा पठनमिति प्रक्रिया अत्र प्रचलति। चित्राणां माध्यमेन अपरिचितशब्दानामर्थावबोधनं विधीयते। चित्राणि दृष्ट्वा पदानि पठित्वा, पदेषु विद्यमानानि अक्षराणि अभिजानन्ति। अनन्तरं पठन्ति। स्फोरकपत्रे चित्रं, तत्सम्बद्धपदं लिखित्वा कक्षायाम् अभ्यासः करणीयः। एतत् प्रथमस्फोरकपत्रे एवं भवतु। द्वितीयस्फोरकपत्रे एकस्मिन् पार्श्वे चित्रं, परस्मिन् पार्श्वे पदं च लेखापयित्वा अभ्यासं कारयति। तृतीयपत्रे एकस्मिन् पार्श्वे चित्रं, परस्मिन् किमपि न स्थापनीयम्। चतुर्थपत्रे एकस्मिन् पार्श्वे पदं, द्वितीयपार्श्वे किमपि न लेखनीयम्। पात्राणां क्रमानुसारं पठनाभ्यासः अध्यापकेन कर्तुं योग्यम्।

३. **वाक्यपद्धतिः**—अस्यां पद्धत्यां पठनकौशलशिक्षणाय वाक्यानि आधाररूपेण स्वीक्रियन्ते। पठनार्थं चितानि वाक्यानि छात्राणां पूर्वपरिचितानि स्युः। यथा—

अहं विद्यालयं गच्छामि। रामः गुरुं नमति।

तेजस्वी श्लोकं वदति। आचार्यः मन्त्रम् उपदिशति।

अत्रापि पदपद्धतौ इव वाक्याभिज्ञानपत्रम्, स्वयं संशोधनपत्रम्, योजनपत्रद्वयम् इति चतुर्विधपत्राणि भवन्ति। पत्राणां निर्वहणमपि पदपद्धतौ इव भवति।

४. कथापद्धतिः—परिचितां कथामाश्रित्य छात्राः दशवाक्यानि तत्रापि लघुलघुवाक्यानि सिद्धीकुर्वन्ति। एकैकस्य वाक्यस्य आधारेण एकैकं चित्रं निर्माति। तत्तच्चित्रस्य अधः तत्सम्बद्धवाक्यं स्पष्टतया लेखनीयम्। अस्यैव कथाभिज्ञानपत्रमिति नाम। कथाचित्राणां माध्यमेन छात्रैः कथांशः पाठनीयः। अत्र कथाचित्राण्येव आधारभूतानि भवेयुः। कथापठने वाक्यानि, वाक्यगतपदानि, पदगतानि अक्षराणि अवश्यं यथा अभिज्ञाय पठन्ति, तथा अध्यापकः प्रयतेत्। यथा—

सूर्यः—

१. सूर्यः गोलाकारेण वर्त्तते।

२. सूर्यः प्रातः पूर्वदिशायाम् उदेति।

३. सूर्यः उदये, अस्तमये च रक्तवर्णः भवति।

४. सूर्यस्य परिभ्रमणेन ऋतुपरिवर्त्तनं भवति।

५. सूर्येण कालज्ञानं जायते।

६. सूर्यकिरणैः पुष्पाणि विकसन्ति।

७. सस्यानि वर्धन्ते।

८. सूर्यः आरोग्यं ददाति।

९. सूर्यः प्रत्यक्षदैवं वर्त्तते।

१०. उदये अस्तमये च जनाः सूर्यं प्रणमन्ति।

पठनकौशलसम्पादनाय पदपद्धतिरेव अत्युत्तमा इति विमर्शकाणामभिप्रायः। ततः वाक्यपद्धतिः, कथापद्धतिश्च स्तरानुकूलम्, अनुसरणीये।

लेखनम् (Writing)

चतुर्विधभाषाकौशलेषु अन्तिमं कौशलं वर्त्तते लेखनम्। वाचिकक्रियायाः वर्णरूपमेव लेखनम्। प्राचीनभारतीयशिक्षापद्धतेरनुसारं प्रथमं मुखतः शब्दाः, श्लोकाः, गीतानि, पद्यानि च कण्ठस्थीक्रियन्ते स्म। ततः लेखनस्य अभ्यासं कारयन्ति स्म। अतः प्रारम्भे क्रमशः ध्वनिस्वरूपम्, अक्षरस्वरूपम्, उच्चारणस्वरूपं च सम्यक् ज्ञात्वा तत्पश्चात् लेखनाभ्यासः करणीयः। अपि च भाषाकौशलेषु कठिनतमं कौशलं लेखनम्। पठने लिपिस्वरूपं विज्ञाय उच्चरितुं शक्यते। किन्तु लेखने आभ्यां द्वाभ्यां क्रियाभ्यां सह आकृतीनामनुसारं हस्तयोः प्रसरणं, सहनेन, सावधानेन तत्तदाकृतीनां लेखनं च विधेयं भवति। एकस्याः भाषायाः भाषणं, पठनं कदाचित् कर्त्तुं शक्येत परं लेखनं तु तावत् सुलभं नास्ति।

ध्वनिरूपे विद्यमानं भाषांशं लिपिरूपे अवतारणमेव लेखनमित्युच्यते। अर्थात् ध्वनिलेखनमेव लेखनम्। भाषायाः सहजरूपं भाषणं, तत्प्रतिबिम्बरूपं लेखनम्। वाग्रूपभाषायाः स्थिररूपप्रदानमेव लेखनम्। भाषणलेखन-कौशलद्वयं भाषाभिव्यञ्जकमेव। श्रवणभाषणे ध्वनिसहिते, पठनलेखने तु लिपिसहिते।

लेखनस्यावश्यकता—

श्रवणमात्रविशिष्टस्य ध्वनेः दर्शनगुणमापादयति लेखनम्। यदि लेखनं नास्ति तर्हि पठनं नास्ति। सुदूरमपि समीपायते लेखनम्। स्वमनोभावान् प्रकटयितुं, ज्ञानं भावि प्रापयितुं, वाग्रूपभावानायाः स्थिररूपं प्रदातुं च लेखनं नितरामावश्यकम्। अपि च भाषायां सम्पूर्णाधिकारप्राप्तये च लेखनम् अत्यावश्यकम्। लेखनमाधृत्य तत्तद्व्यक्तीनां जीवनपद्धतिं ज्ञातुं शक्नुमः।

उद्देश्यानि—

- भावानां स्थिररूपप्रदानम्।
- स्वभावानां कृते आकृतिकल्पनम्।
- लेखनकौशलप्रदर्शनम्।
- स्व-पदसम्पदः, भाषाधिकारस्य च प्रदर्शनम्।
- सर्जनात्मकशक्तीनां प्रदर्शनम्।

प्रयोजनानि—

- अक्षरज्ञानं भवति।
- पठनासक्तिः जायते।
- शब्दस्वरूपावगाहनं भवति।
- भावाविष्कारणशक्तिः वर्धते।

बोधनपद्धतयः

१. **साम्प्रदायिकपद्धतिः**—यदा छात्राः पाठशालायां प्रविशन्ति, तदारभ्यैव लेखनाभ्यासः आरभ्यते। अध्यापकः, वर्णमालायां विद्यमानानि अक्षराणि एकैकशः लेखनपत्रे लिखित्वा अभ्यासं कारयति। ततः वर्त्तन्यः। अनन्तरं लघुपदानि लेखापयति। तत्पश्चात् वाचकस्य पाठनं भवति। अस्यां पद्धतौ लेखनाभ्यासाय न्यूनातिन्यूनं वर्षद्वयसमयः अपेक्षितो भवति। अत्र अनेके लोपाः सन्ति।

- अर्थरहितानाम् अक्षराणां लेखनाभ्यासे छात्राणां जामिता जायते।
- वर्णमालायां यानि अनपेक्षिताक्षराणि सन्ति, तेषां शिक्षणे एव समयः गच्छति।
- कृत्रिमतया अक्षराणाम् अभ्यासः भवति।
- चित्रमाध्यमं न भवतीति हेतोः छात्राणाम् उत्साहः नश्यति।

- मनोवैज्ञानिकशास्त्रदृष्ट्या पठनात् परं लेखनाभ्यासः भवेत्। परमत्र तथा न भवति।
- पदे पदे लेखनस्य अभ्यासेन हस्ते पीडा जायते।

२. **आधुनिकपद्धतिः**—सरलात् कठिनं प्रति इति शिक्षणसूत्रं पद्धत्यामस्याम् आश्रयते। अक्षरेषु विद्यमानां समरूपतामाश्रित्य शिक्षणं दीयते। एकामेव अक्षराकृतिं परिवर्त्य परिवर्त्य अन्यामाकृतिम् अभ्यसन्ति। अस्यां पद्धतौ छात्राः शीघ्रतया, अल्पकालेन च अक्षराकृतीनां ज्ञानं लभन्ते। सुलभतया लिखन्ति। अत्र प्रथमं छात्रान् लेखनाभ्यासाय संसिद्धान् करोति। तदर्थं रेखानाम् अभ्यासः कारयते। अक्षराकृतीनामाधारेण रेखाः प्रदेयाः। यदा छात्राः लेखनाय संसिद्धाः तदानीं श्यामपट्टे अक्षराणि अध्यापकः स्वयं लिखेत्। ततः तान्येव पदानि उच्चरन् छात्रैः श्यामफलके लेखापनीयानि। अनन्तरं तण्डुलकणैः, वर्णसूत्रैः, अक्षराणि लेखापनीयानि, येन छात्राणां कृते नायम् अभ्यासः भवति, परं क्रीडाविशेषः भवति। एवमेव द्वित्त्वाक्षराणाम्, संयुक्ताक्षराणां च अभ्यासः कार्यः।

लेखनशिक्षणपद्धतयः

१. **दृष्टलेखनम्**—पूर्वम् अध्यापकेन लिखितं, प्रथमपङ्क्तौ सुन्दरं मुद्रितं वा दृष्ट्वा तथैव सुन्दरैरक्षरैः लेखनम्। दृष्ट्वा सम्यक् लेखनमिति बाह्यलक्षणम्। दृष्टलेखनेन अन्तर्गतलक्षणान्यपि शिक्षयितुं शक्यते। छात्राणां स्तरानुकूलं तेषां पाठ्यपुस्तके विद्यमानं पद्यांशं, गद्यांशं वा दृष्टलेखनाय दातुम् अध्यापकः प्रभवति।

लाभाः—

१. सर्वाण्यपि अक्षराणि समपरिमाणे लेखितुं पारयन्ति।

२. सुन्दरं लेखनमभ्यसन्ति।

३. अक्षर-पद-वाक्येषु समतां पालयन्ति।

४. विरामचिह्नानां पालने शिक्षणं प्राप्नुवन्ति।

२. **उक्तलेखनम्**—अध्यापकेन उक्तानि पदानि, वाक्यानि वा सम्यक् श्रुत्वा लेखनम् उक्तलेखनं भवति। उक्तलेखनं श्रवणलेखनकौशलयोः समन्वयं साधयति। लेखने वर्णक्रमदोषान् दूरीकरोति। शीघ्रलेखने सहकरोति। श्रवणसामर्थ्यं वर्धयति, अवधानं कल्पयति।

उक्तलेखनाभ्यासे अवधेया अंशाः—

१. उक्तलेखनाभ्यासाय यानि पदानि, वाक्यानि वा दीयन्ते, तानि पाठ्यपुस्तकस्थानि भवेयुः।

२. उक्तलेखनाय यानि वाक्यानि उच्यन्ते तानि नातिशीघ्रं, नातिमन्दं वा वक्तव्यम्।

३. विरामचिह्नानि न सूचनीयानि। छात्रा एव यत्र यत्र विरामचिह्नानि लेखनीयानि इति विज्ञाय लिखेयुः।

४. लेखनं–शीघ्रं, सुन्दरं, दोषरहितं यथा स्यात् तथा अभ्यासं कारयेत्।

५. उक्तलेखने समाप्ते सति पुनः एकवारं उक्तलेखनांशं पठित्वा श्रावणीयम्।

६. उक्तलेखनं स्वयं छात्राः परस्परं द्रष्टुं, त्रुटिसंशोधनं च कर्तुं शक्नुवन्ति।

लाभाः—

१. श्रवणकौशलस्य, लेखनकौशलस्य च मध्ये सम्यक् समन्वयं साधयति।

२. शीघ्रलेखनशक्तिः एधते।

३. वर्णक्रमदोषान् परिहरति।

४. पठन–श्रवण–लेखनकौशलानि वर्धन्ते।

५. विरामचिह्नानां प्रयोगं जानन्ति।

६. स्मरणशक्तिः वर्धते।

७. अवधानस्य अभ्यासः भवति।

८. लेखनस्य सुन्दरतां दर्शयति।

चतुर्विधकौशलानां परस्परसम्बन्धः

एतानि चत्वारि कौशलानि परस्पराश्रितानि। भाषासौधस्य इमानि मूलस्तम्भभूतानि। तत्र यदि एकोऽपि स्तम्भः सम्यक् न भवति चेत् सौधस्य दार्ढ्यता न भवति। भावविनिमयात्मकस्य भाषायाः प्रधानोद्देश्यस्य श्रवण–भाषण–पठन–लेखनानि मूलभूतानि।

श्रवणात् भाषणं, भाषणात् पठनं, पठनात् लेखनं कठिनमिति विमर्शकाणामभिप्रायः। भाषणेन श्रवणसंस्कारः जायते। यतो हि कोऽपि भाषेत तदा एव कोऽपि श्रोतुं प्रभवति। पुनः श्रवणेन भाषणं जायते। अतः श्रवणभाषणे परस्पराश्रिते भवतः। तथैव पठनाय लिपिः आवश्यकी। लिपिस्तु लेखनस्य फलम्। अतः पठनकौशलस्य लेखनम् आश्रयं ददाति। लिखितस्य पठनमेव परिपूर्णतां साधयति। लिखितं कोऽपि न पठेत् चेत् तेन को लाभः ?

अतः लेखनस्य पठनम् आधारम्। श्रवणस्य–भाषणपठनलेखनानि। भाषणस्य–श्रवणपठनलेखनानि। पठनस्य–श्रवणभाषणलेखनानि। लेखनस्य–श्रवणभाषणपठनानि आधारभूतानि।

अतः कौशलचतुष्कमेतत् अन्तस्सम्बद्धम्, परस्पराश्रितं च वर्त्तते। अध्यापकः, छात्राणां कृते चतुर्विधकौशलानां प्राधान्यम्, आवश्यकतां च संबोध्य तान् चतुर्ष्वपि एतेषु कौशलेषु समकुशलतां सम्पादने प्रेरयेत्।

❑

७. संस्कृतशिक्षणस्योद्देश्यानि

संस्कृतं सर्वासाम् आर्यभाषाणां जननी। आर्येतरभाषा अपि अनया भाषया प्रभाविताः। अतः संस्कृतभाषाशिक्षणोद्देश्यानि अन्यभाषाशिक्षणोद्देश्येभ्यः विशिष्टानि भवन्ति।

सामान्योद्देश्यानि

- संस्कृतं प्रति अभिरुच्युत्पादनम्।
- संस्कृतवाक्यानां भावानुसारं शुद्धं स्पष्टं च पठनाय अपेक्षितसामर्थ्यसम्पादनम्।
- संस्कृतश्लोकानां भावानुसारं शुद्धं स्पष्टं च पठनायाँपेक्षितसामर्थ्यसम्पादनम्।
- संस्कृतवाक्यानां, गद्यभागानां, श्लोकानाम् अर्थग्रहणाय, अवगमनाय च क्षमतोत्पादनम्।
- शब्दानां, सुभाषितश्लोकानां, सूत्राणां कण्ठस्थीकरणाय प्रोत्साहप्रदानम्।
- नूतनशब्दानां, सूक्तीनां, ध्येयवाक्यानां ज्ञानप्रदानम्।
- संस्कृतशब्दभण्डारस्य वर्धनम्।
- संस्कृते सरलसरलवाक्यरचनायाः अभ्यासप्रदानम्।
- अन्तः शक्तीनां विकासः।
- उत्तमचरित्रनिर्माणम्।
- राष्ट्रिय-एकतायाः जागरणम्।
- वसुधैककुटुम्बकभावनायाः विकासः।
- भारतीयसंस्कृतेः संरक्षणम्।
- मातृभाषावाक्यानि संस्कृते अनुवादाय योग्यताप्रदानम्।

१. **ग्रहणात्मकम्**—संस्कृतशिक्षणस्य इदं सर्वप्रथमम् उद्देश्यं भवति। छात्राः संस्कृतभाषायाम् अभिव्यक्तविचाराणां ग्रहणाय समर्थाः भवन्तु। छात्राः मौखिकरूपेण व्यक्तं संस्कृतम् अवगच्छेयुः। छात्राः संस्कृते लिखितविचाराणां चावगमनं कुर्युः। छात्रा कामपि भाषां पठन्तु नाम। परं तस्याः भाषायाः मौखिकलिखितरूपस्यावगमने सामर्थ्यं प्राप्नुयुः।

२. **अभिव्यक्त्यात्मकम्**—भावाभिव्यक्तिः द्विप्रकारका भवति, भाषणेन, लेखनेन च। अतः इदमवश्यं भवति यत्-छात्राः सरल-शुद्धसंस्कृते

मौखिकविचाराभिव्यक्तीकरणाय सक्षमाः भवेयुः। छात्राः सरलशुद्धसंस्कृते लिखितविचाराभिव्यक्तीकरणाय समर्थाः भवेयुः।

३. सांस्कृतिकम्—भारतीयसंस्कृतेः संरक्षणे एकमात्रोपायः संस्कृतम्। भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा, संस्कृतिः संस्कृताश्रिता इति वयं जानीमः। संस्कृतिविषयकं ज्ञानं संस्कृतभाषया एव प्राप्तुं शक्यते। नान्यः पन्था विद्यते। संस्कृतशिक्षणावसरे सांस्कृतिकमुद्देश्यं विस्मर्तुं न शक्यते। अतः प्राचीनग्रन्थानां, तेभ्यः उद्धृतानाम् अंशानां वा माध्यमेन प्राचीनभारतीयसंस्कृतेः परिचयः संस्कृतच्छात्रेभ्यः करणीयः।

४. कलात्मकम् — मनोहरलोकोक्तिभिः सरलसुभाषितश्लोकैश्च कलात्मक संस्कृतस्य परिचयः अवश्यं प्रदेयः। तेन परिचयेन ते गति-यति-लय-तालपुरस्परं संस्कृतकवितापठने योग्यतां प्राप्नुयुः। छात्रेभ्यः संस्कृतसाहित्यस्य परिचयः कलात्मकदृष्ट्या भवेत्।

५. रचनात्मकम्—रचनात्मकोद्देश्यस्य अन्तर्गतत्वेन अधोविषयाः सम्मिलिता वर्त्तन्ते। सरलसंस्कृते मौखिक-लिखितरूपेण अभिव्यक्त्यै क्षमता। मातृभाषायाः संस्कृते अनुवादाय योग्यता। संस्कृतवाक्येषु शब्दानां, लोकोक्तीनां प्रयोगे सामर्थ्यम्। सरलविषयेषु संस्कृते निबन्धलेखने क्षमता। अनुच्छेदान् पठित्वा तस्य सारांशलेखनम्।

६. रसानुभूत्यात्मकम्—स्वाध्यायोऽध्येतव्यः। स्वाध्यायान्मा प्रमदः, स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यमिति उपनिषत् प्रमाणवाक्यम्। स्वाध्यायः पठनस्य अन्तिमं रूपम्। स्वाध्यायेन मनोविनोदः, आनन्दश्च जायेते। छात्राः संस्कृतभाषायाः पर्याप्तज्ञानप्राप्तेः अनन्तरं संस्कृतसाहित्यस्वाध्यायेन निरन्तरम् मनोविनोदं, आनन्दानुभूतिं च लभेरन्। संस्कृतस्य सरलसाहित्येन छात्राः नूनं रसानुभूतिं प्राप्नुयुः।

वैकल्पिकसंस्कृतशिक्षणस्य उद्देश्यानि

- संस्कृतसरलवाक्यानां पठनाय योग्यतासम्पादनम्।
- संस्कृतशब्दभण्डारस्य वृद्धिः।
- भारतीयसंस्कृतिसम्बद्धश्लोकानां, जीवनादर्शभूतश्लोकानां च अर्थग्रहाणाय, अवगमनाय च क्षमतोत्पादनम्।
- लोकोक्तीनां, प्रहेलिकानां, सुभाषितश्लोकानां च पठनाय सामर्थ्यसम्पादनम्।
- संस्कृतश्लोकानामन्वये योग्यतासम्पादनम्।
- भाषायाः शुद्धोच्चारणाय अवसरप्रदानम्।
- संस्कृतभाषायाः शुद्धलेखनाय अभ्यासः।
- संस्कृते सरलवाक्यरचनायाः सामर्थ्यप्रदानम्।

- शब्दरूपाणां, धातुरूपाणां च ज्ञानप्रदानम्।
- संस्कृतव्याकरणस्य परिचयः।
- सौभ्रतृत्वभावनायाः सम्पादनम्।

ऐच्छिकसंस्कृतशिक्षणस्य उद्देश्यानि

- ग्रहणशक्तेः वर्धनम्।
- मौखिकविचाराभिव्यक्तीकरणाय क्षमतासम्पादनम्।
- सर्जनात्मकशक्तेः वर्धनम्।
- लिखितरूपभावस्य व्यक्तीकरणाय क्षमतोत्पादनम्।
- प्राचीनग्रन्थानां माध्यमेन भारतीयसंस्कृतिं प्रति श्रद्धायाः जागरणम्।
- सौन्दर्यानुभूतिज्ञानाय अलङ्काराणां, छन्दसां च ज्ञानप्रदानम्।
- विविधसंस्कृतकार्येषु सक्रियतया भागग्रहणाय प्रोत्साहः।

अनिवार्यसंस्कृतशिक्षणस्य उद्देश्यानि

- कठिनगद्यांशानां पठनाय क्षमतोत्पादनम्।
- संस्कृतशब्दभण्डारस्य वर्धनम्।
- साहित्यकभाषाप्रयोगे सामर्थ्यसम्पादनम्।
- संस्कृतसाहित्यस्य गभीराध्ययनाय अवसरप्रदानम्।
- सुभाषितश्लोकानां, लोकोक्तीनां, ध्येयवाक्यानां, प्रहेलिकानां च अध्ययनाय अवसरप्रदानम्।
- श्लोकानाम् अन्वयं कृत्वा तदर्थ-भावग्रहणाय सामर्थ्यसम्पादनम्।
- संस्कृतात् मातृभाषायाः, मातृभाषातः संस्कृते च अनुवादकरणाय योग्यताप्रदानम्।
- शुद्धोच्चारणाय क्षमतोत्पादनम्।
- गति-यति-लयपुरस्सरं श्लोकानां वाचने योग्यताप्रदानम्।
- विविधसाहित्यकविषयान् आधारीकृत्य संस्कृतभाषायां निबन्धलेखनाय क्षमतोत्पादनम्।
- संस्कृतसाहित्यं प्रति अभिरुच्युत्पादनम्।
- संस्कृतग्रन्थानां साहित्यसमालोचनाय सामर्थ्यप्रदानम्।
- दशगणेषु विद्यमानानां समस्तधातूनां ज्ञानप्रदानम्।
- सम्पूर्णव्याकरणस्य ज्ञानप्रदानम्।

- कठिनगद्यांशानाम् अवगमनाय योग्यताप्रदानम्।
- संस्कृतसम्भाषणे पटुतासम्पादनम्।
- संस्कृतवाक्यनिर्माणे क्षमतायाः उत्पादनम्।
- संस्कृते श्लोकरचनात्मशक्तेः विकासः।

संस्कृतशिक्षणस्य स्तरानुसारम् उद्देश्यानि

अस्माकं संस्कृताध्ययनम्-अध्यापनं च धाराद्वये प्रचलति। परम्परागतधारा, आधुनिकधारा चेति। परम्परागतधारायां पाठशालापद्धत्या शिक्षणं प्रचलति। अत्र प्रारम्भिक-माध्यमिक-उच्चस्तराः सन्ति।

पाठशालापद्धतौ

प्रारम्भिकस्तरे	-	प्रथमा, प्राज्ञः, **प्रवेशिका**
माध्यमिकस्तरे	-	मध्यमा, उत्तरमध्यमा, विशारदा
उच्चस्तरे	-	शास्त्री, आचार्य-कक्ष्याः अन्तर्भवन्ति।

प्रारम्भिकस्तरे—

- **सरलसंस्कृतस्य अर्थावगमनक्षमता।**
- **सरलसंस्कृते सम्भाषणयोग्यता।**
- **सरलश्लोकानां, पद्यांशानाम् अन्वयं कृत्वा, व्याख्यानाय क्षमता।**
- **सरलसंस्कृतात् मातृभाषायां, मातृभाषातः संस्कृते च अनुवादाय योग्यता।**
- **व्याकरणे सन्धि, समास, कारक, तद्धित, कृदन्तशब्दरूपाणां प्रयोगसामर्थ्यम्।**
- **धातुरूपाणां च ज्ञानम्।**
- **अलङ्काराणां, छन्दसां च सामान्यपरिचयः।**

माध्यमिकस्तरे—

- सरल-कठिनगद्यांशानाम्, अर्थावगमने क्षमता।
- सरल-कठिनश्लोकानाम् अन्वयं कृत्वा, तेषां व्याख्याने दक्षता।
- सरल-कठिनांशान् मातृभाषातः संस्कृते, संस्कृतात् मातृभाषायाम्, अनुवादे सामर्थ्यम्।
- संस्कृतभाषायां सम्भाषणे लेखने च क्षमता।
- व्याकरणप्रक्रियायाः सम्पूर्णज्ञानम्।
- अलङ्काराणां छन्दसां सम्पूर्णज्ञानम्।

- संस्कृते पत्रलेखनस्य योग्यता।
- श्लोकरचनायां दक्षता।

उच्चस्तरे—

- संस्कृते मौखिकरूपस्य, लिखितरूपस्य च भावाभिव्यक्तीकरणाय पूर्णसामर्थ्यम्।
- संस्कृते गद्य-पद्यरचनाय योग्यता।
- संस्कृते धाराप्रवाहरूपेण व्याख्यानाय क्षमता।
- संस्कृते कठिन-दीर्घानुच्छेदानां सारांशलेखने योग्यता।
- संस्कृतग्रन्थानां टीकां, टिप्पणीं वा लेखनाय क्षमता।
- शोधकार्याय पूर्णयोग्यता।
- शास्त्रार्थकरणाय दक्षता।
- संस्कृतभाषायां सम्पूर्णपाण्डित्यस्य सम्पादनम्।

विद्यालयपद्धतौ

प्राथमिकस्तरे	-	**षष्ठीकक्षातः अष्टमीकक्षापर्यन्तम्।**
माध्यमिकस्तरे	-	**नवमी, दशमी, एकादशी तथा द्वादशीकक्षाः**
उच्चस्तरे	-	**बी.ए., एम.ए.**

प्रारम्भिकस्तरे—

- संस्कृतस्य सरलगद्यांशानां, पद्यांशानां वा शुद्धं, स्पष्टं च पठनाय क्षमता।
- कथितानां, लिखितानां च सरलसंस्कृतवाक्यानाम् अर्थग्रहणाय योग्यता।
- संस्कृतसरलवाक्यानां मातृभाषायाम् अनुवादाय सामर्थ्यम्।
- मातृभाषासरलवाक्यानि संस्कृते अनुवादाय सामर्थ्यम्।
- संस्कृते लघुवाक्यैः सरलवाक्यैश्च मौखिकाभिव्यक्तिः।
- दृष्टलेखने, श्रुतलेखने च योग्यता।
- पत्रलेखने परिचयात्मकज्ञानम्।

माध्यमिकस्तरे—

- संस्कृते सरल-कठिनगद्यांशानां शुद्धं, स्पष्टं च पठनाय योग्यता।
- संस्कृतश्लोकानां सस्वरवाचनाय क्षमता।

- कठिनगद्यांशानां, पद्यांशानां च अर्थग्रहणाय योग्यता।
- संस्कृतकठिनवाक्यानाम्, अनुच्छेदानां मातृभाषायाम् अनुवादाय सामर्थ्यम्।
- मातृभाषातः कठिनवाक्यानि, अनुच्छेदांश्च संस्कृते अनुवादाय अभ्यासः।
- सामान्यविषयेषु सरलसंस्कृते निबन्धरचनायाः अभ्यासः।
- संस्कृतपत्रलेखने सामर्थ्यम्।

उच्चस्तरे—

- सर्वविधगद्यखण्डानां शुद्धं, स्पष्टं पठनाय क्षमता।
- गति-यति-ताल-लयपुरस्परं समस्तपद्यांशानां शुद्धोच्चारणाय योग्यता।
- सर्वविधगद्यपद्यांशानाम् अवबोधनाय अभ्यासः।
- मातृभाषातः, अन्यपरिचितभाषाभ्यश्च संस्कृते अनुवादाय सामर्थ्यम्।
- सर्वविधविषयेषु संस्कृते निबन्धलेखनस्य, पत्रलेखनस्य च अभ्यासः।
- संस्कृतश्लोकरचनायाः सामर्थ्यम्।
- संस्कृते मौखिकभावाभिव्यक्तेः क्षमता।
- संस्कृतरचनानां समीक्षात्मकशक्तेः विकासः।
- संस्कृतभाषा-साहित्यसम्बद्धांशेषु शोधकार्यकरणस्य योग्यता।
- शास्त्रार्थकरणाय दक्षता।
- संस्कृतभाषायां सम्पूर्णपाण्डित्यस्य सम्पादनम्।

शिक्षणलक्ष्याणि

शिक्षणलक्ष्याणां प्रत्यक्षसम्बन्धः शिक्षणाद्भवति। शिक्षणेन बालकस्य व्यवहारे परिवर्तनमायाति। अतः ज्ञानात्मकपक्षः छात्राणां व्यवहारे जायमानानि परिवर्तनानि अभिव्यनक्ति। बालकस्य समस्तव्यवहारपरिवर्तनं, त्रिषु भागेषु विभक्तं भवति।

१. **ज्ञानात्मकपक्षः**—ज्ञानात्मकपक्षे बालकः नवीनतथ्यानां, सूचनानां, घटनानां, सिद्धान्तानां च ज्ञानं प्राप्नोति। अस्मिन् पक्षे स्मरणप्रक्रिया, अभिज्ञानप्रक्रिया च भवतः। अयं पक्षः बालकस्य ज्ञानप्राप्तिसम्बद्धो भवति। ज्ञानात्मकपक्षः सहजतया सीमितः भवति।

२. **क्रियात्मकपक्षः**—ब्लूम् महोदयस्यानुसारं क्रियात्मकपक्षस्य अपरं नाम मनोशारीरिकपक्षः। पक्षेऽस्मिन् बालकस्य व्यवहारप्रक्रियाः सम्मिलिताः भवन्ति। अत्र शारीरिकक्रियाः सक्रियाः भवन्ति। कौशलानाम्, आदर्शानां च निर्माणे अयं पक्षः सहायकारी भवति।

३. **भावात्मकपक्षः**—बालकानां रुचयः, मनोवृत्तयः संवेगाश्च अन्तर्भवन्ति। एतैः बालके मूल्यानां विकासः भवति। उत्तमचरित्रनिर्माणं भवति।

शिक्षणलक्ष्याणां शास्त्रीयविभागः

विषयेऽस्मिन् अमेरिकादेशे विशेषकार्यं जातम्। १९५६ तमे वर्षे शिकाङ्गो विश्वविद्यालये प्रो. बि. यस्. ब्लूम् महोदयः ज्ञानात्मकपक्षं षड्भागैः व्यभजत्। ततः १९६२ तमे वर्षे सिम्पसन् महोदयः मनोशारीरिकपक्षं षड्भागैः न्यरूपयत्। तत्पश्चात् १९६४ तमे वर्षे क्रेसयम्-मसीहामहोदयौ भावात्मकपक्षं षड्भागैः व्यभजताम्।

यथा—

ज्ञानात्मकपक्षः	मनोशारीरिकपक्षः	भावात्मकपक्षः
ज्ञानम्	उद्दीपनम्	ग्रहणम्
बोधः	कार्यकरणम्	अनुक्रिया
प्रयोगः	नियन्त्रणम्	मूल्यम्
विश्लेषणम्	समायोजनम्	विचारणम्
संश्लेषणम्	स्वाभावीकरणम्	संगठनम्
मूल्याङ्कनम्	अभ्यासीकरणम्	चरित्रनिर्माणम्

एतस्य शास्त्रीयविभागस्य उपरि मैसूरुनगरे स्थितः क्षेत्रीय-शिक्षामहाविद्यालयः, विशेषपरिशोधनं कृत्वा एकां नूतनां पद्धतिमाविश्चकार। अस्याः पद्धतेः नाम आर. सी. इ.यम्. (रीजिनल् कॉलेज् एड्युकेषन् मैथड्) इति।

१. **ज्ञानम्**-

मानसिकयोग्यताः

प्रतिस्मरणम्

प्रत्यभिज्ञानम्

२. **बोधः**—

सम्बन्धदर्शनम्	दृष्टान्तोपस्थापनम्
विभागकरणम्	वर्गीकरणम्
व्याख्यानम्	पुष्टिकरणम्
सामान्यीकरणम्	तर्कः

३. **प्रयोगः—**

उपकल्पनायाः निर्माणम्

उपकल्पनायाः स्थापनम्

निष्कर्षः

४. **सर्जनात्मकता—**

पूर्वकथनम्

विश्लेषणम्

संश्लेषणम्

मूल्याङ्कनम्

राष्ट्रियशैक्षिक-अुसन्धानपरिषदा (यन्.सी.इ.आर्.टि) शिक्षणलक्ष्येषु महत्त्वपूर्णं कार्यमकारि। शिक्षणलक्ष्याणां शास्त्रीयविभागं संशोध्य त्रीण्येव शिक्षणलक्ष्याणि निर्धारितानि।

ज्ञानात्मकपक्षे ज्ञान-बोध-अनुप्रयोगाः एव भवन्ति।

मनोशारीरिकपक्षस्तु कौशलात्मकपक्षः भवति।

भावात्मकपक्षे रुचि-अभिवृत्ती अन्तर्भवतः।

❑

८. संस्कृतशिक्षणसिद्धान्ताः

संस्कृतं भारतीयसमाजस्य एका प्रधानभाषा। दैनन्दिनप्रयोगे अस्याः व्यापकता, व्यावहारिकता च प्रायः विरला वर्त्तते। अपि च प्रयोगः सीमितः अस्ति। आधुनिकभारतीयभाषासु अधिकांशाः विश्लेषणात्मकाः।

परं संस्कृतम् संश्लेषणात्मकभाषा। भारतीयभाषासु संस्कृतस्य स्थानं सांस्कृतिकभाषारूपेणैवास्ति। संस्कृतभाषारचना, तस्याः शैली च अन्यभाषाभ्यः काचन विशिष्टा भवति। संस्कृतम् व्याकरणप्रधानभाषा। शुद्धसंस्कृतस्य अवगमने, भाषणे, लेखने च व्याकरणमनिवार्यं भवति। तदर्थं संस्कृतशिक्षणाय केचन सिद्धान्ताः विद्यन्ते, येषां ज्ञानम् अध्यापकानां नितरामत्यावश्यकम्। ते अत्र निरूप्यन्ते—

१. **स्वाभाविकतासिद्धान्तः**—भाषाशिक्षणम् एका प्राकृतिकप्रवृत्तिः। भाषाशिक्षणाय याः शारीरिक-मानसिकक्षमताः अपेक्षन्ते, ताः छात्राः जन्मतः एव प्राप्स्यन्ति। केवलं तासां क्षमतानां विकासः एव करणीयः. प्रारम्भकाले शिशुः अनुकरणेन मातुः, पितुः, अन्यपरिवारसदस्येभ्यश्च मातृभाषाम् अभ्यसति। शिशुः यदा गृहादतिरिक्तैः जनैः सहापि मिलति तदा तस्य भाषायाः मौखिकज्ञानमपि अधिकाधिकं वर्धते। विधिवत् शिक्षणारम्भात् पूर्वमेव शिशुः स्वाभाविकप्रक्रियया भाषाशिक्षणाय पर्याप्तां प्रेरणां प्राप्नोति।

२. **अभिरुचिसिद्धान्तः**—पाठशालायाः परिवेशः तादृशो भवेत् यादृशे परिवेशे छात्रः स्वाभिरुचिं प्रदर्शयेत्। अधिकसमयं विद्यालये एव यापनाय च अभिलषेत्। तदैव सः भाषायाः अधिकप्रयोगं कर्त्तुं पारयति, भाषां चाधिगच्छति। छात्राणां संस्कृतभाषा न वा मातृभाषा, न वा व्यवह्रियमाणभाषा (श्रूयमाणा) अस्ति। अतः अस्याः शिक्षणं विद्या... नेव सम्भवति। अनेन कारणेन अध्यापकः संस्कृताध्यपनसमये अस्मिन् सिद्धान्ते अधिकं ध्यानं देयमस्ति। यदि विद्यालयेषु संस्कृतशिक्षणं रुचिपूर्णं न भवेत् तर्हि छात्राः अग्रे संस्कृतपठनं त्यजेयुः।

संस्कृतशिक्षणे रुचिसम्पादनाय दृश्यश्रव्योपकरणानामुपयोगः करणीयः। वर्णचित्राणि, स्फोरकपत्राणि, चोपयोक्तव्यानि। श्यामफलकमधिकाधिम् उपयोज्यम्। संस्कृतपाठ्यपुस्तकं रोचकं, प्रेरणादायकम्, आकर्षकं च भवेत्। अत्रातिप्रध... अंशः अस्ति यत् आदौ संस्कृताध्यापकस्य शिक्षणे रुचिर्भवेत्। छात्रान् प्रति तस्य व्यवहारः सहानुभूतिपूर्णः स्यात्। सः तान् रुचिपूर्णेन पाठयेत्।

संस्कृतपाठस्य पाठनात्पूर्वम् अभिप्रेरणसम्पादनाय, रुच्युत्पादनाय च पूर्वज्ञानसम्बन्धिनः केचन प्रश्ना प्रष्टव्याः। कदाचित् कठिनविषयात्मकपाठाः भवन्ति, तदा भूमिका सरलतया करणीया। संस्कृतश्लोकान् सुस्वरेण गायेत्। नीरसविषयाणां

पाठानां पाठने सरसशैलीमनुसरेत्। रुच्युत्पादने यथासम्भवं क्रीडाविधिः अत्यन्तम् उपकारी। प्रसङ्गानुसारं लघुकथाः श्रावणीयाः। पुरस्काररूपप्रोत्साहदानेन संस्कृतं प्रति रुचिर्जायते। उच्चारण-सुभाषितश्लोक-चर्चादिप्रतियोगितानां समायोजनेन, पुरस्कृतिप्रदानेन च तेषां रुचिः वर्धते।

३. अभ्याससिद्धान्तः—अस्यैव अपरं नाम-क्रियाशीलसिद्धान्तः। भाषा एका कला। अन्यकलावद् भाषाशिक्षणेऽपि अभ्यासः नितराम् आवश्यकः। संस्कृतं छात्राणां मातृभाषा नास्ति। अतः संस्कृतशिक्षणाय दीर्घकालिकाभ्यासः अपेक्षितः। अपि च मौखिक-लिखितरूपद्विप्रकारकस्य अभ्यासस्य आवश्यकता वरीवर्त्ति।

संस्कृतशिक्षणं क्रियात्मकं भवति। यथा तरणस्य शिक्षणं भवति, तथा भाषाशिक्षणम् तरणविषयकं बहुज्ञानम् अर्जयति। तथाऽपि यावत् पर्यन्तं जले अवतीर्य अभ्यासं न करोति तावत् पर्यन्तं तरणं नाभ्यसति। तथैव संस्कृतशिक्षणमपि अभ्यासेनैव सम्भवति। हराल्ड् ई. पामर् महोदयः THE PRINCIPLES OF LANGUAGE STUDY नामके ग्रन्थे अभिप्रैति यत्-भाषाशिक्षणम् एका अभ्यासप्रक्रिया। यया प्रक्रियया वयं नूतनानभ्यासान् अधिगन्तुं शक्नुमः इति। संस्कृतभाषाशिक्षणस्य अभ्यासाय केचन बिन्दवः अत्र प्रदर्श्यन्ते-संस्कृतध्वनीनाम् अभ्यासेन साधूच्चारणक्षमता सिद्ध्यति। पाठगतकठिनशब्दानामभ्यासः। संस्कृतश्लोकानां, सुभाषितानां कण्ठस्थीकरणाभ्यासः। संस्कृतलोकोक्तीनामभ्यासः। सरलविचारान् संस्कृते अभिव्यक्तीकरणाय अभ्यासः।

४. प्रयत्नसिद्धान्तः—संस्कृतभाषा जटिलसूक्ष्मप्रक्रियोपेता अस्ति। अतः अस्या शिक्षणाय कश्चन प्रयासः विधेयः। यथा तपः तथा भाषा। भाषाध्ययनेऽपि तपसीव श्रमसाधने एव कारणे, उपकरणे च।। तदानीमेव तद्भाषायाम् अधिकारं प्राप्नोति। वर्ण-शब्द-वाक्यानां सम्यक् ज्ञानाय प्रयत्नः समाश्रयणीयः। पतञ्जलिमुनिना प्रोक्तम् यत्-एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति इति। प्रयत्नेनैव श्रुतलेखन-वाक्यसंरचना-सुस्वरवाचन-अनुवादादिकार्येषु दक्षः भवेत्। तदैव भाषाशुद्धतां प्राप्नुयात्।

५. अनुकरणसिद्धान्तः—बालाः अनुकरणशीलाः भवन्ति। इयमेव प्रवृत्तिः भाषाशिक्षणे उपकारिणी भवति। वर्णानामुच्चारणं, शब्दप्रयोगः, वाक्यरचना इत्यादीनां कौशलम् अनुकरणेनैव अल्पे एव काले समुपार्जयन्ति। प्रायः ते शिक्षकस्य भाषाशैलीमेव अनुकुर्युः। अतः शिक्षकाः साधूच्चारणे, शुद्धभाषाप्रयोगे च समर्थाः भवेयुः। अस्यैव संशोधनसिद्धान्तः इति अपरं नाम। यदि कश्चन छात्रः आदौ त्रुटिपूर्णं भाषणं करोति, स एव अध्यापकस्य आदर्शवाचनमनुसृत्य स्वयं स्वीयां त्रुटिं संशोधयति। यदा छात्राः अध्यापकस्य आदर्शवाचनं शृण्वन्ति, ततः तदनुकृत्य अनुकरणवाचनं कुर्वन्ति। अनुवाचने समागतान् दोषान् अध्यापकः सहपाठकैरेव निवारयति।

६. **सक्रियतासिद्धान्तः**— भाषाशिक्षणप्रक्रियायां छात्राणां सक्रियता नितरामुपकरोति। निष्क्रियः छात्रः भाषाशिक्षणे समर्थः न भवति। सक्रियता छात्रस्य मानसिकविकासगतिमधिकतया वर्धयति। अतः भाषाशिक्षणावसरे छात्राः अधिकाधिकं सक्रिया भवेयुः। छात्रेषु सक्रियतासम्पादनाय अध्यापकः अधोनिर्दिष्टेषु अंशेषु ध्यानं दद्यात्।

संस्कृताध्यापकः स्वयं वक्ता न भवेत्। छात्रेभ्योऽपि भाषणाय अवसरः देयः। सः संस्कृते स्वयं सम्भाष्य छात्रान् प्रेरयेत्। छात्राः अधिकतया यथा प्रश्नान् पृच्छेयुः तथा प्रेरणा प्रदेया। पाठसहगामिक्रियासु, पाठ्येतरक्रियासु च भागग्रहणाय, सक्रियताप्रदर्शनाय च तेषु उत्सुकताम् उत्पादयेत्। पुस्तकालयीय-सरलसंस्कृतग्रन्थानां पठनाय छात्रान् समायोजयेत्।

७. **क्रमसिद्धान्तः**—भाषाशिक्षणसम्बद्धानां विभिन्नोद्देश्यानां कश्चन क्रमः वर्त्तते। तत्क्रमानुसारं तेषु ध्यानं देयम्। अर्थात् आदौ कस्य उद्देश्यस्य पूरणं करणीयम्, अनन्तरं कस्य उद्देश्यस्य इति कश्चन क्रमः पालनीयः। संस्कृतशिक्षणोद्देश्यानां क्रमविषये चिन्तयामः। इदानीं संस्कृतं कुत्रापि जनभाषात्त्वेन नास्ति। अतः संस्कृतशिक्षणस्य उद्देश्येषु प्राथमिकम् उद्देश्यं ग्रहणात्मकं भवति। आदौ तत्पूरयित्वा ततः अभिव्यक्त्यात्मकमुद्देश्यं पूरणीयम्। तथैव संस्कृतमौखिककार्ये ध्यानं दत्वा, ततः लिखितकार्ये ध्यानं दद्यात्। अस्यैव अनुपातसिद्धान्तः इति नाम।

८. **बहुमुखविधिसिद्धान्तः**—एकस्य उद्देश्यस्य पूरणाय तदुद्देश्यसम्बद्धानां सर्वेषां विषयाणामुपरि धयानं प्रदेयम्। अर्थात् बहुविधप्रयत्नः करणीयः। तदैव तस्योद्देश्यस्य पूर्णतया प्राप्तिः भवति। संस्कृतशिक्षणे कारकशिक्षणम् अत्रोदाहरणं भवति। करणकारक-अपादानकारकयोर्मध्ये विद्यमानं भेदं बोधनाय तत्तकारक-गतसमस्तोदाहरणानि छात्राणां पुरतः उपस्थापनीयानि। उदाहरणप्रस्तुतीकरणे छात्रा अपि प्रोत्साहनीयाः। पाठ्यपुस्तकेषु विद्यमानोदाहरणानां प्रस्तावाय छात्रान् प्रेरयति तर्हि इतोऽपि अधिकतया आकृष्टा भवेयुः। अस्मिन् सन्दर्भे मौखिक-लिखितकार्याणि एकस्मिन् समये एव कारणीयानि।

९. **मौखिककार्यसिद्धान्तः**—भाषाशिक्षणमिति कार्यं कर्णाभ्यां, जिह्वया च आरभ्यते। शिशुः आरम्भात् श्रवणभाषणयोः अभ्यासं करोति। अतः भाषाशिक्षणे प्रथमं मौखिकं कार्यं, तत्पश्चात् लिखितं कार्यं कारणीयम्। आदौ छात्राः संस्कृतशब्दसमूहेन, संस्कृतभाषायाः रचनया च परिचिताः भवेयुः। किञ्चित्कालानन्तरं लिखितकार्यस्यारम्भः करणीयः। यतो हि लिखितकार्यस्य आधारः मौखिककार्यं किल।

१०. **उद्देश्यचयन-विभागसिद्धान्तः**—प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते इत्युक्तेः अनुसारं भाषाशिक्षणस्य नैकानि उद्देश्यानि सन्ति। तत्र कश्चन भावग्रहणं सर्वोत्तमं मनुते। अन्यः भावव्यक्तीकरणं सर्वाधिकं चिन्तयति। अपरः साहित्यानुवादक्षमतारूपम् उद्देश्यं महत्त्वपूर्णं विचारयति। तर्हि वैय्यक्तिकाधारेण

विचिन्तितानामुद्देश्यानां सकृदेव पूरणं अनपेक्षितम्, असामञ्जस्यम्, अनावश्यकं च भवति। अतः उद्देश्यानां पूरणाय कञ्चन पूर्वापर्यक्रमः निश्चेतव्यः अत्र उद्देश्यानां चयनमेव महत्त्वपूर्णं कर्म। उद्देश्यानां चयनानन्तरं तत्तदुद्देश्यानाम् उपयुक्त-पाठ्यसामग्र्याः विभागः करणीयः। अर्थात् कस्य उद्देश्यस्य कीदृशी पाठ्यसामग्री अपेक्षिता ?, के पाठ्यबिन्दवः भवेयुः ?, कियन्तः कालांशाः आवश्यकाः ? इत्यादिविषयेषु विचारः विधेयः।

शिक्षणसूत्राणि (Teaching Maxims)

विभिन्नविषयाणाम् अध्यापने उपयुज्यमानानि मनोवैज्ञानिकानि शिक्षणसूत्राणि सन्ति। अन्यविषयेष्विव संस्कृतशिक्षणेष्वपि एतानि सूत्राणि प्रयोक्तुं शक्यन्ते। तानि—

(क) ज्ञानेन्द्रियैः पठनम्—प्रथमं ध्वनिं शृणुयात्। ततः तं ध्वनिमेव अभ्यसेत्। आवृत्तिं च कुर्यात्। अनन्तरं पठनं, लेखनञ्च अभ्यसेत्। संस्कृते श्रोत्राभ्यां श्रवणे, जिह्वया ध्वनीनामुच्चारणे, नेत्राभ्यां शब्दानामभिज्ञाने, हस्ताभ्यां सुन्दरं, शुद्धं लेखने च छात्रं सम्यक्तया समर्थं कुर्यात्।

(ख) ज्ञातादज्ञातं प्रति—छात्राणां पूर्वज्ञानस्य, पूर्वानुभवस्य चाधारेण नवीनपाठस्य, विषयस्य वा अध्यापनम् अत्र अन्तर्भवति। प्रतिदिनं नवार्जितं ज्ञानम् अन्यस्मिन् दिने नवीनपाठाय पूर्वज्ञानं भवति। छात्राः अनेकव्यक्तीनां स्थानानां च नामानि जानन्ति। परन्तु छात्राः एतत् न जानन्ति, यत् व्याकरणे नाम्नां संज्ञा इति व्यवहारो भवतीति, तथैव संज्ञापदानां स्थाने प्रयुज्यमानाः शब्दाः सर्वनामानि भवन्तीति एवं व्याकरणपाठे छात्राणाम् पूर्वानुभवस्य आधारेण नूतनविषयाणाम् अध्यापनं सुकरं भवति।

(ग) सरलात् कठिनं प्रतिः—इदं सूत्रं पूर्वसूत्रेण सांक सादृश्यं भजते। ज्ञातविषयः सरलविषयो भवति। अज्ञातश्च कठिनः। अध्यापकः सरलविषयम् आदौ पाठयेत् ततः परं कठिनम्। संस्कृतशिक्षणे सरलानि, लघूनि वाक्यानि प्रथमं पाठयेत्। तदनन्तरं कठिनानि दीर्घानि वाक्यानि। उपमालङ्कारं पाठयित्वा रूपकालङ्कारं पाठयेत्। छन्दसि अनुष्टुप् अनन्तरम् उपजातिमन्दाक्रान्तादिवृत्तानि बोधयेत्।

(घ) स्थूलात् सूक्ष्मं प्रति—यस्मिन् कस्मिन्नपि कार्ये आदो स्थूलवस्तुभिः आरभ्य सूक्ष्मवस्तु प्रति प्रस्थातव्यम्। व्याकरणे सूक्ष्मनियमानामध्यापनीयम्, आदौ व्यावहारिकाणि, पाठ्यपुस्तकस्थानि वा उदाहरणानि प्रस्तोतव्यानि। संस्कृतशिक्षणे स्थूलानि वस्तूनि प्रदर्श्य तेषां नाम, स्वरूपं, स्वभावश्च क्रमशः वर्णनीयाः। कन्दुकं प्रदर्श्य इदं कन्दुकम् इति वक्तव्यं प्रदातुं शिक्षकाः प्रभवन्ति। तथैव पठामि, लिखामि, चलामि इत्यादीनां क्रियापदानां ज्ञानम् अभिनयेन वर्णनात्मकनिबन्धानां बोधनात्परं भावात्मकनिबन्धाः बोध्याः, यतो हि वर्णनात्मकनिबन्धाः स्थूलवस्तुसम्बद्धाः भवन्ति। भावात्मकास्तु सूक्ष्मवस्त्वाधारिताः भवन्ति।

(ङ) पूर्णात् अंशं प्रति—बालः प्रथमं समग्रं वस्तु पश्यति। ततः परमेव तस्य दृष्टिः तद्वस्तुगतेषु अवयवेषु गच्छति। अयमस्य स्वभावः। अतः मनोवैज्ञानिकदृष्ट्या विवेचनीयस्य विषयस्य, वस्तुनो वा समग्रं रूपम् छात्रेभ्यः पुरतः उपस्थाप्य ततः तस्य सूक्ष्मांशानां विवेचनं कर्त्तव्यम्।

(च) अनुभवात् तर्कं प्रति—छात्रैः अनुभूता विषयाः शिक्षणस्य आधारा भवेयुः। अनुभूतविषयाणाम् आधारेण लब्धं ज्ञानं स्पष्टं स्थिरञ्च भवति। उद्यानविषयकः पाठः, छात्राणाम् उद्यानसम्बद्धैः पूर्वानुभवैः पाठयितव्यः। तथैव होलिकोत्सवः इति पाठः, होलीसम्बद्धपूर्वानुभवैः पाठनीयः।

(ज) विशेषात् सामान्यं प्रति—इदं सूत्रम् उदाहरणेभ्यो नियमं प्रति इत्यपि व्याख्यातुं शक्यते। अत्रादौ उदाहरणानि प्रस्तूयन्ते। ततः सामान्यनियमः बोध्यते। व्याकरणशिक्षणे अस्य सूत्रस्य विशेषोपयोगो वर्त्तते। लक्ष्याणां परिशीलनेन लक्षणानां निर्माणं छात्रेभ्यः सुकरं सुबोधं च भवति।

(झ) विश्लेषणात् संश्लेषणं प्रति—सूत्रमिदं पूर्णादंशं प्रति इति सूत्रस्य विपरीतं भवति। अत्र प्रथमं विषयस्य विभिन्ना अंशाः पृथक्-पृथक् पाठ्यन्ते। ततः तेषाम् अंशानां संश्लेषणेन समग्रस्वरूपं बोध्यते। वाक्यसंरचनाः, सन्धयः, समासाः, प्रकृतिप्रत्ययज्ञानमित्यादिविषयाणां बोधने सूत्रस्य उपयोगः सुनिश्चितः।

(ञ) अनिश्चितात् निश्चितं प्रति—प्रारम्भे बालानां विभिन्नवस्तूनां ज्ञानम् अनिश्चितम्, अस्पष्टं च भवति। तत् निश्चितं स्पष्टं च कर्त्तुमेतत्सूत्रम् अनुसरणीयं विद्यते। छात्राः रामशब्दस्य फलशब्दस्य च रूपाणि सर्वासु विभक्तिषु समानानीति चिन्तयति। अध्यापकः तत्रस्थं भेदं स्पष्टं कुर्यात्। एवं संस्कृतशिक्षणस्य विषयान्तरेष्वपि छात्राणाम् निश्चितज्ञानस्य निश्चितत्वं सम्पादयेत्। संस्कृतशिक्षकाः यदा एतान् सिद्धान्तान् अनुसृत्य संस्कृतशिक्षणं विधास्यन्ति तदा शिक्षणं नूनं साफल्यमेष्यति।

❑

९. संस्कृतसम्मेलनानां संस्तुतयः

संस्कृतभाषायाः साहित्यस्य प्रचाराय प्रसाराय च सम्मेलनानि सर्वकारेण सर्वकारेतरसंस्थाभिश्च कानिचन सम्मेलनानि आयोज्यन्ते। तानि यथा—

(१) विश्वसंस्कृतसम्मेलनम्।
(२) अखिलभारतीय प्राच्य विद्यापरिषत् सम्मेलनम्।
(३) W.A.V.S. विश्वस्तरीयवैदिकशिक्षासम्मेलनम्।
(४) राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली।
(५) संस्कृतभारती, नवदेहली।
(६) लोकभाषाप्रचारसमितिः, पुरी।
(७) राष्ट्रियसंस्कृतविद्यापीठम्, 'तिरुपतिः'।
(८) संस्कृतविश्वविद्यालयाः।

विश्वसंस्कृतसम्मेलनम्—

एतत्सम्मेलनं वर्षद्वये एकवारं भवति। २००१ तमे वर्षे देहलीनगरे, २००३ तमे च वर्षे फिनलैण्ड देशे इदं सम्मेलनं जातम्। स्कोटलैण्ड देशस्य हेमिल्टननगरे २००६ मध्ये जातम्। तथा च अग्रे सम्मेलनमिदं २००८ तमे वर्षे जापान देशस्य राजधान्यां टोकियोनगरे भविष्यति। सम्पूर्णानन्द संस्कृतविश्वविद्यालयस्य कुलपति महोदयाः (प्रो.) डॉ. वेम्पुटिकुटुम्बशास्त्रि महोदयाः अध्यक्षरूपेण इदानीं सन्ति।

विश्वसंस्कृतसम्मेलनस्य संस्तुतयः—

(१) संस्कृतभाषया न केवलमाधुनिकभारतीयभाषाणां विकासः अपि तु बह्वीनामेशियाभाषाणां यूरोपीयभाषाणाञ्च विकासोऽभवत् भवेच्च। अत एव विश्वभाषासु संस्कृतस्य विशिष्टं स्थानं भवेत्।

(२) प्रौद्योगिक्याः विकासेन समग्रः विश्वः वेगेन संकुचितः भवति। अतः संस्कृतं विश्वभाषा भवेत्।

(३) संगणकयन्त्राय संस्कृतमत्यन्तसहजभाषा वर्तते इति संगणकविशेषज्ञाः प्रतिपादयन्ति। अतः संगणक यन्त्रेषु अभिक्रमितभाषारूपेण संस्कृतविकासाय विशिष्टाः परियोजनाः स्वीकरणीयाः।

(४) भारतदेशः बहुभाषाभाषिणां देशः, बहुभाषाणां पठनसामर्थ्येन भाषाधिगमकौशलं वर्धते। एतदर्थं सर्वाभ्यः भारतीयभाषाभ्यः काचिद् समाना प्राणभूता एका लिपिर्भवेत् अतः अस्मिन् विषये तज्ज्ञैः प्रयत्नः विधेयः।

(५) संस्कृतवाङ्मयं नाम ज्ञानस्य भण्डागारः, तस्य पोषणं प्रसारणञ्च करणीयं वर्तते।

(६) द्वादशकक्षापर्यन्तं संस्कृतमनिवार्यरूपेण पाठयेत्। उच्चस्तरेषु संस्कृताध्ययनाय छात्रवृत्तिः प्रदेया।

(६) संस्कृतपठितृणां पठितवतानाञ्च जीविकार्जनोपायाः संवर्द्धनीयाः।

(७) प्राथमिकस्तरीयच्छात्राणां कृते आधुनिकशैक्षणिकविधीनां माध्यमेन संस्कृतं पठनीयम्।

(८) बहुकालात् संस्कृतं भाषितभाषा आसीत्। इदानीमपि अस्ति। अतः संस्कृतभाषायाः भाषितभाषात्वं संवर्द्धयितुं बहवः कार्यक्रमाः संचालनीयाः।

(९) भारतीयसंविधानस्य रचयिता डॉ. अम्बेडकर महोदयेन संविधानसमितेः समक्षं वादप्रतिवादप्रसङ्गे प्रदत्तानां संस्कृतसम्बद्धानां विचाराणां यथासम्भवं व्यापकः प्रचारः करणीयः।

('The Sunday Hindusthan Standerd Sept. 11, 1949' अस्यां पत्रिकायां संस्कृतभाषायाः कृते विचाराः।)

(२) अखिलभारतीयप्राच्यविद्यापरिषद् सम्मेलनम्—

सम्मेलनमिदं वर्षद्वये एकवारं भारतदेशे भवति। (४३) त्रिचत्वारिंशत्तमं सम्मेलनं जम्मूनगरे ऽभवत्। आगामि सम्मेलनं हरियाणायां कुरुक्षेत्रे नगरे २००७ तमे वर्षे भविष्यति।

४१तमं—पुरीनगर्यां १४-१६ दिसम्बरमासे २००२

४२तमं—वाराणस्यां ४-६ नवम्बरमासे २००४

४३—जम्मूनगरे १२-१४ अक्टूबरमासे २००६

४४—कुरुक्षेत्रे-२००८

(३) 'Wider Association of Vedic Studies'

इयं सर्वकारेतर संस्था वर्तते। अस्याः अध्यक्षमहोदयाः जवाहरलालनेहरू विश्वविद्यालयस्य संस्कृताचार्याः देवेन्द्र झा महोदयाः वर्तन्ते। अनया संस्थया जगद्गुरु रामानन्दाचार्य राजस्थान संस्कृत विश्वविद्यालयेऽपि सम्मेलनमेकं सञ्चालितम्।

संस्थेयं सर्वस्मिन् विश्वे वैदिकपरम्परायाः प्रचारं कुर्वन्ती अस्ति। अस्याः संस्थायाः मध्यमेन प्रमुखानां पण्डितानां विमर्शकाणां वेदज्ञानां विचाराः प्रकटीभूताः भवन्ति। अस्याः संस्थायाः अष्टममधिवेशनं कृषिविज्ञानविश्वविद्यालयः बैंगलूरनगरे प्रचलितम्। नवममधिवेशनं जगद्गुरु रामानन्दाचार्य राजस्थान संस्कृतविश्वविद्यालये २००५ तमे दिसम्बर मासस्य १६ तः १७ दिनाङ्कपर्यन्तं सञ्जातम्।

स्वास्थ्यं तथा सन्तोषः भारतीय चिन्तनं दशममधिवेशनं नवदेहलीमध्ये १५-१६ पर्यन्तं दिसम्बरमासे २००६ तमे वर्षेऽभवत्।

(४) राष्ट्रियसंस्कृत संस्थानम्—

२५ तः २७ दिनाङ्क पर्यन्तं मार्चमासे २००० तमे वर्षे संस्कृतवर्षमभिलक्ष्य राष्ट्रियसंस्कृतसंस्थानस्य त्रिदिनात्मकमखिलभारतीयसंस्कृतशिक्षकसम्मेलनं जात। सम्मेलने भारतदेशस्य विविधेभ्यः कोणेभ्यः ११०० संस्कृतशिक्षकाः विविधस्तरीयाः भागं गृहीतवन्तः।

निर्णयाः—

— संस्कृतविषयेऽपि RAS, IAS परीक्षाः भवेयुः।
— अनिवार्यरूपेण सर्वेषु विश्वविद्यालयेषु संस्कृतविभागो भवेत्
— संस्कृतज्ञानां सर्वत्र नियक्तिः भवेत्।
— संस्कृतं संस्कृतमाध्यमेनैव पाठनीयम्।

संस्तुतयः—

— उच्चमाध्यमिकस्तरपर्यन्तं संस्कृतशिक्षणमनिवार्यतया भवेत्।
— सर्वस्तरेषु संस्कृतशिक्षणं संस्कृतमाध्यमेन स्यात्। एतदर्थं संस्कृत शिक्षकाः प्रशिक्षणीयाः। सर्वेषु राज्येषु सर्वेषां शिक्षकाणां सेवानिरतप्रशिक्षण कार्यक्रमः (In Service Programme) व्यापकरूपेण युद्धस्तरे समायोजनीयाः।
— संस्कृतशिक्षणे गुणवत्ता-आनयनार्थं संस्कृतशिक्षकप्रशिक्षणस्य पाठ्यक्रमे सर्वेषु विषयेषु अध्ययनविधीनां प्रशिक्षणावसरः स्यात्।
— येषु विद्यालयेषु संस्कृतशिक्षकाः न सन्ति तेषु सर्वेष्वपि संस्कृतशिक्षकाणां नियुक्तिः कार्या।
— शास्त्रार्थविचारपरिपाट्याः रक्षणार्थं संस्कृतच्छात्राणां वाक्यार्थ विचारशैल्या प्रशिक्षण व्यवस्था संस्कृतविश्वविद्यालयेषु कल्पनीयाः।

❑

१०. आयोगाः

आयोगः—प्रत्येकस्मिन् निर्धारिते विषये-परिशोधनं कृत्वा तत्रत्यगुणदोषान् विचार दोषानामपकरणाय गुणानां वर्धनायाः भवन्ति केचन प्रस्तावाः आयोगेन प्रस्तुत इदानीं यावत् भारतदेशे अधोलिखितशिक्षासम्बद्धाः आयोगाः घंटिताः।

(१) भारतीयशिक्षायोगः — हण्टर कमिशन्
(२) भारतीयविश्वविद्यालयायोगः (लार्ड कर्जन कमिशन्) १९०२
(३) कलकत्ताविश्वविद्यालयायोगः - सेडलर कमिशन्
(४) विश्वविद्यालयायोगः-राधाकृष्णन् १९४८
(५) माध्यमिकशिक्षायोगः-मुदालियर कमिशन १९५२-५३
(६) शिक्षायोगः-कोठारी कमिशन-१९६४-६६ दौलत सिंह कोठारी
(७) नवशिक्षानीति - १९८६

२. भारतीयविश्वविद्यालयायोगः-१९०२

(१) छात्रेभ्यः शास्त्रीयभाषाणाम पेक्षतीय भाषाणामध्ययनाय यो आदेशः सर्वथानुचितः यतः शास्त्रीयभाषाणां समृद्धञ्च वर्तते।
(२) शास्त्रीयभाषाणामध्ययनेनैव भारतीयो भवेत्।
(३) प्रवेशपरीक्षायाः (परं यस्या कस्या परं शास्त्रीयभाषाणां स्थाने भारतीयभाषायाः आदेशः दत्तः स आदेशः)।
(४) M.A. कक्षायां भारतीयभाषाणामध्य।
(५) B.A. पाठ्यक्रमे भारतीयभाषा रचना स्यात्।
(६) यावत्पर्यन्तं विद्यालयेषु भारतीय रस्य वर्धनं न भवेत् तावत्पर्यन्तं भाषाशिक्षण व्यर्थं भवति।

माध्यमिक शिक्षायोगः (मुदालियर)—

आयोगस्यास्य प्रस्तावाः—१९५२-५३

विद्यालये संस्कृतस्य ज्ञानप्रदानाय अधोलिखिताः प्रस्ताविताः प्रदत्ता—

(१) संस्कृतमनेकभारतीयभाषाणां जननी विद्यते। अतः ज्ञानमस्यावश्यकम्।
(२) संस्कृतभाषा सर्वदा जनानां सांस्कृतिक धार्मिक दृष्टा करोति अतः अस्याः अवहेलनं बुद्धिमता न करणीयम्।
(३) संस्कृताध्ययनेनैव भारतस्य महाग्रन्थेषु भरितं ज्ञानं शक्यते। अतः अस्याः भाषायां अध्ययनाय अवसरः प्रदातव्यः।

कोठारी आयोगस्य प्रस्तावा:—

कोठारी आयोगेन भाषाणामध्ययनाय विचार: प्रस्तावित:।

(१) त्रिभाषासूत्रे संशोधनम्।

(२) विभिन्नभारतीयभाषाणां स्थानम्।

(३) हिन्दीभाषाया: स्थानम्।

(४) आंग्लभाषाया: आवश्यकता।

(५) शास्त्रीयभाषाणामध्ययनम्।

आयोगेन शास्त्रीयभाषाणामध्ययनस्य आवश्यकताञ्च बहुधा स्वीचकर। आयोगेन स्पष्टीकृतं यत् राष्ट्रियशिक्षाप्रणाल्यां विशेषाधिकार: वर्तते। परन्तु त्रिसंस्कृतस्य न वा अन्यस्या: शास्त्रस्थानं दातुं सहमति: दत्ता। योगिन केवलमाधुनिक भाषाणामेव स्थानं भवेदिशय: वर्तते। कदाचिदायोग: अनयायत् मातृभाषाया सह संस्कृतभाषा सस्कृत अथवा मिश्रपाठयक्रमेण भवितुमर्हति कोऽपि जन: अस्य प्रस्तावस्य सहमति एतादृशपरिस्थितिषु विद्यालये पाठ्यक्रमेणामध्ययनं वैकल्पिकरूपेण कदाचित् भवति स्थानं अष्टमीकक्षात: तदग्रे वा भवेत्। आयोगेन संस्कृतविश्वविद्यालय।

माध्यमिकशिक्षायोग:

१. माध्यमभाषा मातृभाषा वा अथवा प्रादेशिकभाषा वा भवतु।

२. देशे अल्पसंख्याका: जना: सन्ति, तेषां मतसम्बन्धिनी भाषा एका विद्यते। तासां भाषाणां अध्ययनविषये प्रत्येकप्रणाली भवेत्।

३. प्राथमिकस्तरे, उच्चप्राथमिकस्तरे च द्वे एव भाषे भवत: तत्रापि एका अवश्यं मातृभाषा भवेत्।

४. माध्यमिक-उच्चमाध्यमिकस्तरयो: अनिवार्यरूपेण द्वे भाषे पाठनीये। एका मातृभाषा। अन्या क्षेत्रीयभाषा।

५. अन्यभाषे ऐच्छिकरूपेण शिक्षणीये। तर्हि संस्कृतस्य कृते ऐच्छिकं स्थानं दत्तम् इति ज्ञायते।

राधाकृष्णायोग:

अस्य आयोगस्य अपरं नाम अस्ति-विश्वविद्यालयायोग:।

१. शिक्षाया: माध्यमभाषा मातृभाषा एव भवेत्।

२. हिन्दीभाषया सह-अन्य-आधुनिक-भारतीयभाषा: योजनीया: सन्ति। परम् उच्चशिक्षा राष्ट्रभाषामाध्यमेन भवतु।

३. अस्माकम् अन्ताराष्ट्रियभाषा वर्तते आङ्गलम्। अत: तस्या: अपि पाठनं भवेत् एव। उच्चस्तरे तस्या: अध्यापनं गौणरूपेण भवतु।

४. भारतीयसंविधानानुसारं राष्ट्रभाषायाः हिन्द्याः उचितरूपेण प्रसारः करणीयः अस्ति। तदर्थं सर्वत्र हिन्दीभाषायाः निवेशः भवेत्।

५. उच्चस्तरे हिन्दीभाषामाध्यमं भवेत्।

संस्कृताचार्याणाम् अधिवेशः

१९५५ तमे वर्षे दिनद्वयात्मका विश्वविद्यालयसंस्कृताचार्याणाम् अधिवेशः (सितम्बर ३० तथा १ अक्तोबर्) नवदेहल्यां समनुष्ठितः आसीत्। अधिवेशस्य अध्यक्षः भारतसर्वकारस्य शिक्षामन्त्रालयस्य तदानींतनसचिवः श्रीहुमयून् कबीर्महोदयः आसीत्। अधिवेशस्य लक्ष्यमस्ति—

१. पाठ्यक्रमस्य पुनर्घटने अध्यापकानाम् अभिप्रायसङ्ग्रहणम्।

२. संस्कृतशिक्षणे परस्परसहयोगः।

हुमयून्महोदयानाम् अभिभाषणस्य सारमेवमस्ति—

विद्यालयेषु, कलाशालासु, विश्वविद्यालयेषु, अन्यसंस्थासु च संस्कृतशिक्षणस्य वर्धनं भवेत्, संस्कृतं पुनः व्यावहारिकभाषात्त्वेन स्थापनीयमिति, येन छात्राः संस्कृतं प्रति आकृष्टाः भवेयुः इति। कबीर् महोदयस्य अभिप्रायेः त्रयः अंशाः विद्यन्ते।

- संस्कृतशिक्षणस्य पुष्टिः।
- संस्कृतस्य व्यावहारिकभाषारूपम्।
- संस्कृतशिक्षणस्य छात्राकर्षकत्वम्।

संस्तुतयः—

- प्राथमिकस्तरे सरलसुभाषितश्लोकानां, स्तुतिपरकश्लोकानां, कथानां च पाठनं मातृभाषायां भवेत्।
- माध्यमिकस्तरे, उच्चमाध्यमिकस्तरे च संस्कृतम् अनिवार्यतया, स्वतन्त्ररूपेण च चतुर्वर्षात्मकं भवेत्।
- स्नातकस्तरेऽपि संस्कृतम् ऐच्छिकरूपेण माऽस्तु। अनिवार्यरूपेण एकं पत्रं भवतु। तत्र संस्कृतस्य प्राथमिकविषयाः (प्राचीनभारतीयेतिहासः, भारतीयतत्त्वशास्त्रं) भवन्तु।
- संस्कृतेन सह या काऽपि आधुनिकभारतीयभाषा शिक्षणीया।
- विविधस्तरानूकूलं संस्कृतशिक्षाविषये अपेक्षितसूचना-सहयोगप्रदानाय अखिल-भारतस्तरे संस्कृतशिक्षासमितिः घटनीया इति भारतसर्वकारः विज्ञापनीयः।
- संस्कृतशिक्षणम् इतोऽपि अभिरुच्यात्मकं, प्रभावोत्पादकं च भवेत्। तदर्थं संस्कृतशिक्षणं प्रत्यक्षपद्धतिमाश्रित्य करणीयम्।
- न्यूनातिन्यूनं पाठशालास्तरे संस्कृतशिक्षणं संस्कृतमाध्यमेन भवेत्।
- प्राचीनविदुषः विहाय विविधस्तरेषु संस्कृताध्यापकानां योग्यताः एवं भवेयुः।

माध्यमिकोच्चमाध्यमिकस्तरयोः—

- तीर्थः, आचार्यः, शास्त्री, शिरोमणिः, विद्वान्, तत्समानयोग्यताः।

महाविद्यालयस्तरे—

- एम्.ए. (संस्कृतम्)/बि.ए. (आनर्स)

विश्वविद्यालयस्तरे—

- एम्.ए. (संस्कृतम्)/बि.ए. (आनर्स), अनुसन्धानोपाधिः/अनुसन्धान-कार्यम्।
- पञ्चवर्षात्मकः स्नातकोत्तरशिक्षणानुभवः।

भारतसर्वकारः, तत्तद्राज्यसर्वकारश्च सम्भूय तालपत्रग्रन्थानां सर्वेक्षण-सङ्ग्रहण-संस्थापन-एकत्रीकरण-प्रकाशनादीनि कार्याणि सम्पादयेताम्। संस्कृतस्य उच्चशिक्षायै, अनुसन्धानकार्याय च सर्वकारेण संस्कृतपीठानि सर्वेषु विश्वविद्यालयेषु स्थापनीयानि। पारम्परिकसंस्कृतशिक्षणाय च अपेक्षितं साहाय्यं सर्वकारेण करणीयम्। शिक्षणाय तत्तच्छास्त्रनिपुणान् पण्डितान् नियोजयेत्।

संस्कृतायोगः

संस्कृतायोगः भारतसर्वकारेण दि. १-अक्तोबर् - १९५६ तमे वर्षे घटितः। अस्य आयोगस्य मुख्यलक्ष्यमस्ति-संस्कृतशिक्षायाः वर्त्तमानस्थितेः समग्रपरिशीलनम्। आयोगः स्वप्रतिवेदनं सर्वकाराय दि. ३० - नवम्बर् - १९५६ तमे वर्षे समर्पयत्। अस्य आयोगस्य अध्यक्षः डॉ. सुनीति कुमार चटर्जी महोदयः। आयोगस्य अन्ये सदस्याः—

१. प्रो. यस्. के.डे., आचार्यः, संस्कृतभाषा तथा साहित्यम्, स्नातकोत्तरानुसन्धानविभागः, संस्कृतमहाविद्यालयः, कोलकाता।
२. श्री टि.आर्. वि. मूर्तिः।
३. सयाजी राव् गैकाड्।
४. श्री जे. हेच्. दावे, निदेशकः, भारतीयविद्याभवनम्, बोम्बे।
५. डॉ. वि. राघवन्, आचार्यः संस्कृतविभागः मद्रास् विश्वविद्यालयः,
६. आस्थानविद्वान् पण्डितराज वि. यस्. रामचन्द्रशास्त्री, शङ्करमठः, बेङ्गलूरु
७. श्री विश्वबन्धुशास्त्री, निदेशकः, विश्वेश्वरानन्दवैदिक-अनुसन्धानसंस्था, होशियार्पूर्
८. डॉ. आर्. यन्. दाण्डेकर्, विभागमुख्यः, संस्कृतविभागः, पूने विश्वविद्यालयः। (सदस्यसचिवः)

उद्देश्यम्—

- संस्कृतशिक्षायाः समग्रपरिशीलनम्।

- विश्वविद्यालय-विश्वविद्यालयेतरसंस्थासु संस्कृतशिक्षापद्धतीनामध्ययनम्।
- संस्कृतानुसन्धानकार्यस्य अभिवृद्धये अपेक्षितसूचनाप्रदानम्।
- संस्कृतशिक्षायां पारम्परिकपद्धतौ विद्यमानानामंशानाम् आधुनिकपद्धतौ उपयोगः।

संस्तुतयः—

विद्यालयेषु संस्कृतम् सर्वेषु विद्यालयेषु अनिवार्यरूपेण संस्कृतशिक्षणाय समीचीनव्यवस्था करणीया।

त्रिभाषासूत्रम्

माध्यमिकविद्यालयेषु त्रिभाषासूत्रस्याधारेण संस्कृतस्य शिक्षणं भवेत्। तत्र—

१. मातृभाषा

२. आङ्गलम्

३. संस्कृतम्/अन्यसांस्कृतिकभाषाः (अरबिक्, पर्षियन्, प्राचीनतमिलम्, लाटिन्, ग्रीक्)। चतुर्थभाषारूपेण हिन्दीभाषाशिक्षणं छात्रेभ्यः कदाचित् भारः भवति। अतः चतुर्भाषासूत्रम् आयोगेन तिरस्कृतम्। कदाचित् हिन्दीशिक्षणं महाविद्यालयस्तरे भवेत्। तदपि मातृभाषा-संस्कृतभाषयोः ज्ञानस्याधारेणैव भवेत्। भाषासूत्रे संस्कृतशिक्षणं तु अनिवार्यमेव। परं सामाजिकशास्त्रे केचन पाठाः संस्कृतसाहित्यसंस्कृतिसम्बद्धाः स्युः।

पारम्परिकपद्धतिः—

संस्कृतस्य पारम्परिकपाठशालापद्धतिः उच्चस्तरे भवेत्। तत्रैव पद्धतिः उत्तमा। परं विद्यालयस्तरे आधुनिकविषयैः (मातृभाषा, आङ्गलम् सामान्यशास्त्रं, गणितं, सामाजिकशास्त्रम्) सह संस्कृतमध्याप्यते। तदर्थं पाठशालापद्धतौ कानिचन परिवर्त्तनानि करणीयानि। तदानीमेव सा विद्यालयस्तरानुकूला भवति।

विद्यालयमहाविद्यालयस्तरौ—

भारते प्रत्येकस्मिन्नपि विश्वविद्यालये संस्कृतविभागः, संस्कृतपीठं वा अवश्यं भवेत्। तथैव विद्यालयविश्वविद्यालयीयपद्धत्योः समन्वयः साधनीयः।

संस्कृतम्-अन्यभारतीयभाषाः—

सर्वासां भारतीयभाषाणां संस्कृतेन सह दृढसम्बन्धः वर्त्तते। अतः बि.ए. (Hons) मध्ये भाषाणामध्ययनं भवतु। परं एम्.ए. सर्वभाषाविभागेषु संस्कृतमनिवार्यरूपेण भवेत्।

संस्कृतशिक्षणम्—

विद्यालयस्तरे संस्कृतशिक्षणमनिवार्यरूपेण भवेत्। प्रारम्भिकस्तरे केवलं शब्दरूपाणां धातुरूपाणां कण्ठस्थीकरणमेव न स्यात्। व्याकरणस्यापि महत्त्वं देयम्। महाविद्यालयस्तरे पाठ्यग्रन्थानां संख्या न्यूनीकरणीया। तेन छात्राणां पठनभारः न्यूनो

भवति। तेन संस्कृतपठने तेषामुत्सुकता वर्धते। पाठशालापद्धतौ एकस्यैव शास्त्रस्य शिक्षणं न भवेत्। विभिन्नशास्त्राणां पाश्चात्यशिक्षणपद्धतीनामाधारेण ज्ञानं प्रदेयम्।

अनुसन्धानम्—

अनुसन्धानकार्याय विश्वविद्यालयेषु पारम्परिकपण्डितानां नियुक्तिः करणीया। विश्वविद्यालयस्य अन्तर्गततया पाठशालाश्च संस्थाप्याः। विविधविश्वविद्यालयेषु सम्पादितम् अनुसन्धानुकार्यं सर्वेषाम् उपयोगाय परियोजनाः कल्पनीयाः—

तालग्रन्थमातृकाः—

समग्रभारते विद्यमानासु तालपत्रमातृकासु संस्कृतसम्बद्धविशिष्टग्रन्थानां सङ्कलनं कार्यम्। संस्कृतानुसन्धानकार्यस्य वस्तु-मूल्य सामर्थ्यादिविषयेषु सम्यक् ज्ञानं देयम्।

संस्कृतविश्वविद्यालयाः—

संस्कृतशिक्षायाः पारम्परिकविधेः उन्नतये, वर्धापनाय च भारतस्य विभिन्नप्रदेशेषु संस्कृतविश्वविद्यालयाः संस्थापनीयाः। एते विश्वविद्यालयाः, पाठशालानां, महाविद्यालयानां च पाठ्यक्रमनिर्धारणं, कार्यपर्यवेक्षणं, परीक्षानिर्वहणं च कुर्युः।

सामान्यसंस्तुतयः—

१. संस्कृतम् अतिरिक्त-आधिकारिकभाषारूपेण उद्घोषयेत्।

२. राष्ट्रियकार्यक्रमेषु, विश्वविद्यालयदीक्षान्तसमारोहेषु, शपथग्रहणेषु, उत्सवेषु, पुरस्कारसमारोहेषु, आधिकारिकतया संस्कृतस्य उपयोगः करणीयः।

३. संस्कृतस्य अपारं साहित्यं, तद्गतसुभाषितानि विद्यालयमहाविद्यालयेषु नैतिक-एकतात्मककार्येषु अवश्यम् उपयोक्तव्यानि।

४. संस्कृतलेखनाय देवनागरीलिपिं देशे सर्वत्र अङ्गीकृत्य, तस्याः लिपेः शिक्षणं छात्रेभ्यः देयम्। तस्मिन्नेव समये क्षेत्रीयलिपीनाम् च उपयोगः कारणीयः।

५. संस्कृते विद्यमानस्य वैज्ञानिक-साङ्केतिकसाहित्यस्य प्रचुरः प्रसारः करणीयः।

६. अखिलभारतीयवैज्ञानिक-साङ्केतिकपारिभाषिकपदकोशः निर्मेयः।

७. ऐ. ए. यस्, ऐ.पि. यस्, मध्ये संस्कृतसंस्कृतिसम्बद्धानां पाठ्यक्रमाणां, व्याख्यानानां च सम्यक् समायोजनं कुर्यात्।

८. संस्कृतभाषायाः सरलरूपमेक्षितम्। न तु सरलीकृतं संस्कृतम्, येन व्याकरणस्य प्राधान्यं हीयते।

९. भारतसर्वकारः यथाशीघ्रं राष्ट्रियसंस्कृतसमितिं स्थापयेत्।

❑

११. संस्कृताध्यापकस्य गुणाः

गुरुः

गुरुर्बन्धुरबन्धूना गुरुश्चक्षुरचक्षुषाम्।
गुरुः पिता च माता च सर्वेषां न्यायवर्त्तिनाम्॥

बन्धुविहीनानां गुरुः एव बन्धुः। अन्धानां यथार्थज्ञानप्रदर्शकः गुरुः एव। ये न्यायमार्गे प्रचलन्ति तेषां माता, पिता - गुरुः एव।

अद्वैतोपनिषदि—

गुशब्दः अन्धकारः स्यात् रुशब्दस्तन्निरोधकः।
अन्धकारनिरोधत्वाद्गुरुरित्यभिधीयते॥

गु इत्यक्षरस्य अन्धकारः, रु इत्यक्षरस्य अन्धकारस्य निरोधकः इत्यर्थः। अज्ञानरूपम् अन्धकारं निरोधयति इति कारणात् गुरु इति कथ्यते।

आगमसारतन्त्रे—

गकारो ज्ञानसम्पन्नो रकारस्सत्वभासकः।
उकारश्शिवतादात्म्यं दद्यादिति गुरु स्मृतः॥

गुरुशब्दे विद्यमानस्य गकारस्य ज्ञानसम्पन्नत्वमित्यर्थः। रकारस्य सत्त्वप्रकाशकत्त्वम् इत्यर्थः। उकारः शिवसान्निध्यं ददाति। एवञ्च गुरुः ज्ञानं प्रापयित्वा, यथार्थसत्वं प्राकाश्य, कैवल्यमार्गं दर्शयति इत्यर्थः।

अत एवोक्तम्—

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥

विविधग्रन्थेषु गुरोः महत्त्वम् एवं प्रतिपादितम्—

रुद्रयामले—

आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविशारदः।
पुत्रदारैश्च सम्पन्नः गुरुरागमसम्मतः॥

मनुस्मृतौ—

निषेकादीनि कर्माणि यः करोति यथाविधिः।
सम्भावयति चान्नेन स विप्रो गुरुरुच्यते॥

अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः।
तमपीह गुरुं विद्यात् श्रुतस्योपक्रिया तथा॥ [1]

यः शिष्यसमूहं व्रतोपनयनसंस्कारैः संस्कृत्य साङ्गां वेदविद्यामध्यापयति सः आचार्य इति व्यपदिश्यते।

पद्मपुराणे—

आचार्यो वेदसम्पन्नो विष्णु (श्च) भक्तो विमत्सरः।
मन्त्रज्ञो मन्त्रभक्तश्च सदा मन्त्रात्मकश्शुचिः॥

अध्यापकः

अध्यापको नाम छात्रेभ्यः-मित्रं, मार्गदर्शकः, तत्ववेत्ता च।

मित्रम्—

लालयेत् पञ्च वर्षाणि दशवर्षाणि ताडयेत्।
प्राप्ते तु षोडशे वर्षे पुत्रं (शिष्यं) मित्रवदाचरेत्॥

मार्गदर्शकः—

शिक्षणं नाम विषयाणामन्वेषणे सहकारः।

The are ot teaching is the art of assisting discovery.

(Mark Van Doren)

शिक्षणं नाम कथं वा मार्गदर्शनं देयमिति ज्ञानम्।

To know how to suggest is the art of teaching. (Ameil)

कस्मैचिदपि मानवाय कोऽपि शिक्षितुं न भवति। यतो हि केवलम् आत्मनि विद्यमानानां शक्तीनामभिज्ञाने सहकरोति। अर्थात् उपदिशति।

You cannot teach a man anything, you can only help him to find it within himself. (Galileo)

तत्ववेत्ता—

अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम्।
वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता॥
यस्य वाङ्मयी शुद्धे सम्यगुप्ते च सर्वदा।
स वै सर्वमवाप्नोति वेदान्तोपगतं फलम्॥[2]

---

1. २-१-४०
2. मनु-४-१५९, १६०

संस्कृताध्यापकस्य योग्यताः

१. भाषाप्रयोगनिपुणता　　२. शास्त्रीयविमर्शनविचक्षणता

३. रसास्वादनशक्तिसम्पन्नता　　४. शास्त्रेषु व्युत्पन्नता

(सं.शि.स-रामचन्द्रनृसिंह अरलीकट्टि-पृ. सं-५०)

श्लिष्टा क्रिया कस्यचिदात्मसंस्था सङ्क्रान्तिरन्यस्य विशेषयुक्ता।
यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव॥

(मालविकाग्निमित्रम्)

लब्धास्पदोऽस्मीति विवादभीरोस्तितिक्षमाणस्य परेण निन्दाम्।
यस्यागमः केवलजीविकायै तं ज्ञानपण्यं वणिजं वदन्ति॥

(मालविकाग्निमित्रम्)

नारुन्ददः स्यांदार्त्तोऽपि न परद्रोहकर्मधीः।
ययास्योद्विजाते वाचानोलोक्यां सामुदीरयेत्॥ (मनुस्मृतौ)

विश्वविद्यालयानुदानायोगः

शिकक्षस्य नव लक्षणानि प्रत्यपादयत्।

१. शुचिः—शुचिः द्विप्रकारका भवति-बाह्यशुचिः, अन्तश्शुचिः।

२. वाचस्वी—अध्यपकानाम् अयं गुणः अत्युत्तमगुणो वर्तते। स्वाभिप्रायप्रकटने समर्थो भवेत्। तथा छात्राणाम् अभिप्रायाः कथं सन्ति इति ज्ञातुं अयं गुणः अतीव उपयुक्तो भवति। आङ्गलभाषायाम् कम्यूनिकेषन् स्किल्स् इति वदामः। अत एव वदन्ति-पाण्डित्यं भिन्नम्। अध्यापनं भिन्नम्। अध्यापनम् एका कला इति।

३. वर्चस्वी—आकर्षणशक्तिः। अयं गुणः शारीरिकसम्बद्धः नास्ति। अयं तु कश्चन मानसिकः। छात्रान् अध्यापकः स्वगुणैः, प्रवर्त्तनेन च चाकृत्य, तेषु प्रभावमुत्पादयति। तान् प्रभावयति, प्रेरयति च।

४. धृतिमान्—अध्यापकस्य मानसिकधैर्यम् अत्यन्तम् आवश्यकम्। तदानीमेव सः कक्षायां गत्वा आत्मविश्वासेन पाठयितुं प्रभवति।

५. स्मृतिमान्—स्मरणशक्तिमान्। अध्यापकः सदा पठनशीलो भवेत्। तेन पाठनाय पूर्वसन्नाहः सम्यग्भवति। कः विषयः कदा, कुत्र पाठनीयः ? इति औचित्यम् अध्यापकाधीनमव। तांस्तान् विषयान् स्मृत्वा स्मृत्वा समये पाठनीयाः।

६. कृतिकः—सम्यक् लेखनसामर्थ्यम्। उपयोगानुसारं लेखनम्। अयं गुणः श्यामफलकलेखननिर्वहणम् इत्युच्यते। अर्थात् श्यामफलके किं लेखनीयम्, कथं लेखनीयम्, कुत्र लेखनीयम् इति विषये अध्यापकस्य ज्ञानं भवेत्। इदमेव ब्लाक् बोर्ड

मेनेजिमेण्ट् इत्युच्यते भवति। कृतिशब्दस्य ग्रन्थः इत्यर्थः विद्यते। ग्रन्थलेखनं च अध्यापकस्य कार्येषु मुख्यतमं भवति।

७. **नम्रता**—विनयस्वभावः।

विद्या ददाति विनयं विनयाद् याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततस्सुखम्॥ इति॥

८. **उत्साही**—अध्यापकः सर्वदा सक्रियः भवेत्। पठने, पाठने सक्रियो यदि भवति तर्हि छात्रा अपि सक्रिया भवन्ति। कक्ष्यायाः वातावरणम् उत्साहपूर्णं भवति चेत् छात्राः प्रेरणां प्राप्य, अधिगमे सक्षमाः भवन्ति।

९. **जिज्ञासुः**—"यावज्जीवितमधीते विप्रः" इत्यार्योक्तिः। नूतनविषयाणां परिज्ञानाय सर्वदा यतेत्। अत एव वदन्ति-शिक्षकः सर्वदा छात्रः। सरलता, सत्यता, आत्मसंयमः, सहानुभूतिः, भावात्मकसंतुलनम्, तार्किकशक्तिः, आत्मोत्साहः, बोधगम्यता, कुशलता, चिन्तनशक्तिः इत्यादिगुणविशिष्टः अध्यापकः एव उत्तमनागरिकान् निर्मातुं शक्नुयात्। अपि चोक्तम्—

वस्त्रेण वपुषा वाचा विद्यया विनयेन च।
वकारैः पञ्चभिर्युक्तः गुरुः प्राप्नोति गौरवम्॥

आङ्ग्लभाषायाम् अध्यापकस्य निर्वचनानि

1. The mediocre teacher tells. The good teacher explains. The superior teacher demonstrates. The great teacher inspires.

—W.A. Ward

2. A good teacher must know how to arouse the interest of the pupil in the field of study for which he is responsible, he must himself be a master in the field and be in touch with the lastest developments in his subject, he must himself be a fellow traveller in the exciting pursuit of knowledge.

—S. Radhakrishnan

3. A teacher affects eternity, no one can tell where his influence stops. —Henry Adams

4. A teacher who is attempting to teach without inspiring the pupil with a desire to learn is hammering on cold iron.

—Horace Mann.

अध्यापकस्य योग्यताः

Prof. R. Devanathan महोदयस्य अनुसारणम्—

1. Apptitude for comprehensing the situation.
2. Identifying practice problems of thought, topic and the transformer.
3. Thinking imaginary solutions.
4. Sysmating and analyzing abilities.
5. Attempting for innavatioins in the prevailing system and approach.
6. competenced to infer conclusions.

❑

१२. संस्कृतशिक्षणविधयः

संस्कृतशिक्षणे अनेके विधयः सन्ति। एते विधयः द्विविधाः भवन्ति। (अ) परम्परागतविधयः (आ) आधुनिकविधयः। पाठशालाविधिः, व्याकरणानुवादविधिः पाठ्यपुस्तकविधिः इत्यते त्रयः परम्परागतविधिमध्ये अन्तर्भवन्ति।

पाठशालाविधिः

प्राचीनकाले शिक्षायाः मुख्योद्देश्यं भवति पुरुषार्थचतुष्टयसम्पादनम्। अस्य विधेः मुख्य आशयः अस्ति यत्—"आचार्यः पूर्वरूपम्। अन्तेवास्युत्तररूपम्। विद्या सन्तिः। प्रवचनं सन्धानम् इति (तैत्तरीयोपनिषत्)। उपनयनसंस्कारानन्तरं वटुः अन्तेवासी भूत्वा, १२ वर्षम् यावद् गुरुकुले उषित्वा वेदवेदाङ्गादीनि पठति स्म। अत एव गुरुकुलविधिरिति प्रसिद्धरागता। अस्यैव विधेः पण्डितपद्धतिः, व्याकरणपद्धतिः, प्राचीनपद्धतिः इति नामानि सन्ति। पद्धतिरियं प्राचीनभारतीयशिक्षाप्रणाल्याः प्रतिनिधिरूपा वर्तते। पाठशालासु, आश्रमेषु, मठेषु, गुरुकुलेषु, विद्यापीठेषु च अस्याः पद्धतेः उपयोगः विद्यते।

उद्देश्यानि—

१. भारतीयसंस्कृतेः परिरक्षणम्।
२. संस्कृतशास्त्राणां गभीराध्ययनम्।
३. स्मरणशक्तेः वर्धनम्।
४. आत्मसंयमः, मौलिकचिन्तनं, तर्कशक्तिः-इत्यादीनां गुणानां वर्धनम्।
५. आदर्शपण्डितानां निर्माणम्।
६. स्वाध्यायं प्रति अभिरुच्युत्पादनम्।
७. शास्त्रार्थप्रशिक्षणम्।
८. उच्चारणसामर्थ्यसम्पादनम्।
९. मौखिकाभ्यासे ध्यानम्।

पाठ्यक्रमः—

अयं पाठ्यक्रमः ८ वर्षेभ्यः १० वर्षपर्यन्तं प्रचलति।

(क) प्रारम्भे शब्दरूपावलिः धातुपाठः, समासचक्रं, अमरकोशः इत्यादीनां कण्ठस्थीकरणम्।

(ख) ◆ साहित्यस्य परिचयः।
◆ लघुसिद्धान्तकौमुदीमाध्यमेन व्याकरणस्य पाठनम्।

- सूत्राणां कण्ठस्थीकरणम् तथा व्याख्यायाः प्रस्तुतीकरणम्।
- संस्कृते सरलगद्य-पद्यांशानां पाठनम्।
- मध्यमकौमुदीपाठः।

(ग) ततः उत्तरावस्थायां सिद्धान्तकौमुदी, अष्टाध्यायी, महाभाष्यादिग्रन्थानां पाठनम्। अर्थात् व्याकरणस्य गंभीराध्ययनम्।

- काव्यानां, प्रकरणग्रन्थानां दृढतरम् अध्ययनम्।

अनन्तरम्-काव्यग्रन्थानां विभागः पञ्चधा कृतोऽस्ति। यथा-कविता, गद्यं, नाटकं चम्पूः साहित्यकसमालोचनञ्च इति। पद्यपाठे पञ्च महाकाव्यानां (रघुवंशः कुमारसम्भवम्, किरातार्जुनीयं, शिशुपालवधः तथा नैषधचरितम्) पाठनम्। गद्ये तावत्-हितोपदेशः, पञ्चतन्त्रम्, दशकुमामरचरितं, वासवदत्ता, हर्षचरितं, कादम्बरी इत्यादीनां पाठनं कार्यम्। नाटकेषु-मृच्छकटिकम्, अभिज्ञानशाकुन्तलम्, उत्तररामचरितं, वेणीसंहारः, मुद्राराक्षसमित्यादीनां पाठः करणीयः। चम्पूग्रन्थेषु जातकमाला, रामायणचम्पूः, विश्वगुणादर्शचम्पूः- इत्यादीनामध्ययनं कारणीयम्।

प्रकरणग्रन्थेषु—

काव्यप्रकाशः, साहित्यदर्पणः, रसगङ्गाधरः, चन्द्रालोकः, कुवलयानन्दः, वक्रोक्तिजीवितं, काव्यमीमांसा, ध्वन्यालोकः-इत्यादयः भवेयुः। अनन्तरं वृत्तरत्नाकरः, छन्दः शास्त्रञ्च अध्येयम्। न्यायशास्त्रे तर्कसंग्रहः, मुक्तावली, न्यायसारः न्यायमञ्जरी, ग्रन्थानां परिचयः करणीयः। दर्शनस्यापि प्रारम्भिकग्रन्थानाम् अर्थात् वेदान्तसारः, शाङ्करभाष्यम्, ब्रह्मसूत्रं, पञ्चदशी, चतुस्सूत्रीत्यादिसरलग्रन्थानां सुपरिचयः करणीयः। अपि च संस्कृते विद्यमानानां वैज्ञानिक-आयुर्वेद-ज्योतिषादीनामपि परिचयात्मकस्य अध्ययनस्य अवसरः प्रदातव्यः।

पाठशालाविधेः गुणाः—

- स्मरणशक्तेः वर्धनं भवति।
- गुरुशिष्यसम्बन्धः सुदृढो भवति।
- मौखिककार्याय अपेक्षितं ध्यानं दातुं शक्यते।
- व्याकरणसूत्राणां, शब्द-धातुरूपाणाम् अभ्यासाय पर्याप्तः समयः मेलिष्यति।
- व्याकरणनियमान् ज्ञात्वा साधुशब्दप्रयोगे छात्राः समर्था भवन्ति।
- संस्कृतभाषायाः शुद्धं, विस्तृतं स्वरूपमवगम्यते।
- सुष्ठु उच्चारणाय अवसरः दीयते।
- भाषाकौशलमधिगच्छति।

- शास्त्रपाण्डित्यस्य उत्कर्षः सम्भवति।
- आध्यात्मिकशक्तेः विकासः जायते।
- अनुशासनतामभ्यसति।
- मनोवाक्कायशुद्धिः भवति।
- संस्कृतेः संरक्षणं भवति।
- कण्ठस्थीकरणाय सम्पूर्ण अभ्यासो लभ्यते।

दोषाः—

- मनोविज्ञानसिद्धान्तानां प्रतिकूलेयं पद्धतिः।
- शिक्षणं सर्वं विषयकेन्द्रितं भवति।
- छात्राणां मानसिकक्षमतायाः रुचिभेदानाञ्च उपेक्षाभावो भवति।
- सर्वदा व्याकरणपाठनेन जामितानुभवन्ति।
- केवलं मौखिककौशलस्यैव विकासः भवति। अन्यकौशलानि उपेक्षितानि स्युः।।
- सर्वदा कण्ठस्थीकरणं, स्मरणम्, एताभ्यां व्यक्तित्वविकासो न भवति।
- शारीरिक-मानसिक-सामाजिक-विकासाः कुण्ठिताः भवन्ति।
- प्राचीनपद्धतिः, प्राचीनो विषयः इति कारणतः, आधुनिकविज्ञानस्य परिचयो न भवति।
- व्यावहारिकज्ञानं न स्यात्।
- जीविकोपार्जने असमर्था भवन्ति।
- विषयः एक एव। कालस्तु सुदीर्घः। परिश्रमः अधिकः।
- छात्राणां ज्ञानम् एकस्मिन्नेव क्षेत्रे सीमितं भवति।

निष्कर्षः —

व्याकरणं यदि भाषया, साहित्येन साकं पाठयति चेत् रुचिपूर्णं वति। बोधने दृश्यश्रव्योपकरणानामुपयोगः करणीयः। कण्ठस्थीकरणांशानां न्यूनीकरणं विधेयम्। व्याकरणेन साकं नूतनविषयाणां समावेशः करणीयः। मनोवैज्ञानिकसिद्धान्तानामाधारेण शिक्षणं भवेत्।

व्याकरणानुवादविधिः

अस्य विधेः प्रवर्त्तकः श्रीरामकृष्णगोपालभण्डारकरमहोदयः। सः स्वग्रन्थस्य भूमिकायामेवं व्यलिखत् यत्—

संस्कृतभाषागहनं प्रविविक्षूणां मार्गोपदेशिकेयं पाठावलिर्ग्रथ्यते। अस्यां चैकैकस्मिन् पाठे पूर्वं प्रकृतिप्रत्ययाङ्गकार्यादीनि प्रदर्श्य पश्चाद्यथासम्भवं

सुप्तिङ्कृदन्तानां रूपाणि वाक्ये प्रयुज्योदाहरिष्यामि। तानि च वाक्यान्याङ्गलभाषया विद्यार्थिनो विपरिणमयेयुः। तथैवाङ्गलवाक्यानि पाठान्ते लेखिष्यमाणानि संस्कृतरूपं प्रापयेयुः। इत्थमल्पायासेनैव यान्यत्र विभक्त्यादिरूपाण्युपनिर्भत्स्यन्ते। तान्यध्येतुः स्मृतौ दृढमवगाहनि भविष्यति। संस्कृतवाक्येषु व्युत्पत्तिस्तद्रचनायां चाल्पमतिपाटवं समासादितं च भविष्यति।

संस्कृतं जिज्ञासूनामीप्सितसिद्धिकृत्सु रघुवंशादिकाव्येषु सत्सु किमर्थोऽयं यत्न इति चेदुच्यते। काचिदप्यपरिचितपूर्वा भाषा तस्या व्याकरणमनधीत्य न सम्यग् ज्ञायते। एतदेवाभिप्रेत्य व्याकरणप्रयोजनेषु लघ्वसन्देहाविति प्रयोजनद्वयं कात्यायनः परिसंचख्यौ भाष्यकृत् चेन्द्रबृहस्पत्याख्यायिकामुदाजहार। ननु तर्हि सहैव काव्येन लघुकौमुदी तत्सदृशोऽन्यो वा व्याकरणग्रन्थोऽप्यधीयता किं पुनरनया पाठावल्येति चेत् न। तादृशानां ग्रन्थानां बालकैः प्रौढवयस्कैरपि परिश्रमोऽपेक्ष्यते। न तथेदृशस्य ग्रन्थस्य तस्य सरलान्वयिवाक्यवत्त्वात् तद्गतव्याकरणसिद्धान्तानामपि वैशद्येनाभिहितत्त्वात्। एतल्लक्षणस्य ग्रन्थस्याभावात्संप्रति कतिपये नवविद्यार्थिनः संस्कृताध्ययनात्पराजयन्ते तन्मा भूदितीयं पाठावलिर्यथामति विरच्यते॥

उद्देश्यम् —

एकैकपंक्तिशः संस्कृतभाषायाः वर्गीकरणं कृत्वा सरलपद्धत्या प्रस्तुतीकरणम्। संस्कृतव्याकरणे अनपेक्षितनियमान् परीक्ष्य, व्याकरणस्य सरलरूपान्तरणस्य प्रस्तुतीकरणम् कण्ठस्थप्रणालीं विहाय छात्रस्य अवबोधनात्मकशक्तेः जागृतीकरणम्। व्याकरण-अनुवाद-अभ्यासैः संस्कृतपाठनम्। व्याकरणानुवादेषु अभ्यासैः संस्कृतसाहित्यस्य परिचयः।

अत्र व्याकरणरूपाणां सिद्धान्तकौमुद्या अनुसारं वैज्ञानिकक्रमः नास्ति। परं मनोवैज्ञानिकक्रमः वर्त्तते। शब्दानां, धातूनां च सरलरूपाणि आदौ पाठनम्। यदि कठिनरूपाणि भवन्ति तेषां पाठनं स्थगितम्। एवं प्रकारेण सैद्धान्तिकपद्धतेरपेक्षया मनोवैज्ञानिकपद्धत्याः अनुसरणमकरोत्। नियमान् नवीनक्रमेण व्यवस्थाप्य नवीनदिग्दर्शनमकरोत्।

पाठ्यक्रमः —

First Book of Sanskrit

(Being a treatise on grammer with exercises)

पुस्तकेऽस्मिन् आदौ वर्णमाला दत्ता। अत्र ३२ संख्याकाः पाठाः सन्ति। अन्ते पद्यगद्यभागाः, संस्कृतात् आङ्गलम्, आङ्गलात् संस्कृतञ्च दत्ता। अयं ग्रन्थः १८६४ तमे वर्षे प्रकाशितम्।

पाठविभागः—

पाठः	विषयः
	सरलधातुरूपाणि
१, २, ३, ४	लट् परस्मैपदरूपाणि
५, ६, ७, ८, ९	अकारान्त, इकारान्तपुंलिङ्गनपुंसकलिङ्गसंज्ञाः
१०, ११, १२	आत्मनेपदं तथा कर्मवाच्यम्
१३, १४, १५	आकारान्त, ईकारान्तस्त्रीप्रत्यया:
१६, १७, १७	लङ्रूपाणि
१९, २०, २१	स्वरान्तपुल्लिङ्गनपुंसकशब्दाः
२२, २३, २४	लोट् रूपाणि
१५, १६, १७	हलन्तरूपाणि
२८	विधिलिङ्रूपाणि
२९, ३०	सर्वनामशब्दाः

Second Book of Sanskrit

(Being a treatise on grammer with exercises)

इयं संस्कृतमन्दिरान्तः प्रवेशिका नाम पाठावलिः। इदं पुस्तकं १८६८ तमे वर्षे मार्चमासे प्रकाशितम्। अत्र २६ संख्याकाः पाठाः सन्ति। पाठानां विभागः—

पाठः	विषयः
१	सरलधातूनाम् अनियतधातुः
२, ३, ४	५ तः ८ पर्यन्तं विभक्तिः
५, ६	नवमरूपाणि
७, ८, ९, १०	द्वितीयरूपाणि
११	भविष्यत्
१२	तृतीयरूपाणि
१३, १४	लिट्
१५	सप्तमरूपाणि, कर्मवाच्यम्
१६	अनियमितसंज्ञानां रूपाणि
१७	संख्यावाचकाः

१८	तुलनात्मकावस्थाः
१९, २०	समासः
२१, २२	लुङ् रूपान्तराणि १, २, ३
२३	लुङ् रूपान्तराणि ६, ७
२५	सन्नन्तरूपाणि

प्रत्येकं पाठस्यान्ते अभ्यासः, उदाहरणवाक्यानि, पदावलिः न दत्तानि। ग्रन्थस्यान्ते अनुबन्धरूपे इमे विषया दत्ताः—

(क) अभ्यासाः

१. ऐतरेयब्राह्मणम्

२. त्रयाणां धूर्त्तानाम्

३. ब्राह्मणभुजङ्गयोः

४. भर्तृहरिनीतिशतकात् ४२ श्लोकाः

५. कादम्बरीग्रन्थात् कश्चन भागः

(ख) पदावलिः

१. संस्कृतात् आङ्ग्लम्

२. आङ्ग्लात् संस्कृतम्

शिक्षणविधिः—

अत्र चत्वारः अंशाः सन्ति।

१. व्याकरणपाठः–अत्र संस्कृतव्याकरणस्य सोदाहरणव्याख्या, अभ्यासाश्च दत्ताः।

२. संस्कृतात् आङ्गलं प्रति अनुवादाभ्यासः।

३. आङ्ग्लात् संस्कृतं प्रति अनुवादाभ्यासः।

४. शब्दकोशः–अनुवादाभ्यासे सहकरोति।

गुणाः—

१. स्वतन्त्राध्ययनेन संस्कृतज्ञानं प्राप्यते।

२. प्रारम्भिकस्तरीयछात्राणां कृते विधिरयं अनुकूलः, पर्याप्तश्च।

३. अल्पे समये संस्कृतभाषायाः अभ्यासो भवति।

४. वैज्ञानिकप्रक्रियया शिक्षणसूत्राणां माध्यमेन व्याकरणनियमाः सुव्यवस्थिताः, वर्गीकृताश्च।

५. कण्ठस्थीकरणस्य आवश्यकता नास्ति।

६. गुरोः आवश्यकता नास्ति।

७. पुस्तकद्वयं च अध्येतुः स्वयं पन्थानं प्रदर्शयति।

८. शिक्षणसंस्थानां भौतिक–आर्थिकप्रतिबन्धकान् दूरीकरोति।

९. स्वल्पव्यये भाषाभ्यासः भवति।

१०. विद्यालयीयसमयसारण्याः अनुकूलोऽयं विधिः।

११. अयं परिष्कृतविधिः।

दोषाः—

१. भाषायाः महत्त्वपूर्णाङ्गानामुपेक्षा भवति। यथा—उच्चारणं, मौखिककार्यं, रसास्वादनम्।

२. अधिकतया व्याकरणस्यैव प्राधान्येन पठनपाठनं नीरसं, रुचिविहीनं च भवति।

३. पाठानां वर्गीकरणे समग्रता नास्ति। यथा—समासः। सर्वेषां समासानाम् एकत्रैव समावेशः। सन्धिपाठस्य समावेशः बहुपूर्वमेव विहितः। सर्वनामशब्दानां तु अन्ते समावेशः।

४. अनावश्यकधातूनां प्रयोगाभ्यासः पुस्तके (२) आरम्भे एव दत्तः।

५. स्मरणशक्तिवर्धनाय केषाञ्चन विशेषसूत्राणां टिप्पणी प्रदेया आसीत्, परं न दत्ता।

६. कवितायाः रसास्वादनाय बहुविरलः अवसरः दत्तः।

७. गद्य–पद्यपाठेभ्यः पर्याप्तसामग्री न दत्ता।

८. व्याकरणस्यैवायम् एकः विशुद्धग्रन्थः।

भण्डारकमहोदयस्य परिवर्त्तिनः ये लेखकाः सन्ति, ते स्वस्वग्रन्थेषु पुस्तकद्वये विद्यमाना न्यूनताः दूरीकृत्य विषयसामग्रीं निरमिमन्त। अनेन पद्धतिरियं संस्कृताऽभवत्। परं तु अयं परिष्कारः विषयसामग्रीं यावदभवत्। अस्यां पद्धतौ विद्यमानदोषहेतोः पाश्चात्यदेशेषु आधुनिकयूरोपीयभाषाणां, श्रेण्यभाषाणां बहुपूर्वमेव तिरस्कृता वर्त्तते। भाषाया अध्ययनाय केवलं व्याकरणमेव केन्द्रं नास्ति। गद्येन, पद्येन सह व्याकरणस्य पाठनं भवेत्। ईदृशी पद्धतिः व्यावहारिकी तथा मनोवैज्ञानिकी भवति। तदर्थं पाठ्यपुस्तकविधिराविष्कृतः।

पाठ्यपुस्तकविधिः

पाठ्यपुस्तकम् —

कथोपदेशसंयुक्तः रुचिज्ञानाभिवर्धकः।
पाठ्यग्रन्थ इति ज्ञेयः कल्पनाशक्तिपोषकः॥
सरलं सुन्दरं चैव मनोरञ्जनपूर्वकम्।
शीलनिर्माणसंयुक्तं पाठ्यपुस्तकमीरितम्॥

बाह्यलक्षणानि—

- पाठ्यपुस्तकस्य मुखचित्रं रुच्युत्पादकम् प्रभावपूर्णं स्यात्।
- पाठ्यपुस्तकम् आकर्षकञ्च भवेत्।
- मुखचित्रं पाठ्यविषयसम्बद्धं भवति चेत् वरम्।
- पुस्तकस्य मूल्यं यथाशक्ति न्यूनं भवेत्।

पाठ्यक्रमः —

वर्णमाला, लघुलघुपदानि, सरलवाक्यानि, परिच्छेदाः, (अनुच्छेदाः)। द्वितीयभाषारूपेण संस्कृतभाषायाः शिक्षणं भवति, तत्रेयं पद्धतिः समीचीना, अनुकूला, अनुसरणीया च।

उद्देश्यानि—

१. सरलविषयसामग्रीद्वारा संस्कृतशब्दावल्याः वर्गीकरणं कृत्वा, परिचयप्रदानम्।
२. छात्राणां संस्कृतपरिच्छेदानां आदर्शपठने, सुस्वरवाचने च योग्यतासम्पादनम्।
३. सरलसंस्कृतभाषायाः अर्थावबोधः।
४. सरलवर्णानां, मनोरञ्जककथाः, संस्कृतकविताः, गद्यम् इत्यादीनां पठने छात्राणाम् सम्यक् प्रोत्साहप्रदानम्।
५. उच्चकक्ष्यासु संस्कृतसाहित्यस्य परिचयप्रदानम्।
६. मूलपाठस्य उच्चारणं, वाचनं, शब्दधातुरूपावलिः, व्याकरणम् अनुकरणरचना इत्यादीनां विषयाणां द्वारा पाठ्यपुस्तकम्-अध्ययनकेन्द्ररूपेण स्थापनम्।
७. पाठशालाया अनन्तरं च छात्राः संस्कृतस्य अनुवाद-व्याख्यानमाध्यम-साहाय्येन स्वतन्त्ररूपेण च संस्कृताध्ययनं कुर्वन्तु इति।

विधिप्रकारः—

पाठ्यपुस्तकान्तर्गतपाठानां मातृभाषायामनुवादः भवति। कठिनानां शब्दानाम् अर्थाः पाठ्यन्ते। कदाचित् वाक्यानामर्थावबोधश्च क्रियते। प्रसङ्गानुसार व्याकरणस्य

शिक्षणं सहयोगप्रणालीमाध्यमेन बोध्यते। प्रत्येकस्य पाठस्य अन्ते छात्राणां ज्ञानवर्धनाय, पाठितांशस्य स्मरणाय, सम्यक् अभ्यासाय च अभ्यासः दीयते। तस्य अभ्यासः अपि विधीयते। परीक्षा अपि पाठ्यपुस्तकस्य आधारेण एव क्रियते।

अस्मिन् विधौ अध्ययनकेन्द्रं **पाठः** एव भवति। नूतनानां, कठिनानां वा पदानां व्याख्यायाः अवसरे मातृभाषा एव आश्रियते।

पाठानां वर्गीकरणम्—

- प्रथमं प्रवेशिकायां चित्रसहित. पाठस्य प्रारम्भः भवेत्।
- अपि च प्रारम्भदशायां सरलवाक्यानि, लघुवाक्यानि च भवेयुः।
- नूतनशब्दानां प्रत्येकतया अभ्यासाय पाठे तेषां वारं वारम् आवृत्तिः भवेत्।
- पाठः सर्वः अनुच्छेदैः विभक्तः स्यात्।
- पाठेषु केचन पाठाः नूनं कथाविषयकाः भवेयुः।
- यतो हि तादृशाः पाठाः छात्राणां संस्कृतशिक्षणे रुचिमुत्पादयन्ति। अतः तादृशानां कथानां सङ्ग्रहणं कृत्वा, संयोजनीयाः।
- शब्दावलीनां, व्याकरणरूपाणां (लट्, लिट् इत्यादि) क्रमानुसारं पाठानां वर्गीकरणं भवेत्।

प्रत्येकस्मिन् पाठे अधोनिर्दिष्टाः अंशाः नितरां भवेयुः—

- अर्थसहितानां नवीनशब्दानां सूची देया। (कठिनपदानाम् अर्थसहितविवरणम्)
- मौखिकाभ्यासकरणाय पदानामुपरि सङ्केतः दातव्यः। अथवा बृहदक्षरैः।
- व्याकरणस्य, अनुवादस्य च लेखनरूपी अभ्यासः प्रदातव्यः।
- व्याकरणस्य नवीनशब्दरूपाणां, सन्धिसमासादिरूपाणां, क्रियारूपाणां तथा नियमानां च व्याख्यानं देयम्।
- आवश्यकतानुसारं शिक्षकाणां कृते सूचनाः दातव्याः।

दोषाः—

- संस्कृतशिक्षणं सर्वं केवलं पाठ्यपुस्तकाधारितं भवति।
- छात्राणां संस्कृतभाषाज्ञानं गभीरं व्यापकं च न भवति।
- शब्दार्थस्य, वाक्यार्थस्य अधिकं बलं दीयते।
- मौखिकं तथा लेखनकार्यं बहुसीमितं भवति।
- अध्यापकस्य प्राधान्यम् अधिकं भवति। छात्राणां कार्यं न्यूनं भवति।
- छात्राः निष्क्रियाः भवन्ति। तेन कारणेन पाठानां पठने रुचिः न भवति।

- कण्ठस्थीकरणस्य अधिकप्राधान्यं भवति।
- मानसिकविकासः न भवति।
- पाठ्यपुस्तकमेव साध्यं भवति।

गुणाः —

- संस्कृताध्यापकद्वारा आदर्शवाचनं, छात्रैः अनुवाचनं, सुस्वरवाचनं मौनवाचनं वा क्रियते इति कृत्वा उच्चारणसामर्थ्यं सम्यक् भवति।
- शब्दावलीनां ग्रहणं पुनः स्मरणं च सुकरं भवति।
- संस्कृतशिक्षणे पाठ्यपुस्तकं साधनरूपेण उपयुज्यते।
- पाठ्यक्रमः नियमितरूपेण भवति।
- सर्वत्र समरूपता दृश्यते।

कानिचन मुख्यानि पाठ्यपुस्तकानि—

१. ईश्वरचन्द्रविद्यासागरः-संस्कृतपाठ्यपुस्तकम्-१, २, ३ भागाः।
२. पि. वि. गुप्ता-संस्कृतबोधः-१, २, भागौ कोलकाता।
३. जीवानन्दविद्यासागरमुद्रणालयः-संस्कृतशिक्षामञ्जरी-१, २, ३, ४ भागाः— कोलकाता
४. बि.बि. कमला-सुबोधसंस्कृतम्—१, २, ३ भागाः पुणे (पुण्यपत्तनम्)।
५. H.C. Bandhopadhaya-New Method in Sanskrit-Dacca
६. C.R. Lakshman-Sanskrit Reader-Madras
७. S.D. Satwalaker-Sanskrit Self Teacher-Four Parts

एवंप्रकारेण प्रायः ५० पाठ्यपुस्तकानि प्रसिद्धानि सन्ति।

निष्कर्षः—

आधुनिकसन्दर्भे अनया पद्धत्या संस्कृतशिक्षणं निष्क्रियापरं, यान्त्रिकं मनोवैज्ञानिकसिद्धान्तानां प्रतिकूलं च भवति।

वार्त्तालापविधिः

'लप' व्यक्तायां वाचि इत्यस्मात् धातोः आङ् इति उपसर्गयोजनेन आलाप इतिः निष्पद्यते। "स्यादाभाषणमालापः" इति अमरकोशवचनानुसारं आसमन्तात् भाषणम् आलापः भवति। का नाम वार्त्ता इति विचिकित्सायां वार्त्ता नाम लोकवृत्तम्। वार्त्तालापकरणसमये एतेषु विषयेषु विशेषध्यानं देयमस्ति।

१. भाषाशुद्धता—

शब्दानां समुचितरीतिसहिता।

लोकव्यावहारदृष्ट्या सिद्धभाषा।

सूक्ति-सुभाषितयुक्ता।

व्याकरणपरिष्कृता। यथा—

यस्य षष्ठी चतुर्थी च विहस्य च विहाय च।
यस्याहं च द्वितीया स्यात् द्वितीया स्यामहं कथम्?॥

यस्य जनस्य विहस्य इति शब्दः षष्ठीविभक्तिः, विहाय इति शब्दः चतुर्थीविभक्तिः, अहम् इति शब्दः द्वितीया विभक्तिः भवति, तस्य कथमहं भार्या भविष्यामि इति काचन विदुषी वदति। अतो भाषाशुद्धतायै विशेषः प्रयत्नः कार्यः।

२. शिष्टभाषा—

वार्त्तालापकरणसमये अध्यापकेन सा भाषा नोपयोक्तव्या यया छात्रेषु समाजे च अनादरः भवति। समाजे विद्यमानान् सदाचारान् मनसि निधाय वार्त्तालापः करणीयः। देश-काल-पात्रताः चिन्तयित्वा भाषणीयम्। प्लुतार्क महोदयेन उक्तं यत् "भवान् तद् वदति, यद्वक्तुमिच्छति, भवान् तथा न वदति यद् वक्तव्यमस्ति"।

३. प्रभावोत्पादकता—

केवलं शुद्धभाषायाः प्रयोगेणैव श्रोतृषु प्रभावः न पतति। मुखात् प्रत्येकम् अक्षरं शुद्धं, समुचितध्वनिपूर्वकं निस्सरेत्, तदानीमेव छात्राणां मनस्सु अध्यापकस्य प्रभावः पतति। शुद्धभाषायाः शुद्धोच्चारणमपि अत्यावश्यकम्।

४. वाणीपटुता—

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता॥

संभाषणस्य वाण्याः स्वरूपं किमिति विचार्यमाणे सति—

प्रसन्नाः कान्तिहारिण्यो नानाश्लेषविचक्षणाः।
भवन्ति कस्यचित् पुण्यैः मुखे वाचो गृहे स्त्रियः॥
तथ्यं पथ्यं सहेतुप्रियमतिमृदुलं सारवद्दैन्यहीनं
साभिप्रायं दुरापं सविनयमशठं चित्रमल्पाक्षरञ्च।
बह्वर्थं कोपशून्यं स्मितयुतघनदाक्षिण्यसंदेहहीनं
वाक्यं ब्रूयात् रसज्ञः परिषदि समये सप्रमेयाप्रमत्तम्॥
सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्।
प्रियं च नानृतं ब्रूयाद् एष धर्मः सनातनः॥

भाषापटुतायै उपायः—

(१) शिष्टजनसंसर्गः। कक्ष्यायां विभिन्नावसरेषु योग्यतापूर्वकभाषणाय पाठ्यपुस्तकानां सहायता स्वीकरणीया।
(२) मौखिकवार्त्तालापः।
(३) नाटकानां माध्यमेन अभ्यासः।
(४) परस्परशास्त्रार्थः।
(5) व्याख्यानम्।

वार्तालापविधेः अभ्यासाय पाठ्यपुस्तके अधो निर्दिष्टाः पाठाः भवेयुः। अतिथिस्वागतम्, सुहृद्वार्ता, यात्राचारः, समाचारः, विद्यालयाचारः, पण्डितानां सेवा, सभाकार्यक्रमः, शास्त्रचर्चा, गुरुसेवा।

लाभाः—

- गुरुः, छात्राश्च सक्रिया भवन्ति।
- शिक्षणं रुचिपूर्णं भवति।
- भाषाशिक्षणकौशलेषु आद्यद्वयस्य (श्रवणभाषणयोः) अभ्यासः भवति।

दोषाः—

- समयः अधिकः अपेक्षते।
- पद्यपाठाः, तत्रापि वर्णनात्मकपाठाः ये सन्ति, तेषां पाठनं पठनं च कष्टतरं भवति।

प्रत्यक्षविधिः

विद्यमानेषु इन्द्रियेषु दशसु नयनमेव प्रधानं भवति। 'सर्वेन्द्रियाणां नयनं प्रधानम्' इति वाक्यस्य अयमेव भावः। चक्षुरिन्द्रियजन्यं ज्ञानं प्रत्यक्षम् इति तर्कसंग्रहवाक्यमपि अमुमेव भावं द्रढयति। चतुर्षु प्रमाणेषु प्रत्यक्षप्रमाणमेव नितरां वरमिति सिद्धान्तः अपि दरीदृश्यते। मातृभाषायाः, आङ्ग्लभाषायाः, अन्यस्याः भाषायाः वा सहायतां माध्यमं वा विना संस्कृतशिक्षणं भवति। अस्यैव निर्बाधविधिः इति नाम। रामं प्रति कौसल्या कथाकथनसमये चन्द्रस्य दर्शनं दर्पणे कारयति। अस्यैव विधेः मातृशिक्षणविधिरिति (मदर्स मेथड्) इति नाम। मातृभाषायाः, आङ्ग्लभाषायाः, अन्यस्याः कस्याः वा अपि भाषायाः वा सहायता नापेक्षिता वर्त्तते।

विधिप्रक्रमः—

अस्यां पद्धतौ पाठ्यसामग्र्या मातृभाषायामनुवादः नैव क्रियते। संस्कृतभाषाशिक्षणाय संस्कृते एव श्रवणं, भाषणं, पठनं, लेखनं च करणीयम्। कक्षायाः वातावरणमपि एवमेव भवेत्, येन छात्राः संस्कृतभाषाशिक्षणे रुचिं प्रदर्शयेयुः। परस्परवार्त्तालापोऽपि यथासम्भवं संस्कृते एव कार्यः। अध्यापनं सर्वं संस्कृतभाषामाध्यमेनैव भवेत्। संस्कृत एव प्रश्नकरणं भवेत्. संस्कृते एव उत्तरप्रदानार्थं प्रोत्साहः दातव्यः। एवं प्रकारेण क्रियेत चेत् न केवलं संस्कृते लेखनं, पठनं, किन्तु अर्थावबोधः, भाषणमपि मातृभाषावत् सहजतया भवति।

लाभाः—

- भाषाशिक्षणस्य मूलसिद्धान्तानाम् अनुकूलः।
- संस्कृतशिक्षणाय विधिरयम् सरले भवति।
- छात्राणां पठने रुचिः, योग्यता, अवधानम् इत्यादयः गुणाः वर्धिताः भवन्ति। अनेन विधिना छात्रा संस्कृतस्य त्वरितवक्रतायै भवन्ति।
- संस्कृतभाषामाध्यमेनैव संस्कृतशिक्षणं भवति।
- अल्पे एव समये प्रायः शब्दानां सुष्ठुतया अर्थावबोधने समर्थाः भवन्ति।
- पाठनात्पूर्वं भाषणस्य प्राधान्यं दीयते।
- छात्राणां संस्कृतस्य शुद्धोच्चारणे अभ्यासः भवति।
- अनया पद्धत्या अभिव्यक्तेः विकासः भवति।
- नियमानां परित्यागं कृत्वा शब्दानां शुद्धोच्चारणे बहुवारं प्रयत्नः विधीयते।

- अस्मिन् विधौ कण्ठस्थीकरणस्य आवश्यकता एव न भवति।
- अत्र व्याकरणस्य अनुवादस्य च प्राधान्यं न्यूनीक्रियते।
- साकारात् निराकारता इति नवीनसूत्रस्य प्रयोगः भवति।
- बहुवक्तव्यस्य, वर्णनस्य वा अवसरः नास्ति।
- संस्कृतशिक्षणे छात्राणामभिरुचिः वर्धते।
- वस्तु शब्दयोः सम्बन्धेः प्रत्यक्षो भवति।

मातृभाषायाः अनावश्यकमाध्यमस्य निराकरणं भवति। इयं भाषाशिक्षणे मूलसिद्धान्तानाम् अनुकूलपद्धतिः। अस्यां पद्धतौ संस्कृतभाषामाध्यमेनैव संस्कृतभाषायाः शिक्षणं भवति। संस्कृतभाषायाः श्रवणस्य, भाषणस्य च कृते पर्याप्तः अभ्यासः मिलति। प्रत्येकं भाषायाः प्रकृत्या काचन शैली भवति। अनुवादकरणेन प्रायः भाषायाः प्रकृतिः उपेक्षिता भवति। स दोषः अत्र न भवति।

अनया पद्धत्या छात्राणां पठने रुचिः योग्यता, अवधानम् इत्यादयः गुणाः भवन्ति। यथा सरलात् कठिनं प्रति इति शिक्षणसूत्राणि सन्ति, तथा अस्मिन् विधौ साकारात् निराकारः मूर्त्तात् अमूर्त्तं प्रति इति सूत्रद्वयस्य उपयोगः भवति।

दोषाः —

- नाम्नि एव दोषो वर्त्तते। मूर्त्त, अमूर्त्तपदानाम् अर्थावबोधनं कर्त्तुं न शक्यते।
- मातृभाषायाः प्रयोगाय अवकाशः एव नास्ति।
- परं मातृभाषायाः चिन्तनमपाकर्त्तुं समर्थः न भवति।
- व्याकरणस्य ज्ञानं विना भाषणं लेखनं वा असाध्यं भवति।
- प्राथमिकदशायाम् अतीव लाभदायको विधिः, परं सर्वेषु स्तरेषु अत्यन्तोपयोगी नास्ति।
- समयः अधिकः अपेक्षते।
- सामान्यविद्यालयेषु सप्ताहे त्रिवारमेव संस्कृतशिक्षणं भवति।
- कक्ष्यायां कदाचित् कृत्रिमं वातावरणं कल्पयित्वा पाठयितुं शक्नुयात्। परं गृहे समाजे च मातृभाषा एव भवति।
- इयं पद्धतिः बुद्धिमतामेव उपकारिणी। सामान्यच्छात्राणां कृते सहकारिणी न भवति।
- प्रारम्भिकस्तरे एवं संस्कृतमाध्यमम् इत्युक्ते छात्राणाम्, अध्यापकानां च क्लेशो भवति।
- रामः रावणं हन्ति। सः फलं खादति। अत्र हन्ति इति शब्दं सन्ति, भवन्ति, इतिवत् बहुवचनरूपमिति चिन्तयति। स फलमित्यत्र सफलं इति मेलनेन अर्थभङ्गः भवति।

निष्कर्षः-

प्रत्यक्षपद्धतेः प्रयोगः आङ्ग्लभाषाशिक्षणे बहुधा कृतः। संस्कृतभाषाशिक्षणमपि केवलं प्रत्यक्षपद्धत्या एव क्रियते चेत् शिक्षणं समग्रं, सफलं च न भवेत्। प्रत्यक्षविधिना साकं व्याकरणानुवादविधिञ्चाश्रयामश्चेत् तदा शिक्षणं रुचिपूर्णं भवति।

संयुक्तविधि:

अस्यैव विधे: समाहारविधि: इत्यापि नाम। बोकिल महोदय: नवीनविधि:, आप्टे महाशय: मनोवैज्ञानिकविधि: इति, ह्यूपरिकर् महोदय: विश्लेषणात्मकविधि: इति अवदन्। अमुमेव विधिम् आश्रित्य केचन प्रसिद्धग्रन्था: लिखिता:। यथा-प्रो. ह्यपरिकर: The Problem of Sanskrit Teaching, प्रो. बोकिल् महोदय: A New Approach of Sanskrit Teaching, Prof. D.G. Apte and Prof. P.K. Dogre—Teaching of Sanskrit in Secondary Schools, आङ्ग्लभाषायां Electric Method इत्युच्यते। एतस्य शब्दस्य अर्थ: भवति—The doctrine/principle of selecting the best from every source.

उद्देश्यम्-

भाषाशिक्षणसिद्धान्तेषु ध्यानं देयम्। मनोवैज्ञानिकप्रक्रियया संस्कृतशिक्षणम्। शब्दावलि:, रचना, अनुवाद:, कविता, गद्यं, व्याकरणम् इत्यादीनां सर्वेषां सम्मेलनेन संस्कृतस्य सम्पूर्णज्ञानम्। उच्चारणम्, मौखिकाभ्यास:, लेखनम् इत्यादिभि: भाषाया: अभ्यास:।

प्रक्रिया-

मौखिककार्यम् प्रारम्भिकावस्थायां भवति। भाषाया: शिक्षणं मौखिकविधिना कृत्वा तत: पाठ्यपुस्तकस्य परिचय: करणीय:। प्राथमिकावस्थायां व्याकरणपाठनं किञ्चिदेव भवति। माध्यमिकस्तरे मूलपाठ: भवति। प्रसङ्गानुसारेण अनुवाद: पठनीय:। उच्चस्तरे व्याकरणग्रन्थानाम् अध्ययनं भवति। व्याकरणेन सह अनुवादस्यापि अभ्यास: विधीयते। प्राथमिकस्तरे केवलं मौखिकाभ्यास: भवति। माध्यमिकस्तरे तु लेखनाभ्यासोऽपि भविष्यति। भाषाया: शिक्षणावसरे प्रत्येकतया दृश्यश्रव्योपकरणानाम् उपयोग: करणीय:। सर्वाङ्गीणविकासाय पाठ्यप्रक्रिया: भवन्ति। परीक्षणं, मूल्याङ्कनं च नूतनमनोवैज्ञानिकपद्धत्या क्रियते। तालिकामाध्यमेन पाठ: सुगमतया पाठ्यते।

नियोजिताध्यनेन (Programmed Learning), संरचनात्मकविधिमाध्यमेन (Structural Approach) अस्मिन् विधौ शिक्षणं भवति।

केचन आङ्ग्लभाषायां एतमेव विधिं The Doctrine Method इति निगदन्ति। सर्वासां पद्धतीनां गुणान् स्वीकृत्य, दोषान् त्यक्त्वा इयं पद्धति: प्रवृत्ता भवति।

हरबर्टीयपञ्चपदी—

उपर्युक्तेषु संस्कृतशिक्षणस्य नूतनविधिषु 'हरबर्टपञ्चपदी' इति प्रचुरप्रचारा। विधेरस्य जनक: जर्मनदेशीय: शिक्षावेत्ता तत्त्ववेत्ता च श्रीमान् हरबर्ट जॉन फ्रेडरिक महोदयोऽस्ति। शिक्षणविधाने अनेन (१७७६-१७४१) प्रतिपादितानि पञ्च (५) सोपानानि अतीव विख्यातानि सन्ति। अतएव विधेरस्य नाम हरबर्टीयपञ्चपदीति।

हरबर्टमहोदयेन निरूपितानि ५ सोपानानि—

१. प्रस्तावना—(उन्नमुखीकरणम्)

इयं छात्राणां पूर्वज्ञानेन सम्बद्धा भवति। अत्र पूर्वार्जितज्ञानस्याधारेण कतिपय प्रश्ना: चित्र-मानचित्र श्लोकप्रसङ्ग-कथादीनां माध्यमेन भवन्ति। प्राप्तोत्तराणामाधारेण

पठनाय छात्रा मानसिरूपेण सज्जीक्रियन्ते। त्रयः चत्वार वा प्रश्नाः प्रष्टव्याः। अन्तिम प्रश्नेन प्रकरणस्य नाम प्रस्तोतव्यम्।

२. विषयोपस्थापनम् (प्रदर्शनं प्रस्तुतीकरणम्वा)

सोपाने ऽस्मिन् पाठस्य मुख्यभागानुसारं समग्रः पाठः त्रिचतुरैः परिच्छेदैः विभज्यते। प्रस्तावनायाः अनन्तरं अद्यतने दिने कः पाठयांश अध्याप्यमानोऽस्ति इति निवेद्यते। अंशेऽस्मिन् उद्देश्यकथनम्, आदर्शवाचनम्, अनुवाचनम् अशुद्धिसंशोधनम्, काठिन्यनिवारणम्, पाठप्रवर्धनञ्चेत्यादीनि सोपानानि अन्तर्भवन्ति।

३. तुलना

वर्तमानपाठस्य तुलना बालकानां संचितज्ञानेन भवति। भाषाशिक्षणे उदाहरणैः दृश्यश्रव्योपकरणैश्च विस्तृतव्याख्या अत्र क्रियते ।

४. सामान्यीकरणम्

अर्जितज्ञानस्य प्रस्तुतपाठेन सहयोजनमेव सामान्यीकरणम्। विशिष्य व्याकरणशास्त्रे सामान्यीकरणस्य प्रस्तावः आगच्छति। सोपानेऽस्मिन् छात्राः पाठस्य निष्कर्षं प्रति गच्छन्ति। अनेनैव ते नियमकल्पने सिद्धान्तनिर्माणे च क्षमाः भवन्ति। भाषाशिक्षणसमये स्तरेऽस्मिन् पुनरावृत्तिप्रश्नाः प्रष्टव्याः। कविताशिक्षणे समानभावसम्बद्धाः कविता अत्र चर्चनीयाः।

५. प्रयोगः

पाठस्याध्ययनात्परं नवार्जितज्ञानस्य प्रयोगाय, शिक्षण साफल्यस्य परीक्षणाय शिक्षकः अभ्यासकार्यं कारयति विद्यार्थिनां शङ्काः अपाकरोति। तेभ्यः किञ्चित् मौखिकं लेखनकार्यं वा ददाति। गृहकार्यस्य प्रश्नाः प्रदीयन्ते।

विधेश्य गुणाः—

१. विधिरयं मनोवैज्ञानिकसिद्धान्तेष्वाधारितोऽस्ति।
२. शिक्षणसिद्धान्तानां सूत्राणाञ्च अनुकरणं विद्यते।
३. छात्राणां ज्ञानं स्थायि भवति।
४. शिक्षणं क्रमबद्धरूपेण प्रचलति।
५. शिक्षणस्य बोधगम्यतायै बलं दीयते।

दोषाः—

१. सर्वेषां विषयाणां कृते उपयोगी नास्ति। यथा विज्ञानस्य कृते।
२. संस्कृतशिक्षणस्य सर्वासां विधानां कृते लाभप्रदः नास्ति।

अध्यापकशिक्षणस्यः पाठयोजनायाः निर्माणे एतानि पञ्च सोपानानि उपयुज्यन्ते। प्रायः शिक्षकप्रशिक्षणमहाविद्यालयेषु एषः एव हरबर्ट पञ्चपदीविधिः ईषत्परिवर्तनपूर्वकं आश्रियमाणो दृश्यते। तत्र क्रमशः एतेषां पञ्चसोपनानामनुगुणम् इतराणिसोपनानि छात्रसौलभ्याय सौकर्याय च प्रकल्पितानि। इत्थं विधिरयमाधुनिक-प्रशिक्षणमहाविद्यालयेषु पाठयोजनायाः आधारशिला वर्तते।

❑

१३. उपागमाः

सूक्ष्मशिक्षणम्

सूक्ष्मशिक्षणेन कक्ष्यायाः अध्यापने जटिलतां दूरीकर्तुं शक्नुमः। अस्मिन् उपागमे लघुपाठ्यसामग्र्या शिक्षणकौशलानाम् उन्नयनाय आवश्यकं कार्यं भवति। अस्य प्रयोगः शिक्षणप्रशिक्षणार्थिनां व्यवहारपरिवर्तनाय क्रियते। शिक्षणं नाम कला इति, विज्ञानमिति च शिक्षाविदामभिप्रायः। शिक्षणम् कला इति ये मन्यन्ते, तदनुसारं शिक्षकः जन्मजातो भवति। जननसमये एव विशिष्टशिक्षणकौशलानि सहजतया एव प्राप्नोति।

शिक्षणं विज्ञानमिति ये मन्वते, तेषामनुसारं प्रशिक्षणेन शिक्षकस्य निर्माणं भवति। तस्मिन् शिक्षके शिक्षणकौशलानि विकासनीयानि च भवन्ति। विज्ञान कडिथे धारणा एवमस्ति यद् विज्ञानस्य, प्रविधिशास्त्रस्य च प्रभावेन शिक्षाजगति विकासः समभवत् इति। अनेन कारणेन शिक्षणप्रशिक्षणसंस्थानाम् उत्तरदायित्वमैधत॥

परिभाषा

सूक्ष्मशिक्षणविधेः प्रवर्त्तकः प्रो. डी. एलोन् महोदयः, यः अमेरिकादेशे स्टेन्फोर्ड विश्वविद्यालये कार्यभारं निरवहत्। सः सूक्ष्मशिक्षणस्य परिभाषाम् एवमकथयत्—

''सूक्ष्मशिक्षणम् एकं विश्लेषितशिक्षणम्। अस्मिन् शिक्षणप्रक्रिया लघुरूपा। कक्षा अल्पछात्रसमोपेता। समयः अल्पः सेवारतानां, सेवापूर्णशिक्षकाणां व्यावसायिकविकासाय अस्य प्रयोगः भवति'' इति।

सूक्ष्मशिक्षणं, कक्ष्याशिक्षणे विद्यमानानां सामान्यजटिलतानां न्यूनीकरणेन, अध्यापकानां शिक्षणाभ्यासे महदुपकरोति। अस्मिन् क्रमे अध्यापकः विस्तृततया स्वशिक्षणव्यवहाराय प्रतिपुष्टिं प्राप्नोति।

- सूक्ष्मशिक्षणे शिक्षणतत्त्वनां सूक्ष्मस्वरूपं भवति।
- अयं वैयक्तिकप्रशिक्षणविधिः यतो हि प्रशिक्षणार्थिषु विद्यमानानि शिक्षणकौशलानि विकासयति। प्रतिकक्षां ५ तः १० छात्राः एव भवन्ति।
- पाठनसमयस्यावधिरपि न्यूनो भवति। प्रायः ५ निमेषेभ्यः १० निमेषं भवति।
- विषयवस्तुनः, प्रकरणस्य आकारोऽपि ह्रस्वो भवति। अनेकशिक्षणकौशलानां स्थाने एकस्यैव शिक्षणकौशलस्य अभ्यासो जायते।

सूक्ष्मशिक्षणस्य अवस्थाः

१. ज्ञानार्जनावस्था

२. कौशलार्जनावस्था

३. स्थानान्तरणावस्था

(क) प्रदत्तकौशलानां निरीक्षणम्।

प्रदर्शितकौशलेषु

- चर्चा
- विश्लेषणम्

(ख) सूक्ष्मपाठलेखनम्

- कौशलाभ्यासः

(ग) शिक्षणस्य, मूल्याङ्कनस्य

- वास्तविकशिक्षणपरिस्थितौ कौशलस्य स्थानान्तरणम्।

सूक्ष्मशिक्षणस्य आधारभूतमान्यताः—

- शिक्षणम् एका उपचारात्मकप्रक्रिया।
- उत्तमप्रशिक्षणप्रदानाय शिक्षणक्रियाणां वस्तुनिष्ठनिरीक्षणम् आवश्यकं भवेत्।
- शिक्षणे अपेक्षितपरिवर्तनानयनाय समुचितः अवसरः प्रदातव्यः।
- व्यक्तिगतसामर्थ्यानि विकासीकृत्य शिक्षणप्रक्रियाया औन्नत्यं वर्धयेत्।
- सूक्ष्मशिक्षणे शिक्षकस्य अतिलघु, सरलीकृतं च रूपं भवति। अर्थात् सः मार्गदर्शकरूपेण कार्यभारं निर्वक्ष्यति।
- छात्रेषु अपेक्षितव्यवहारपरिवर्त्तन-समानयनाय पृष्ठपोषणस्य (फीड बाक्) भूमिका महत्त्वपूर्णा वर्त्तते।

सूक्ष्मशिक्षणस्य सिद्धान्ताः

१. सूक्ष्मशिक्षणं वास्तविकशिक्षणम्।

२. साधारणकक्ष्यायाः शिक्षणजटिलताः न्यूनीकरोति।

३. एकस्मिन् समये एकस्यैव कौशलस्य अभ्यासः भवति।

४. अभ्यासक्रमस्य प्रक्रियायां अधिकनियन्त्रणं भवति।

५. परिणामसम्बन्धिनः सामान्यज्ञानस्य, प्रतिपुष्टेश्च यः प्रभावः वर्त्तते, तस्य परिधिः विकसितो भवति।

सूक्ष्मशिक्षणचक्रम्

छात्राध्यापकः विशेषशिक्षणकौशले नैपुण्य प्राप्तये यां प्रक्रियाम् आश्रयति तस्याः प्रक्रियायाः नाम सूक्ष्मशिक्षणचक्रमिति नाम।

पाठयोजना—

- सूक्ष्मशिक्षणम्
- आलोचनम्
- पुनः पाठयोजना
- पुनः शिक्षणम्
- पुनरालोचनम्

सूक्ष्मशिक्षणस्य लाभाः

१. सामान्यकक्षायाः जटिलताः दूरीभवन्ति।

२. अल्पे समये छात्राध्यापकाः अधिकं शिक्षणं प्राप्नुवन्ति।

३. आत्मविश्वासस्य जागृतिः भवति।

४. वस्तुनिष्ठमूल्याङ्कनं करोति।

५. योग्यतानुसारं छात्राध्यापकाः अधिकशिक्षणं प्राप्नुवन्ति।

६. योग्यतानुसारं छात्राध्यापकाः शिक्षणकौशलेषु सावधानेन प्रयतन्ते।

७. मूल्याङ्कने स्वाभिप्रायप्रकटनाय छात्रेभ्यः अवसरो मिलति।

८. मूल्याङ्कनप्रक्रियायां छात्राः सक्रिया भवन्ति।

९. मूल्याङ्कनप्रक्रिया अतिसरला भवति।

१०. व्यावसायिकक्षमता विकसिता भवति।

११. छात्राध्यापकानां शिक्षणप्रक्रियायाः सम्पूर्णतया स्पष्टतया च ज्ञानं जायते।

१२. शिक्षणकौशलेषु सम्पूर्णाधिकारः भवति। केचन अपेक्षितकौशलस्य उपयोगं निपुणतया कर्त्तुं शक्नुवन्ति।

१३. वैयक्तिकभिन्नतासु ध्यानं दीयते।

१४. इदं सूक्ष्मशिक्षणं, निरीक्षणप्रक्रियायाः नतूनरूपं ददाति।

सूक्ष्मशिक्षणस्य सीमा

- अस्मिन् क्षेत्रे प्रशिक्षिताध्यापकानाम् आवश्यकता वर्तते। परं तेषां विरलता दृश्यते। अतः अन्ये चाध्यापकाः यथा प्रशिक्षिताः भवन्ति तथा व्यवस्था कार्या।

- सूक्ष्मशिक्षणप्रक्रियायै बहूनां कालांशानाम् अपेक्षा विद्यते। तदनुसारं वर्तमानशिक्षाव्यवस्थायां कालांशनिर्धारणं न भवति।
- सूक्ष्मशिक्षणे एकस्यैव कौशलस्य अभ्यासः भवति। परं वास्तविकशिक्षण-सन्दर्भे चतुर्विधकौशलानाम् अभ्यासो भवति।
- समस्तशिक्षणकौशलानाम् एकीकृतरूपेण प्रयोगे सक्षमः न भवेत्।
- समयस्य, धनस्य, शक्तेः च आवश्यकता अधिकतया विद्यते।
- उपकरणानां, साधनानां च अभावः वर्त्तते।
- एकस्यैव कौशलस्य अभ्यासः इति विषयः शिक्षणसिद्धान्तानां प्रतिकूलो भवति।

दलशिक्षणम्

दलशिक्षणे विभिन्नविषयाणां विशेषज्ञाः अध्यापकाः भवन्ति। सर्वे मिलित्वा शिक्षणकार्यं सामूहिकतया कक्षायां कुर्वन्ति। अत एव अस्य दलशिक्षणमिति नाम। अस्यैव सामूहिकशिक्षणं, सहकारिशिक्षणं इति नामानि सन्ति। कक्षायां शिक्षणाधिगमस्य प्रक्रियां सम्यक् सञ्चालनाय शिक्षाशास्त्रिभिः शैक्षिकप्रविधिशास्त्रस्य विकासमाधारीकृताम् शिक्षणे नवीनतमोपकरणानाम् उपयोगे, प्रयोगे च ध्यानं प्रदाय तेन आधारेण तथाविधमहत्त्वपूर्णसाधनतया उपकरोति।

अमेरिकादेशे प्रायः ५० वर्षेभ्यः दलशिक्षणविधिः प्रचलति। भारतीयविद्यालयेष्वपि दलशिक्षणस्य महत्त्वं विज्ञाय अस्य प्रयोगे शिक्षाविद् बद्धकङ्कणाः भवन्ति। **कार्लो औल्सन्** महोदयः दलशिक्षणस्य अर्थम् एवं प्रत्यापादयत् यत् अतिरिक्तज्ञानेन, कौशलेन युक्ताः द्वित्राः अध्यापकाः परस्परसहयोगेन कस्यापि शीर्षकस्य शिक्षणयोजनां निर्मान्ति। अपि च एकस्मिन्नेव समये छात्रसमूहः विशिष्टानुदेशकारणात् परिवर्तनशीलकार्याणां, सामूहिकविधीनां च प्रयोगं कुर्वन्ति इति।

दलगठनम्—

दले साधारणतया एते भवन्ति। १. प्रधानाध्यापकः, २. वरिष्ठाध्यापकः, ३. सहायाध्यापकः, ४. प्रयोगशालासहायकः, ५. लिपिकश्च। दले कति सदस्याः भवेयुरिति विषयः विद्यालयस्य स्तरे, विद्यालये उपलब्धसुविधेषु आधारितो भवति। संस्कृतशिक्षणे रुचिसम्पादनाय, वर्धनाय च दलशिक्षणम् अत्यन्तम् उपकरोति।

कार्यप्रणाली—अस्यां प्रणाल्यां त्रीणि सोपानानि भवन्ति।

१. योजना

२. व्यवस्था

३. मूल्याङ्कनम्

योजना—

- विषयस्य निर्धारणम्।
- उद्देश्यानां निर्धारणम्।
- व्यवहारपरिवर्त्तनानां लेखनम्।
- छात्राणां पूर्वज्ञानपरीक्षणम्।
- शिक्षणाय ऊहारूपरेखायाः सिद्धिः।
- शिक्षकेभ्यः कार्यवितरणम् (तेषां योग्यतानां, कौशलानां चानुसारम्)
- अनुदेशस्य स्तरीकरणम्।
- शिक्षणविषयस्य, समूहस्य चयनम्।
- छात्रोपलब्धीनां मूल्याङ्कननिर्धारणम्।

व्यवस्था—

१. उपर्युक्तस्य सम्प्रेषणव्यूहस्य चयनम्।

२. छात्राणां पूर्वज्ञानपरीक्षणम् - येन तेषां स्तरः ज्ञायते।

३. अनुभवयुक्तैः अध्यापकैः व्याख्याकारणम्।

४. अन्यैः अध्यापकैः प्रदत्तव्याख्यानस्य आधारेण आगमिनः कार्यस्य कारणम्।

५. कार्यकरणे छात्रेभ्यः प्रेरणाप्रदानम्।

६. छात्राणां कार्यकलापानां पर्यवेक्षणम्।

७. छात्रैः कक्षाकार्यं कारणीयम्।

८. छात्रेभ्यः गृहकार्यं दातव्यम्।

मूल्याङ्कनम्—

सोपानेऽस्मिन् छात्रैः प्राप्तोपलब्धीनाम्, उद्देश्यानां च आधारेण मूल्याङ्कनं भवति। तदर्थं निम्नलिखितेषु विषयेषु विशेषावधानं दातव्यम्।

- छात्रोपलब्धीनाम्, उद्देश्यानां विषये निष्कर्षः स्वीकरणीयः।
- उपलब्धिस्तरस्य मूल्याङ्कनम्।
- मूल्याङ्कनाय मौखिक-लिखितपरीक्षाः स्वीकरणीयाः।
- मूल्याङ्कनस्य आधारेण योजनायाः व्यवस्था करणीया।
- अपेक्षितं चेत् सोपानेषु परिवर्तनं कार्यम्।

पाठयोजनाबिन्दवः —

- प्रस्तावना (अभिप्रेरणसम्पादनम्)
- प्रस्तुतीकरणम् (श्रवणकौशलसम्पादनम्)
- मित्राणां माध्यमेन कक्षायाः अवगमनम्।
- कठिनशब्दानां सूचीनिर्माणम्।
- शुद्धोच्चारणस्य अभ्यासः।
- मूल्याङ्कनाय प्रश्नकरणम्।

गुणाः —

१. छात्राणां संख्यानुसारं पाठने सहकरोति।

२. अनुशासनं सम्पादयति।

३. विशिष्टज्ञानप्रदानाय उपयुक्तं भवति।

४. समयस्य, धनस्य, शक्तेश्च सदुपयोगः भवति।

५. मानवसम्बन्धस्थापने समर्थं भवति।

६. ज्ञानार्जनाय साहाय्यं करोति।

दोषाः—

१. एकेन अध्यापकेन सह अन्याध्यापकानां व्यवस्थाकरणम् कदाचित् असाध्यं भवति।

२. सम्पूर्णपाठ्यक्रमस्य पाठनं न भवति।

३. आवश्यकसौविध्यानि न लभ्यन्ते।

भाषाप्रयोगशाला

भाषाप्रयोगशाला भाषाशिक्षणस्य केन्द्रं भवति, यत्र छात्रेभ्यः चतुर्विधकौशलानां नियन्त्रणं भवति।। प्रथमतः १९६५ तमे वर्षे लारेस् **स्टालरो-डेनियल् डेविस** महोदयाभ्याम् अस्य शिक्षणस्यप्रतिपादनं कृतम्। अत्र शिक्षकस्य स्थाने संगणकयन्त्रं शिक्षणं ददाति। सम्पूर्णशिक्षण प्रक्रियायां द्वौ भागौ भवतः।

१. शिक्षणकालात् पूर्वम्।

२. शिक्षणकालः

प्रथमभागे छात्राय विशिष्टकार्यक्रमः निर्मीयते। शिक्षणसमये पूर्वनिश्चितस्य कार्यक्रमस्य क्रियान्वयनं भवति। अत्र त्रयः मुख्यबिन्दवः भवन्ति।

१. छात्रस्य पूर्वव्यवहारः।

२. अनुदेशनोद्देश्यानां निर्माणम्।

३. शिक्षाविभाग:।

- छात्राणां पूर्वज्ञानस्य, अनुदेशनोद्देश्यानाम् आधारेण संगणकशिक्षणयोजनाया: चयनं भवति।
- छात्राणाम् अनुपातोऽपि निरीक्ष्यते। यदि प्रथमशिक्षणे सफलं भवति चेत् द्वितीयशिक्षणयोजनं प्रस्तावयति। अत्र वैयक्तिकभिन्नताविषये विशेषध्यानं दीयते। शिक्षणेन सह उपचारात्मकक्रिया: अपि भवन्ति।
- परिशोधकैरिदं स्पष्टीकृतं यत् संस्कृतं संगणकयन्त्रस्य अत्यन्तोपयुक्ता भाषा। अत्र शिक्षणं, निदानात्मकक्रिया च एकदैव भवत:। अत: संस्कृतशिक्षणे अस्य प्रतिमानस्य उपयोग: महान् भवति।
- अध्यापक: अनेन प्रतिमानेन सर्वेषां छात्राणां शङ्का एकस्मिन् समये एव निवारयितुं शक्नोति। अपि च सङ्गणके मौखिकाभिव्यक्तेरपि क्षमता विद्यते।

अत: अयमुपागम: संस्कृतशिक्षणाय अतीव लाभदायक:, नवीनश्च। अस्मिन् छात्रा: स्वदोषान् दृष्ट्वा श्रुत्वा चावगच्छन्ति।

भाषाप्रयोगशालाया: उपकरणानि—

(क) श्रवणकोष्ठका:

१. दूरभाष:

२. श्रवणदूरभाष:

३. पिञ्जा:

४. ध्वनिमुद्रणयन्त्रम्

(ख) परामर्शदातु: प्रकोष्ठ:

१. वितरणपिञ्जा:

(ग) नियन्त्रणप्रकोष्ठ:

लाभा:—

१. छात्र: स्वगत्या पठति।

२. छात्राय सम्यक् अभिप्रेरणा मिलति।

३. वारं वारं शुद्धोच्चारणस्य श्रवणेन स्वोच्चारणं शुद्धं भवति।

४. छात्र: अभ्यासेन स्वदोषान् निवारयितुं प्रभवति।

५. भाषाध्ययनाय अधिकसमयं प्राप्नोति।

६. छात्र: क्रियाशील: भवति।

दोषा: —

१. अस्मिन् प्रतिमाने पठनस्य, लेखनस्य प्रयोग: नास्ति।

२. अधिकसंख्याका: छात्रा: एकस्मिन्नेव समये भाषाप्रयोगशालायां कार्यं कृत्वा अभ्यासं कर्त्तुं न शक्नुवन्ति।

३. व्यय: अत्यधिक: भवति।

४. अधिक: समय: अपेक्षितो भवति।

अभिक्रमिताधिगमः

अभिक्रमिताधिगमे शिक्षणवस्तु अल्पाल्पभागै: विभक्तं भवति। अपि च शृङ्खलाबद्धं भवति। अर्थात् अधिगमकर्त्ता स्वज्ञानस्य आधारेण नूतनज्ञानं स्वयमेव प्राप्नोति। अभिक्रमिताधिगमे अधिगन्ता सक्रियो भवति। स्वबुद्धेरनुसारं पठने अग्रे गन्तुं प्रभवति। अपेक्षितसमये एव तस्य प्रतिपुष्टि: मिलति।

परिभाषा—

अभिक्रमिताधिगम: स्वशिक्षणविधीनां व्यापकाय प्रयुक्त: विधि:।

—डी. यल्. कुक्

ज्ञातान् अल्पविषयान् क्रमेण व्यवस्थापनाय या सम्पूर्णप्रक्रिया विद्यते तस्या एव अभिक्रमिताधिगम इति नाम।

—स्टीफल्

अभिक्रमिताधिगम: न केवलं स्वाध्यायाय निर्मितं पाठ्यवस्तु नास्ति। अपि तु उत्तम: एक: शिक्षणविधिश्च।

सिद्धान्ता:—

स्वबुद्धिशिक्षणसिद्धान्त:।

छात्रानुक्रियासिद्धान्त:।

अंशादंशसिद्धान्त:।

सक्रियासिद्धान्त:।

सहभागितासिद्धान्त:।

तत्कालप्रतिपुष्टिसिद्धान्त:।

विविधसामग्रीसिद्धान्त:।

छात्रपरीक्षणसिद्धान्त:।

प्रगतिज्ञानसिद्धान्त:।

व्यवहारविश्लेषणसिद्धान्तः। Picture—

वैशिष्ट्यम्—

- इयं सामग्री वस्तुनिष्ठा भवति।
- एकस्मिन् समये एक एव पठितुं प्रभवति।
- सामग्री अल्पाल्पांशरूपेण विभक्ता भवति।
- सामग्री तार्किकक्रमे सुव्यवस्थिता वर्त्तते।
- सामग्री शृङ्खलाबद्धा भवति।
- छात्राणां तत्काले एव तस्य प्रगतिविषये सूचना मिलति।
- तेन छात्राः ज्ञातुं शक्नुवन्ति यत् तैः विहितः प्रयासः साधु दोषपूर्णो वेति। एवं प्रकारेण तत्काले एव तस्मै पृष्ठपोषणं लभ्यते।
- स्वबुद्ध्यनुसारं विषयवस्तुशिक्षणं प्राप्नोति।
- अभिक्रमितसामग्री पूर्णपरीक्षिता, क्रमयुक्ता च भवति।
- शिक्षणार्थिभिः सततं प्रयत्नः विधेयः भवति। तेन सक्रियता जायते।
- एतेषां व्यवहाराणां भाषा सरला स्यात्।
- अपि च बोधगम्यता-उपलब्धि-पृष्ठभूमि-मानसिकस्तरेषु च ध्यानं दातव्यं भवति।
- अत्र उद्दीपनम्, अनुक्रिया, पुनर्बलनं-एतानि त्रीणि क्रियाशीलानि भवन्ति।
- अभिक्रमिताधिगमसामग्रीशिक्षणे त्रुटीनां, दोषाणां प्रतिशतता न्यूना भवति।
- अभिक्रमिताधिगमे साम्रग्या प्रतिपुष्टिः अधिगन्त्रा तत्क्षणे एव प्राप्यते।
- अतः छात्राणाम् अनुक्रियाः पुनर्बलनयुक्ताः भवन्ति।
- ताः अनुक्रियाः प्रभावोत्पादकशिक्षणे सहायकाः भवन्ति।
- छात्राणां प्रत्येकोऽपि प्रयासः तस्मै एकैकं नूतनं ज्ञानं ददाति।
- अभिक्रमित-अनुदेशनसामग्र्याः अध्ययनसमये अधिकतत्परता, जिज्ञासा च अपेक्षेते। अनेन हेतुना छात्राः शीघ्रातिशीघ्रं विषयवस्तु अवगच्छन्ति।
- अभिक्रमितानुदेशनप्रणाली मनोवैज्ञानिकाधिगमसिद्धान्तस्य आधारेण प्रचलति।

लाभाः —

१. छात्राणाम् आत्मविश्वासः, आत्मनिर्भरता च विकसितौ स्तः।

२. प्रतिपुष्टिकारणतः छात्रेभ्यः अभिप्रेरणा सम्यक् मिलति।

३. स्वयं किञ्चित् कृत्वा अनुभवं प्राप्नोति।

४. अभिक्रमितानुदेशने छात्राः सततं सक्रियाः भवन्ति।

५. स्वाध्यायस्य अभ्यासः जायते।

६. छात्रेषु अभिरुचिः भवति।

७. संरचनात्मकशक्तेः वर्धनं भवति।

८. विभिन्नविषयाणां तार्किकविश्लेषणं कृत्वा सुगमतया शिक्षणं प्राप्तुं शक्नुयात्।

९. शिक्षकस्य उपस्थितिः नानिवार्या।

१०. प्रणाली इयं पुनर्बलनसिद्धान्तस्य आधारेण कार्यं करोति।

११. प्रणालीयं सरलात् कठिनं प्रति, ज्ञातादज्ञातं प्रति इति शिक्षणसूत्राणां क्रमेण छात्राणां समक्षं प्रस्तूयते।

१२. अनुशासनसमस्या एव न भवति।

१३. छात्रेषु रचनात्मक-तर्क-विचारात्मक-निर्णयात्मकशक्तीनां विकासे सहकरोति।

दोषाः —

- प्रणालीयं सर्वं यान्त्रिकप्रक्रियारूपेण चलति।
- कक्षायां भावात्मकपरिस्थितेः अभावः भवति।
- शिक्षकस्य वैयक्तिकप्रभावः छात्रेषु न पतति।
- सामाजिकभावनायाः अभावः दृश्यते।
- भाषाशिक्षणस्य कौशलविकासात्मकपक्षः पूर्णतया उपेक्षितो भवति।

सामग्रीनिर्माणम् —

निर्माणेऽस्मिन् नव भागाः सन्ति।

१. प्रकरणस्य, शीर्षकस्य वा चयनम्।

२. छात्राणां पूर्वज्ञान-पूर्वानुभव-सम्बद्धसूचनालेखनम्।

३. व्यवहाररूपे उद्देश्यानां लेखनम्।

४. विषयवस्तुनः स्वरूपनिर्माणम्।

५. मापदण्डपरीक्षायाः निर्माणम्।

६. अभिक्रमलेखनम्।

७. प्राथमिकप्रतिवेदनलेखनम्।

८. प्रतिवेदनपरीक्षणम्।

९. मूल्याङ्कनम्, क्रमनिर्धारणं च।

अभिक्रमिताधिगमस्य प्रकाराः—

१. रेखीयाभिक्रमः।

२. शास्त्रीयाभिक्रमः

३. मैथोटिक्स अभिक्रमः।

४. स्वनिर्देशितः अभिक्रमः।

५. सङ्गणकाधारितः अभिक्रमः।

संग्रन्थनोपागमः

शब्दानां यथार्थोऽर्थः वाक्येषु लभ्यते। भाषाशिक्षणं प्रभावोत्पादकं कर्त्तुं शिक्षणे अनेकप्रकारकविधीन्, प्रविधीन्, युक्तीः, उपागमान्, प्रतिमानानि, प्रतिकृतीश्चोपयुङ्क्ते। ज्ञानसम्प्रेषणाय शिक्षकः स्वशिक्षणविषयं, विषयवस्तु, कक्षां, छात्राणां स्तरं च मनसि निधाय प्रयोगं करोति। मनोविज्ञानशास्त्रप्रभावेण शिक्षणप्रक्रिया अतिसरला जाता। सरलात् कठिनं प्रति इत्यादि शिक्षणसूत्रैः आधारितः संग्रन्थनोपागमः भाषाशिक्षणे अत्यन्तोपयोगी भवति। संग्रन्थनस्य सामान्यार्थः भवति-बन्धनम्, योजनं वा। शब्दानां विभिन्नरूपेण वाक्येषु ग्रथनमेव संग्रन्थनम्। अनेन उपयुक्ता भाषा या काऽपि वा भवतु तस्याः ज्ञानं सहजतया भवति। भाषाशिक्षणे प्रायः अयं क्रमः भवति यत् प्रथमं वर्णाः, ततः शब्दाः, शब्देभ्यो वाक्यानि इति। परं संग्रन्थने साक्षात् वाक्यैरेव भाषाव्याकरणयोः शिक्षणाभ्यासः भवति। अयं विधिः अत्यन्तसरलः मनोविज्ञानात्मकश्च। भाषाशिक्षणे विशिष्य संस्कृतशिक्षणे अस्य उपागमस्य महान् उपयोगः भवति। संग्रन्थनोपागमस्य संरचनोपागमः, वाक्यघटनोपागमः इति नामद्वयं वर्त्तते। आङ्ग्लभाषायां स्टक्चुरल् अप्प्रोच् इति नाम। भाषाशिक्षणं सफलीकर्त्तुं प्रत्यक्षविधेः उपयोगः संस्कृतविद्यालयेषु कुर्वन्ति। विद्यालयस्तरे उपयुक्तं, रोचकं, सुग्राह्यं च कर्त्तुं, संस्कृते व्याकरणनियमानां ज्ञानप्रदानाय अयमुपागमः अत्यन्तोपयुक्तः भवति।

वैशिष्ट्यम्—

१. भाषाशिक्षणस्य मनोवैज्ञानिकशैली अस्मिन् उपागमे भवति।

२. संस्कृतस्य सरलसरलवाक्यानि छात्राणां समक्षम् उपस्थाप्यन्ते।

३. छात्रेषु मौखिकाभिव्यक्तेः विकासः भवति।

४. संस्कृतकक्षायां संस्कृतभाषायाः एव प्रयोगः क्रियते।

५. संस्कृतभाषायाः श्रवणभाषणकौशले भवतः। पश्चात् पठने लेखने च दक्षता समागच्छति।

६. नूतनसंग्रन्थनं प्रस्तूय शिक्षणं यदा रोचकं करोति, तदा छात्राः अधिकतया सक्रिया भवन्ति।

७. व्याकरणनियमान् सरलतया समवगच्छन्ति।

८. अधिगमसिद्धान्तस्य अभ्यासनियमः अत्र प्रयुज्यते।

९. श्रवणभाषणकौशलयोः अधिकं ध्यानं दीयते।

१०. छात्राणां शब्दभण्डारे वृद्धिः भवति।

अयमुपागमः सर्वस्तरीयच्छात्राणां संस्कृतशिक्षणाय नितराम् उपयोगी वर्त्तते। परन्तु अस्य उपागमस्य निर्माणसमये छात्राणां स्तरः अवश्यं मनसि स्थापनीयः।

निर्माणप्रक्रिया —

१. पदानां क्रमः

२. उपसर्गनिपातादीनां प्रयोगः

३. विभक्तीनां प्रयोगः

पाठयोजनायाः सोपानानि—

१. प्रस्तावना

२. उद्देश्यकथनम्

३. प्रस्तुतीकरणम्

(क) प्रथमसंग्रन्थनम्

(ख) द्वितीयसंग्रन्थनम्

(ग) तृतीयसंग्रन्थनम्

४. स्पष्टीकरणम्

५. अभ्यासकार्यम्

६. गृहकार्यम्

निदानात्मकोपागमः

छात्रेषु वंश-लिङ्ग-वयः-परिवेषादिविभिन्नेभ्यः कारणेभ्यः वैयक्तिकभिन्नताः भवन्ति। केचन प्रज्ञानिनो भवन्ति। केचन मन्दबुद्धयः भवन्ति। अर्थात् एते छात्राः मन्दगत्या अध्ययनं कुर्वन्ति। यतो हि एतेषाम् अध्ययने विभिन्नप्रकारकाः कठिनताः आगच्छन्ति। पुनः एतेषु केचन छात्राः परीक्षासु अनुत्तीर्णाः भवन्ति। अन्ये सर्वदा विद्यालयनामश्रवणेनैव पराङ् मुखाः भवन्ति। एवंभूताः छात्राः शिक्षकाणां विद्यालयस्य च समक्षं समस्या स्थापयन्ति। एतासां समस्यानां परिष्काराय अयमेकः अत्युत्तमः पन्था-निदानात्मकं तथा उपचारात्मकशिक्षणम्। अस्मिन् उपागमे शिक्षकः निदानात्मकशिक्षणेन छात्राणां कठिनतानां निदानं करोति। तत्पश्चात् छात्राणां वैयक्तिककठिनताः दूरीकर्त्तुम् उपचारात्मकशिक्षणस्य प्रयोगं करोति।

परिभाषा —

निदानमिति शब्दस्य अर्थः–मूलकारणम्। अथवा रोगनिर्णयः। आङ्ग्लभाषायां डयाग्नसिस् इत्युच्यते। चिकित्सकः रोगिनः लक्षणानि परिशील्य रोगस्य निदानं करोति। एवमेव शिक्षकोऽपि छात्राणां विषयगतमन्दताम् अधिगमसम्बद्धत्रुटीः, लोपांश्च ज्ञात्वा तेषां निदानं करोति। योकं–सिंसन् महोदययोरनुसारं निदानम् एका कला, यथा कलया छात्रेषु विद्यमानैः चिह्नैः, लक्षणैर्वा कस्या अपि कठिनतायाः ज्ञानं प्राप्यते।

उद्देश्यम्—

१. छात्राणां पाठ्यविषयसम्बद्धस्वाभाविकजन्मजातकठिनतानां ज्ञानप्राप्तिः।

२. छात्राणां पाठ्यविषयसम्बद्धनां विविधकठिनतानाम् अवगमनम्।

३. छात्राणां व्यक्तित्त्वस्य विश्लेषणम्।

क्षेत्रम्—

१. वाचनम्

२. लेखनम्

३. उच्चारणम्

४. व्याकरणम्

५. अङ्कगणितम्

छात्राणां निदानावसरे इमे विषयाः अवश्यं द्रष्टव्याः—

१. शारीरिकस्वास्थ्यम्

२. संवेगात्मकस्थितिः

३. बुद्धिस्तरः

४. सामाजिकस्तरः

५. आर्थिकस्तरः

६. शिक्षणपद्धतिः

७. छात्राणाम् अभिरुचिः

८. कार्यसङ्कल्पः

प्रकाराः—

निदानात्मकपरीक्षणं द्विप्रकारकं भवति। १. व्यक्तिकेन्द्रितम्–अनेन परीक्षणेन विशेषलोपाः, विशिष्टगुणाश्च परिचिताः भवन्ति। २. समूहकेन्द्रितम्–अत्र एकस्य विशिष्टसमूहस्य सामूहिकत्रुटीनां, लोपानां वा परीक्षणम् क्रियते।

निदानात्मकपरीक्षणपत्रस्य निर्माणम्—

संस्कृतशिक्षक: स्वशिक्षणं प्रभावोत्पादकं उद्देश्यपूर्णं च कर्तुं संस्कृतभाषाया: विवधपक्षाणां निदानात्मकपरीक्षणं कर्तुं शक्नोति। विद्यालयस्तरीय छात्राणाम् निदानात्मकपरीक्षणप्रश्नपत्रे एते बिन्दव: भवन्ति।

१. त्रुटिसंकलनम्

२. त्रुटिकारणम्

३. त्रुटिनिवारणोपाया:

४. नीलिपत्रनिर्माणम्

उपचारात्मकशिक्षणम्

उपचारात्मक इति शब्द: वैद्यशास्त्राद् गृहीत:, यथा रोगिणाम् उपचारम् कृत्वा तेभ्य: उत्तमस्वास्थ्यं दातुं वैद्य: प्रयतते तथैव शिक्षक: छात्राणाम् अधिगमसम्बद्धदोषान् अपाकृत्य ज्ञानार्जनाय उत्तमदिशां ददाति इति।

योकन्-सिम्सन् महोदयौ उपचारात्मकमधिकृत्य एवं अकथयताम् यत् उपचारात्मकशिक्षणं छात्राय स्वकुशलताया: विचारस्य वा त्रुटीनां दूरीकरणे सफलताम् प्रददाति।

उद्देश्यम्—

१. छात्राणाम् ज्ञानसम्बद्धत्रुटीनां निष्कासनम्।

२. अधिगमसम्बद्धदोषाणां दूरीकरणम्।

३. दोषपूर्ण-अभ्यासानां, कुशलतानां, मनोवृत्तीनां समापनम्।

४. अपेक्षितमनोवृत्तीनाम् अभ्यासमनोवृत्तीनां च शिक्षणम्।

५. उत्तमभाषाप्रयोगे क्षमतासम्पादनम्।

६. समयस्य शक्तेश्च संरक्षणम्।

७. छात्राणां वैय्यक्तिककाठिन्यस्य दूरीकरणम्।

८. मन्दबालकेषु आत्मविश्वासस्थापनम्।

९. संवेगात्मकबालकानाम् ये लोपा: सन्ति तेषां दूरीकरणम्।

१०. संस्कृतं प्रति रुच्युत्पादनम्।

११. व्यक्तिगतभिन्नतानाम् आधारेण पाठनम्।

१२. शिक्षणे मनोवैज्ञानिकसिद्धान्तानाम् अनुसरणम्।

१३. छात्रेषु स्पर्धाभावनाया: जागरणम्।

प्रक्रिया—

१. प्रत्येकछात्रस्य स्तरानुसारम् उपचारात्मकशिक्षणं देयम्।

२. प्रतिसप्ताहं प्रगतेः परिशीलनम्।

३. यदि छात्रेषु लोपाः भवन्ति ते न प्रदर्श्याः यतो हि तेषु हीनभावना जागर्ति। तस्याः भावनायाः प्रभावः अधिगमे पतति।

निर्माणप्रक्रिया—

१. निदानात्मकपरीक्षणेषु छात्रैः कृतानां त्रुटीनां विश्लेषणम् अवश्यं भवेत्।

२. त्रुटीनाम् आधारेण पृथक्-पृथक् अभ्यास-मालायाः निर्माणं भवेत्।

३. विशेष-सामग्र्याः आधारेण त्रुटीनाम् प्रकाराः, तेषां कारणानि अध्येतव्यानि।

४. अध्ययनानुसारमेव अभ्यास-मालाः निर्मातव्याः।

५. सम्पूर्णतया अभ्यासः कारणीयः, येन एक प्रकारकत्रुटिविषये विविधप्रकारकाः अभ्यासप्रश्नाः भवेयुः।

६. शिक्षणसूत्राणि अवश्यम् अनुसर्त्तव्यानि।

७. छात्रेषु प्रयोगं कृत्वा संशोधनं, परिवर्तनं, परिवर्धनं वा कर्तुम् शिक्षकस्य सम्पूर्णस्वतंत्रता भवेत्।

अतः निदानात्मकपरीक्षणस्य प्रत्येकस्य बिन्दोः उपरि पृथक्-पृथक् अभ्यासमालाः निर्मातव्याः।

प्रायोजनकार्योपागमः

प्रायोजनविधेः स्वरूपं **रूसो** महोदयेन स्वपुस्तके **एमील** नामके ग्रन्थे, **फ्रोबेल** महोदयेन स्वपुस्तके **एड्युकेषन ऑफ मैन** नामके च शिक्षाकार्यकलापेषु ध्यानं दत्वा निरूपितम्। एवमेव **विलियम् कॉवेट** महोदयः Advice to young men बालकानां कृते ग्रामीणयोजनाः अवर्णयत्। अस्य विधेः प्रयोगः सर्वप्रथमतया कृषि क्षेत्रे कृतः। शिक्षाक्षेत्रे **प्रोफेसर् जॉन डुई** महोदयेन सम्यग्विचारः कृतः। परन्तु १९१८ तमे वर्षे प्रयोजनवादसिद्धान्तानाम् आधारेण अस्य विधेः निर्माणं विकासश्च **विलियम् किलपैट्रिक** महोदयेन सम्पादितम्।

पार्कर महोदयः प्रायोजनविधिम् एवं निरूपयति यत् प्रायोजनकार्ये योजनायाः कार्यसाधनायाश्च उत्तरदायित्वं छात्राणाम् एव भवति। अत्र कार्यकरणाय छात्राणां समक्षं काश्चन समस्याः उपस्थाप्यन्ते। तासां समस्यानां समाधानाय अपेक्षितसामग्री छात्रैरेव सम्पाद्यते। जीवनसम्बद्धसमस्याः एव छात्रेभ्यः प्रदीयन्ते।

प्रायोजनकार्यस्य सिद्धान्ताः—

कार्येऽस्मिन् अनेके सिद्धान्ताः अन्तर्भवन्ति। यथा—

१. क्रियाशीलतासिद्धान्तः

२. अभिरुचिसिद्धान्तः

३. उपयोगितासिद्धान्तः

४. उद्देश्यनिर्धारणम्

५. वास्तविकतासिद्धान्तः

६. स्वतन्त्रतासिद्धान्तः

७. समन्वयतासिद्धान्तः

८. सामाजिकतासिद्धान्तः

९. अनुभूतिसिद्धान्तः

प्रकाराः —

संस्कृतशिक्षकः संस्कृते विविधानि प्रायोजनकार्याणि छात्रेभ्यः प्रदाय तेषां रुचौ वृद्धिं सम्पादयति। सामान्यतः प्रायोजनकार्यं द्विप्रकारकं भवति। १. व्यक्तिगतम् २. सामूहिकम्। किल पैट्रिक महोदयः प्रायोजनकार्यं चतुष्प्रकारकम् इति न्यरूपयत्।

यथा— १. कलात्मकम् २. समस्यात्मकम् ३. रचनात्मकम्
४. अभ्यासात्मकम्

सोपानानि—

१. परिस्थितेः कल्पनम्।

२. प्रायोजनायाः चयनम्।

३. उद्देश्यानां निर्धारणम्।

४. प्रायोजनकार्यक्रमस्य निर्माणम्।

५. प्रायोजनायाः कार्यान्वयनम्।

६. प्रायोजनायाः मूल्याङ्कनम्।

७. प्रायोजनायाः विवरणम्।

गुणाः —

१. छात्रेषु उत्तरदायित्वगुणः विकसितो भवति।

२. स्वयं कार्यकरणे प्रवृत्तिः जायते, वर्धते च।

३. लोकतान्त्रिकभावनाया: विकासे सहकरोति।

४. विभिन्नविषयाणाम् एकत्र समावेश: भवति।

५. विभिन्नविषयाणां परस्परसम्बन्धे अवगति: भवति।

६. स्वविचाराभिव्यक्तीकरणाय सु-अवसर: मिलति।

७. शिक्षकस्य उपयुक्तमार्गदर्शनम् मिलति।

८. इदं कार्यं रुचिपूर्णं छात्रकेन्द्रितं च भवति।

९. छात्रेषु व्यावहारिकज्ञानं जायते।

१०. आत्मविश्वास: अनुशासनप्रियता इत्यादयो गुणा: विकसन्ति।

दोषा:—

१. पूर्णतया समयसारण्या: दुरुपयोग: भवति।

२. पाठ्यपुस्तकानाम् अभाव:।

३. सुशिक्षितशिक्षकामाम् अभाव: अत्र प्रधानसमस्या।

४. समयस्य, शक्ते:, धनस्य च महती आवश्यकता भवति।

५. विषयवस्तु सामग्रीं च सम्पादने क्लेश: भवति।

६. सर्वेषु विषयेषु अयम् उपागम: उपयोगी न भवति।

७. सम्पादितस्य ज्ञानस्य पुनरावृत्तये अवसर: न लभ्यते।

पर्यवेक्षिताध्ययनम्

अस्यैव निर्देशिताध्ययनमिति अपरं नाम। अस्मिन् विधौ शिक्षक: मार्गदर्शकरूपेण कार्यं करोति। विधिरयं परम्परागतशिक्षणे विद्यमानान् दोषान् दूरीकरोति। पर्यवेक्षिताध्ययनकालांशे छात्रा: अध्यापकेन दत्तं कार्यं सम्पादयन्ति। तदानीं छात्रै: क्रियमाणा: क्रिया: अध्यापकेन पर्यवेक्षिता: भवन्ति। यदा छात्रा: वैय्यक्तिकयोजनाकार्यं कुर्वन्ति तदानीम् अध्यापक: प्रत्येकं छात्रं सहकरोति।

अस्मिन् कालांशे अधिकाधिकसमय: पर्यवेक्षिताध्ययनाय, अवशिष्ट: समय: वादविवादाय व्याख्यानाय चर्चायै च उपयुज्यते।

सोपानानि—

१. अध्ययनकार्यस्य निर्धारणम्

२. अध्ययनाय निर्देश:

३. शिक्षकपर्यवेक्षणम्

४. श्यामपट्टकार्यम्

५. पुनरावृत्तिकार्यम्

गुणाः —

१. छात्रेषु स्वाध्यायप्रवृत्तिं विकासयति।

२. सर्वेषाम् विषयाणां शिक्षणं भवति।

३. वैय्यक्तिकावधानं दातुं शक्यते।

४. स्वयं समस्यापरिष्काराय प्रयत्नं विधाय सफलतां प्राप्नुवन्ति। तेन आत्मसन्तोषः जायते।

५. पाठनविषयकं ज्ञानं भवति।

दोषाः—

१. चर्चाकारणतः बुद्धिमतां छात्राणां समयस्य नाशो भवति।

२. विद्यालयानाम् आर्थिकपरिपुष्टेः अभावात् विषयसामग्रीप्राप्तये क्लेशो भवति।

३. स्वाभाविकव्यवहारस्य उपेक्षा भवति।

४. विषयवस्तुनः एव अधिकमहत्त्वं दीयते।

५. मनोवैज्ञानिक-सामाजिकप्रेरणायाः अभावः भवति।

पाठयोजना-

बिनिंग-बिनिंग महोदयेन पर्यवेक्षणाध्ययनाय पञ्च प्रकाराः पाठयोजनाः निरूपिताः।

१. विशिष्टाध्यापकयोजना—अस्यां योजनायां विशिष्टाध्यापकानाम् आवश्यकता भवति यतो हि अत्र निदानात्मकशिक्षणं भवति।

२. **सम्मिश्रितयोजना**—अस्याः प्रयोगः मन्दमतीनां शिक्षणाय क्रियते।

३. **सामयिकयोजना**— यथा साप्ताहिकयोजना, पाक्षिकयोजना, मासिकयोजना।

४. **कालांशयोजना**—अस्यां योजनायां द्वयोः अध्यापकयोः आवश्यकता भवति।

५. **द्विकालांशयोजना**—अस्याम् चत्वारि सोपानानि भवन्ति।

क. पुनरावृत्तिः

ख. कार्यनिर्धारणम्

ग. शारीरिकव्यायामः

घ. निर्धारितकार्यस्य अध्ययनम्

अस्याः प्रयोगः रचनाशिक्षणे, लेखनशिक्षणे, उपचारात्मकशिक्षणे अधिकतया भवति। अत्र द्वौ कालांशौ एककालांशतया परिगण्य पाठ्यते।

सम्प्रेषणात्मकोपागमः

सम्प्रेषणशब्दः कम्यूनिकेशन् इति आङ्ग्लशब्दस्य समानार्थकशब्दः। कम्यूनिकेषन् इति पदं कम्यूनिस् इति लाटिन् भाषापदात् निष्पन्नं, यस्यार्थः भवति समानम्। सम्प्रेषणमेका तादृशी प्रक्रिया यस्यां द्वयोः वा अधिकव्यक्तीनां विचारा, अनुभूताः, प्रभावाः परस्पर विनिमयात्मकाः भवन्ति। अनेन विनिमयेन प्रत्येकस्य सन्देशस्य अर्थम्, उद्देश्यम्, उपयोगं च समरूपेण भवति। आधुनिकयुगे दूरभाष-दूरदर्शिनीत्याद्युपकरणानां माध्यमेन सविचारसम्प्रेषणं कुर्वन्ति। **चार्लेस् रेड् फील्ड्** महोदयः कथयति स्म यत्-मानवीयविचाराणां पारस्परिकम् आदानप्रदानमेव सम्प्रेषणम्। न तु प्रविधिसाधनानां प्रयोगः। सम्प्रेषणस्येदं मुख्यं तत्त्वं भवति यत् प्रभावात्मकेन सम्प्रेषणेन सूचनादातृसूचनाग्रहीतृयोः सम्प्रेषणस्य अर्थबोधकानां समानरूपेण अवगमने सामर्थ्यं स्यात्।

सम्प्रेषणस्य बाधकाः—

१. शब्दः-ध्वनिषु बहुवारं सन्देशं सम्यक् श्रोतुं न प्रभवन्ति। तदानीं सन्देशः विपरीतार्थेन, अन्यार्थेन वा स्वीक्रियते।

२. भाषा-एकस्य शब्दस्य अनेकार्था भवन्ति। शब्दस्य प्रयोगः किमर्थं, कुत्र कृतः इति सन्दर्भस्य ज्ञानं स्पष्टं भवेत्। अन्यथा सन्देशग्रहणे अनेके भ्रमाः सम्भवेयुः।

३. पूर्वानुभवः—कस्यापि सन्देशस्य एन् कोडिङ्ग, डीकोडिङ्गकरणे पृष्ठभूमेः अनुभवः अतीव आवश्यकः। अपि च मूल्यानि, प्रेरणं च महत्त्वपूर्णां भूमिकां निर्वक्ष्यति। एते विषयाः प्राप्तस्य सन्देशस्य अवगमने बहु उपकुर्वन्ति। कदाचित् एते एव विषयाः सन्देशं सम्यक्तया प्रतिग्रहणे बाधकाश्च भवन्ति।

४. संवेगाः—संवेगानां प्रभावेन अनुकूलाः सन्देशा अपि कदाचित् प्राप्तिरूपेण डीकोडिङ्ग् क्रियते। एतादृशे सन्दर्भे साधुसन्देशोऽपि दोषभूयिष्ठं भावं ददाति। एवं संवेगाः, भावनाश्च सम्प्रेषणप्रक्रियायां बाधां जनयन्ति।

५. पारिस्थितिकसन्दर्भः-एकस्मिन् सन्दर्भे प्रयुक्तः शब्दः अन्यस्मिन् सन्दर्भे अन्यार्थं विपरीतार्थं वा ददाति, तदानीं सन्देहस्य दोषपूर्णः अर्थः भवति। अतः प्रतिसन्देशं यथार्थसन्दर्भे दर्शनं, पठनम्, अवगमनं, च अत्यन्तावश्यकम्। अन्यथा सन्दर्भः सम्प्रेषणप्रक्रियायां बाधाजनको भवति।

महत्त्वम्—

- अयमधिगमः उद्देश्यानां प्राप्तौ सहकरोति।

- सम्प्रेषणोपागमस्य अधिगमप्रक्रियासु सार्थकं, प्रभावपूर्णं च योगदानं भवति।
- छात्राणाम् आन्तरिकप्रेरणा, जिज्ञासा च वर्धते।
- अस्य उपागमस्य प्रयोगे छात्रा अधिकसक्रिया भवन्ति।
- अस्मिन् उपागमे छात्राध्यापकानां संभविष्यमाणकाठिन्यानि दूरीभवन्ति।
- औपचारिक-अनौपचारिक-निरौपचारिकक्षेत्रेषु अयमधिगमः प्रयोक्तुं शक्यते।
- उपागमेऽस्मिन् पाठ्यवस्तु स्पष्टं भवति।
- अस्य प्रयोगेण भाषायाः विकासः सुष्ठु भवति।
- भाषायां रुचिसम्पादने अयमुपागमः अत्यन्तम् उपकरोति।

ई-लेर्निङ्ग-संस्कृतशिक्षणम्

ई-लेर्निङ्ग कार्यक्रमस्य विकासः अन्यैः बहुभिः शैक्षणिककार्यक्रमैः साकमभवत्। अत्र चत्वारः कार्यक्रमाः सन्ति।

१. पठनलेखनयोः आविष्कारः।

२. छात्रशिक्षकयोः व्यवसायोद्भवः।

३. मुद्रणप्रकृतेः विकासः।

४. एलक्ट्रानिक प्रविधिशास्त्रस्य विकासः।

ई-लेर्निङ्ग डिजिटलरूपेण स्थितस्य विषयवस्तुनः सम्वर्द्धनसहयोगयोः मिश्रितं भूत्वा सिद्धा एका प्रभावशालिनी प्रक्रिया। अनेन ई-लेर्निङ्ग इत्यस्य परिभाषामेव वक्तुं शक्नुमः।

ई-लेर्निङ्ग—

१. अन्तर्जालशिक्षणयोः सम्मिश्रणरूपम्।

२. कुत्रापि कदापि शिक्षणस्य सौविध्यानां प्राप्तिः भवति। अपि च वेगेन तासां सुविधानां प्रापणाय अन्तर्जालप्रविधिशास्त्रस्य प्रयोगः भवति।

३. यथासमयं वैयक्तिकपूर्णं समग्रं गतिशीलम् अध्येयं वस्तु शिक्षार्थिनां प्रति प्रेषयितुं शक्यते।

४. ज्ञानसमुदायानां विकासैस्सह सम्बन्धं स्थापयति।

५. अध्ययनरतच्छात्रैः, शिक्षकैः अभ्यासकैः विशेषज्ञैः सह सम्बन्धं द्रढयति।

अनुसन्धानैः इदं सङ्केतितं भवति यत् छात्राः सामान्यतः आन्-लाइन कक्ष्याद्वारा न्यूनातिन्यूनं तावतीं सन्तुष्टिं प्राप्नुयुः यावतीं पारम्परिककक्ष्यामाध्यमेन लभ्यते। ई-लेर्निङ्ग मध्ये इन्टर्नेट् तथा मल्टीमीडिया प्रविधिशास्त्रयोः विकासः प्राधान्येन सहकरोति। ई-लेर्निङ्गमध्ये प्रसिद्धानि त्रीणि क्षेत्राणि सन्ति।

१. विषयवस्तु।

२. प्रविधिशास्त्रम्।

३. सेवा।

अधत्वे अनेकाः संस्थाः स्वीयामुच्चतरशिक्षाम् आन् लाइन् कक्ष्यामाध्यमेन प्रददति। तुलनात्मकदृष्ट्या पञ्चाशत् संस्थाः एतादृशानां कक्षाणां माध्यमेन शिक्षणं ददति।

आन-लाइन शिक्षायाः व्याप्तिः अधुना वेगेन वर्धते। विश्वविद्यालयेषु, अनुसन्धानसंस्थासु च आन्-लाइन डाक्टोरल कार्यक्रमाः अपि विकसिता भूत्वा प्रचलन्ति। छात्राः ई-लेर्निङ्गमाध्यमेनस्पष्टशीर्षकाणां सीमितोद्वेगानां, प्रेरणात्मकदृश्यानाम् अभिवाञ्छित-अक्षरशैलीनाम्, उपयुक्तरिक्तपत्राणां, वेबमध्ये सुरक्षितवर्णानां द्वारा प्रेरणात्मकां शिक्षां प्राप्नुवन्ति। परम्परागतदूरस्थशिक्षातः ई-लेर्निङ्ग पृथग्भवति। अत्र छात्रशिक्षकयोर्मध्ये साक्षात्सम्बन्धो न भवति। आन लाइन शिक्षया विचारविमर्शयोः अधिकं प्राधान्यं भवति। वस्तुतः अनुदेशकः मार्गदर्शकस्य भूमिका निर्वहति। शिक्षायाः उद्देश्यानां प्राप्तये छात्रान् प्रेरयति। आनलाईन अधिगमे वीडियो कान्फ्रेन्स, आडियो स्ट्रीमिङ्ग, चैटिङ्गअन्तर्भवन्ति। एतस्याः नवीनसंरचनायाः कारणेन छात्रेभ्यः एतादृशी कक्ष्या लोकप्रियत्त्वं भवति। अनया कक्ष्यया विश्वे कुतोऽपि पाठान् स्वीकर्त्तुमर्हन्ति तथा परीक्षादानाय अपि सौविध्यम् अधिगच्छन्ति।

ई-लोर्निङ्ग मध्ये शिक्षणस्य स्वतन्त्रता, सुविधाजनकता, सहयोगपूर्णता च सम्मिलिता भवेयुः। स्वतन्त्रशिक्षाप्राप्तिरित्यस्यायमाशयः यत् प्रत्येकं छात्रः व्यक्तिगतस्तरानुकूलं स्वानुरूपेण रचिते शैक्षिकपरिवेशे स्वयं शिक्षाप्राप्तये सम्बद्धानां गतिविधीनां सञ्चालनं करोति।

सरलीकृतशिक्षणकार्यक्रमः अनुदेशकैः मर्गदर्शकैर्वा सह विचारविनिमयः तथा ज्ञानस्य पूर्णप्राप्त्यर्थमपि प्रयतते।

प्रविधिशास्त्रम्—

ई-लेर्निङ्गमध्ये व्यापकरूपेण प्रविधिशास्त्रस्य तथा मल्टीमीडिया इत्यस्य च प्रयोगो भवति। एतेषां प्रौद्योगिकांशानां डेलिवरी मीडिया, विचारविमर्शसाधनैः सह श्रेणीबद्धं भवति।

डेलिवरी मीडिया—

मुद्रणम्—

मूलपाठः, अध्ययनपुस्तकानि, स्वाध्यायसामग्री, अभ्यासपुस्तकानि च आन लाईन् शिक्षणपाठ्यक्रमेषु अद्यत्वे अतिसाधारणं भवति।

श्रवणम्—

अस्यैवापरं नाम विद्यते स्ट्रीमिङ्ग आडियो इति। कस्यापि जालस्य ई-लेर्निङ्ग किर्मथम्।

ई-लेर्निङ्ग पाठाः सामान्यतः छात्राणां सूचनाप्रदानेन साकं मार्गनिर्देशनाय, विशिष्टकार्याणां प्रदर्शनाय छात्राणां सहयोगाय च निर्मिताः। सूचनाधारिता ई-लेर्निङ्ग सामग्र्या छात्रेभ्यः सूचनाः प्रेषिताः स्युः।

आन् लाइन् लेर्निङ्गकार्यक्रमस्य विषये विचारार्थमेतानि कारणानि भवन्ति—

१. आन्-लाइन् लेर्निङ्ग, परम्परागतकक्षाधिगमापेक्षया न्यूनमूल्येन मिलति।

२. प्रायः व्यये ६०%, ततोऽप्यधिकं वा न्यूनमूल्यं भवति।

३. आन्-लाइन् लेर्निङ्ग पाठ्यक्रमाणामध्ययनं विश्रामेणोपविश्य, समयानुसारं कर्त्तुं प्रभवन्ति।

४. एवमेव २४ × ७ × ३६५ अर्थात् सर्वदा पाठाः उपलब्धाः भवन्ति।

५. अनेन शिक्षार्थी स्वसमयस्यानुसारं पाठानामध्ययनं कर्त्तुं प्रभवति।

६. आन् लाइन् इत्युक्ते प्रायः मोबाइल शिक्षणमित्यर्थः। अर्थात् अध्ययनं मार्गे, अन्तर्जालकेन्द्रे, कस्मिंश्चित् अन्यस्मिन् स्थाने वा भवितुमर्हति, केवलं यत्र अन्तर्जालसुविधायुक्तस्य सङ्गणकयन्त्रस्योपलब्धिः भवेत्।

सम्भावनाः—

विलियम् ग्लेजरमहोदयस्यानुसारम्—

— यदस्माभिः पठ्यते तत्र केवलं १०% एव स्मृतौ तिष्ठति।

— यदस्माभिः श्रूयते तत्र केवलं २०% एव स्मरणं भवति।

— यदस्माभिः दृश्यते तत्र केवलं ३०% एव स्मृतिः भवति।

— यदस्माभिः दृश्यते, श्रूयते च तत्र ५०% स्मृतिः भवति।

— यदस्माभिः अन्यैः सह विचार्यते तत् ७०% स्मरणं भवति।

— यदस्माभिः व्यक्तिगतरूपेण स्वयं अनुभूतये तत् ८०% स्मृतिः भवति।

— यदस्माभिः अन्येभ्यः पाठ्यते चेत् तत्र ९५% स्मरणं भवति।

ई-लेर्निङ्ग कार्यक्रमस्य सम्भावनाः—

१. **गतिवादः—**शिक्षार्थी स्वावश्यकतानुरूपं सूचनाः प्राप्य, तस्यां दिशि, तस्मिन् समये च अधिगमं प्राप्तुं शक्नोति, यत्तस्य सर्वाधिकानुकूल्यं भवति।

२. **वास्तविकसमयः**— शिक्षार्थिनः वेब, सूचनादत्तांशानामाधारेण विश्वविद्यालयस्य, कस्याः संस्थायाः इन्ट्रानेट्स्, साकमद्यतनसूचनानां प्राप्तिः भवति।

3. **सहयोगः**—अस्मिन् बिन्दौ छात्राणां स्वगृहे, कार्यालये वा स्थित्वा विभिन्नविषयाणामुपरि अन्यैः अभ्यासकैः, सदस्यैः, विषयविशेषज्ञैः विचारविमर्शनं, प्रश्नकरणं वा कर्तुं शक्नुवन्ति।

४. **प्राप्तिक्षमता**—छात्राः स्वापेक्षानुसारम् अध्ययनं कृत्वा लाभान्विताः भवन्ति। छात्रः अपेक्षितजनैस्साकं अपेक्षितसमये, उपयुक्तशिक्षणप्राप्तौ सक्षमाः भवन्ति।

५. **सौविध्यम्**—छात्राणां स्वापेक्षानुसारं सौविध्यानि उपलब्धानि भवन्ति।

६. **सामञ्जस्यम्**—छात्राः एकरूपतारूपेण सामग्रीं प्राप्नुवन्ति।

७. **वैश्विकप्राप्तिः**—यदि छात्रः इच्छति, कस्मादपि प्रदेशात् समानरूपेण सन्देशं प्राप्नोति। एवं प्रकारेण अन्यछात्रैः, अभ्यासकैस्सह विश्वस्तरे सम्पर्कं स्थापयितुं शक्नोति।

ई-लेर्निङ्ग-भविष्यत्—

अन्तर्जालेन विश्वं सर्वं एकत्रीक्रियते। अपि च विश्वं सर्वेषां तावत् सान्निध्यमानीतं यावदिति कथनं कदाचित् अतीव कष्टतरं भवति। एवञ्च कल्पनामपि कर्तुमशक्ताः वयम्। यदि छात्रः इच्छति चेत् अधुना अन्तर्जालमाध्यमेन विश्वे कस्मिंश्चिदपि कोणे स्थितस्य विद्यालयस्य छात्रेण सह सम्पर्कं साधयितुमर्हति। छात्रस्य आवश्यकतानुसारम् अल्पेनैव समयेन पाठ्यवस्तु साक्षाद्भवति, यस्य साक्षात्कारेण अध्ययनमर्थवन्तं, प्रभावात्मकं च भवति।

एकमिदं महत्त्वपूर्णं वर्तते यत् 2009 वर्ष यावत् भारदेशे ई-लेर्निङ्ग उद्योगः 182 अरब अमेरिकी डालर पर्यन्तं भवतीति। भारतसर्वकारेणापि विस्तृततया ई-लेर्निङ्गपरियोजनाः परिकल्पिताः याभ्यः ग्रामीणच्छात्रसमुदायस्य अत्यन्तप्रमाणोपेतं सूचनायाः विस्तारस्य दिशायां महत्त्वपूर्णं पदमुत्तिष्ठति।

❑

१४. उच्चारणशिक्षणम्

वाचं धेनुमुपासिता इति श्रुतिवाक्यम्। अर्थात् वाक् धेनुः। सा कामदुघा भवति। समस्तं वाङ्मयम् अस्या एव रूपान्तरम्। अलङ्कारसर्वस्वे प्रतिपादयति यत्—

अनादिनिधनं ब्रह्म शब्दतत्व यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥
वैखरी शब्दनिष्पत्तिर्मध्यमा स्मृतिगोचरा।
द्योतिकार्थस्य पश्यन्ती सूक्ष्म ब्रह्मैव केवलम्॥ इति ॥

वाक् चतुर्विधा अस्ति। परा, पश्यन्ती, मध्यमा, वैखरी इति। अत्र परा ब्रह्मस्वरूपा। एषा अवशिष्टानां त्रयाणाम् उद्गमस्थानम् च। पश्यन्ती-अर्थद्योतिका, मध्यमा-स्मृतिगोचरा, वैखरी-शब्दरूपा।

माहेश्वरसूत्राणि—

नृत्तावसाने नटराजराजः ननाद ढक्कां नवपञ्चवारम्।
उद्धर्त्तुकामः सनकादिसिद्धान् एतद्विमर्शे शिवसूत्रजालम्॥

अइउण् ।१। ऋऌक् ।२। एओङ् ।३। ऐऔच् ।४। हयवरट् ।५। लण् ।६। ञमङणनम् ।७। झभञ् ।८। घढधष् ।९। जबगडदश्। १०। खफछठथचटतव् ।११। कपय् ।१२। शषसर् ।१३। हल् ।१४। इति माहेश्वरसूत्राणि।

वर्णाः द्विप्रकारकाः। स्वराः, व्यञ्जनानि चेति। पाणिनीयशिक्षायाः अनुसारं वर्णानां संख्या एवं वर्त्तते। यथा—

त्रिषष्टिश्चतुष्षष्टिर्वा वर्णाः शम्भुमते मताः।
संस्कृते प्राकृते चापि स्वयं प्रोक्ताः स्वयम्भुवा॥
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः॥
अनुस्वारो विसर्गश्च ᳲ कᳲ पौ चापि परिश्रितौ।
दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च॥

स्वराः —

अ, आ, आऽऽ, इ, ई, ईऽऽ, उ, ऊ, ऊऽऽ, ऋ, ॠ, ॠऽऽ, ऌ, ॡऽऽ, ए, एऽऽ, ऐ, ओ, ओऽऽ, औ, औऽऽ॥

व्यञ्जनानि—

क ख ग घ ङ	(कवर्गः)
च छ ज झ ञ	(चवर्गः)
ट ठ ड ढ ण	(टवर्गः)
त थ द ध न	(तवर्गः)
प फ ब भ म	(पवर्गः)

य र ल व श स ष ह

अनुस्वारः, विसर्गः, जिह्वामूलीयः, उपध्मानीयः।

वर्णोच्चारणस्थानानि

- अकुहविसर्जनीयानां कण्ठः।
- इचुयशानां तालु।
- ऋटुरषाणां मूर्धा।
- लृतुलसानां दन्ताः।
- उपूपध्मानीयानामोष्ठौ।
- ञमङणनानां नासिका च।
- एदैतोः कण्ठतालु।
- ओदौतोः कण्ठोष्ठम्।
- वकारस्य दन्तोष्ठम्।
- जिह्वामूलीयस्य जिह्वामूलम्।
- नासिकानुस्वारस्य।

इति स्थानानि।

अ, आ, ह, क्, ख्, ग्, घ्, ङ	कण्ठः
इ, ई, च्, छ्, ज्, झ्, य्, श्,ञ	तालु
ऋ, ॠ, ट्, ठ, ड्, ढ्, र्, ष्,ण	मूर्धा
लृ, त्, थ्, द्, ध्, ल्, स्, न्	दन्ताः
उ, ऊ, प्, फ्, ब्, भ्, म	औष्ठम्
ए, ऐ	कण्ठतालु

ओ, औ	कण्ठ-ओष्ठम्
व्	दन्त-ओष्ठम्
ङ्	जिह्वामूलीयम् नासिका च
ञ्	तालु, नासिका च
ण्	मूर्द्धा-नासिका च
न्	दन्त-नासिका च
म्	ओष्ठम्-नासिका च (अनुस्वारः)
	नासिकाः (विसर्गः) स्वरानुसारम्

वर्णोत्पत्तिक्रमः

यत्किमपि कार्यं भवति प्रथमं तद्विषयकं ज्ञान भवति। ततः इच्छा जायते। तदा मानवः तदर्थं यतते। एवं प्रकारेण मानवः अपि शुद्धोच्चारणं करोति। पाणिनिमुनिना स्वशिक्षाग्रन्थे विषयेऽस्मिन् ये प्रस्तावाः दत्ताः ते अवश्यं ध्यातव्याः। यथा—

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्॥
मारुतस्तूरसि चरन् मन्दं जनयति स्वरम्।
सोदीर्णो मूर्ध्न्यभिहितो वक्तुमापद्य मारुतः॥
वर्णान् जनयते तेषां विभागः पञ्चधा स्मृतः।
स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः॥

शुद्धोच्चारणात् पूर्वं बुद्ध्या साकम् आत्मा अर्थज्ञानमर्जयति। ततः भाषणस्य इच्छया मनः प्रेरयति। तदा शरीरस्य अग्नौ (जठराग्नौ) आघातं करोति। तेन कारणेन देहस्य वायुम् अग्निः प्रेरयति। सः वायुः हृत् स्थानं प्राप्य गभीरध्वनिम् उत्पादयति। ततः उपरि गत्वा मूर्ध्ना सह घर्षति। पुनः ततः प्रत्यावर्त्य मुखमार्गात् बहिः निस्सरति। अतः विभिन्नप्रकारकाः वर्णाः जायन्ते। अनेन कारणेन वर्णानां पञ्च भेदाः भवन्ति। अपि च वाचां प्रक्रिया कथं भवतीति भाष्ये प्रतिपादयति—

वायुर्नाभेरुत्थितः, उरसि विस्तीर्णः, कण्ठे विवर्त्तितः, मूर्द्धानमाहत्य पुनरावृत्तः वक्त्रे विचरन् विविधान् शब्दान् अभिव्यनक्ति॥

स्वरभेदः— उच्चैरुदात्तः, नीचैरनुदात्तः, समाहारः स्वरितः इति सूत्रैः उदात्तानुदात्तस्वरितस्वरभेदाः उच्चारणे भवन्ति। यथा—

आ ये। इत्यत्रोदात्तश्रुतिः।

अर्वाङ्। क्व वोऽश्वाः। रथानां न ये ऽराः। शतचक्रं यो ह्यः। इत्यादिषु अनुदात्तश्रुतिः। अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् इत्यादौ उदात्तश्रुतिः।

कालभेदः—

एकस्य स्वरस्य उच्चारणसमयस्यानुसारं अयं भेदः भवति। यथा—

ऊकालोऽज्झस्वदीर्घप्लुतः। उश्च, ऊश्च, उ३श्च वः। वां काल इव कालो यस्य सोऽच् क्रमात् ह्रस्वदीर्घप्लुतसंज्ञः स्यात्। यथा— अ(एकमात्राकालः - ह्रस्वः), आ(द्विमात्राकालः-दीर्घः), अ३(त्रिमात्राकालः-प्लुतः)

स्थानभेदः-

अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। ऋटुरषाणां मूर्धा। लृतुलसानां दन्ताः। उपूपध्मानीयानामोष्ठौ। ञमङणनानांनासिका च। एदैतोः कण्ठतालु। ओदौतोः कण्ठोष्ठम्। वकारस्य दन्तोष्ठम्। जिह्वामूलीयस्य जिह्वामूलम्। नासिकानुस्वारस्य। इति स्थानानि। एतेषां स्थानानुसारम् उच्चारणेऽपि भेदः भवति।

प्रयत्नभेदः—

प्रयत्नो द्विविधः। आभ्यन्तरो बाह्यश्च।

आभ्यन्तरः—

आद्यश्चतुधा (पञ्चधा)। स्पृष्टेषत्स्पृष्टविवृत (ईषद्विवृत) संवृतभेदात्। तत्र स्पृष्टं प्रयत्नं स्पर्शानाम्। ईषत्स्पृष्टम् अन्तःस्थानाम्। विवृतमूष्मणां स्वराणां च। ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्। अनुप्रदानभेदः/बाह्यप्रयत्नभेदः।

बाह्यप्रयत्नस्त्वेकादशधा। विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति।

अनुप्रदानम्—

खयां यमाः खयः : कः पौ विसर्गः शर एव च।
एते श्वासानुप्रदाना अघोषाश्च विवृण्वते॥
कण्ठमन्ये तु घोषाः स्यु संवृता नादभागिनः।
अयुग्मा वर्गयमगाः यणश्चाल ासवः स्मृताः॥

संस्कृतभाषायां वर्णसमाम्नायस्य उच्चारणं सुव्यवस्थितं वर्त्तते। तथाऽपि प्रारम्भिककक्ष्यासु उच्चारणशिक्षणस्य अभावात्, क्षेत्रीयभेदाच्च अनेके दोषाः सम्भवन्ति। अतः आदावेव शुद्धोच्चारणाय अधिकं ध्यानं देयम्॥

उच्चारणं नाम विवक्षाजनितेन प्रयत्नेन कोष्ठस्य वायोः प्रेरितस्य कण्ठताल्वाद्यभिघातः यथास्थानप्रतिघाताद्वर्णाभिव्यक्तिः।[1] कथं वाक् प्रक्रिया भवति ? संस्कृतभाषायां शुद्धोच्चारणस्य अतीव महत्त्वं विद्यते। शुद्धोच्चारणस्य महत्त्वं शिक्षा

---

1. न्यायसूत्र-वात्सायनभाष्य-२-२-१८

नामके वेदाङ्गे विस्तृततया प्रकाशितम्। अशुद्धोच्चारणं क्रियमाणं पुत्रम् उद्दिश्य पिता वदति—

यद्यपि बहुनाधीषे तथापि पठ पुत्र! व्याकरणम्।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत्॥

यद्यपि त्वया बहु अधीतं तथापि व्याकरणं तु पठनीयमेव। यदि व्याकरणस्य ज्ञानं प्राप्स्यसि तर्हि स्वजनः (आत्मीयः) श्वजनः (कुक्कुरः), सकलं (समस्तं)-शकलं (खण्डं), सकृत् (एकवारं)-शकृत् सर्वदा) न भवति। अपि च- पुत्र! त्वं यद्यपि अधिकं समयं तर्कशास्त्रस्य अध्ययनं कुरु। परं व्याकरणं चावश्यं पठ। यतो हि व्याकरणस्य पूर्वज्ञानेन त्वम् अक्षराणां, पदानां च शुद्धोच्चराणं कर्तुं समर्थः भवति, पण्डितसमाजे अनादरः न भवति, अशुद्धोच्चारणदोषोऽपि न जायते। वेदाध्ययने शुद्धोच्चारणं नितरामपेक्षितम्। अक्षराणां, पदानाम् उच्चारणे असावधानेन अर्थस्य अनर्थमागच्छति। विशेषरूपेण हानिरपि सम्भवति इति।

पाणिनीयशिक्षायाम् अशुद्धोच्चारणस्य फलम् एवं प्रतिपादयति—

मन्त्रहीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह॥
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥

त्वष्टा नाम एकः प्रसिद्धः असुरः आसीत्। तस्य पुत्रः विश्वरूपः। सः स्वतपसा इन्द्रस्य सिंहासनमपि विचलितमकरोत्। व्यग्रः इन्द्रः तस्य हननमैच्छत्। त्वष्टा इदं ज्ञात्वा अत्यन्तक्रुद्धो जातः। परमिन्द्रेण विश्वरूपः हतः। पुत्रशोकेन विह्वलः त्वष्टा एकमाभिचारिकं यज्ञं समारभत, येन इन्द्रस्य हानिर्भवेत्। तस्मिन् यज्ञे ऋत्विजः इन्द्रशत्रुर्वर्धस्व इति मन्त्रम् उच्चरन्तः आहुतिम् अजुहवुः।

इन्द्रशत्रुः इति पदस्य समासभेदेन द्वौ अर्थौ सम्भवतः. आद्युदात्तत्वेन षष्ठीतत्पुरुषसमासः भवति, तेन इन्द्रस्य शत्रुः इति, अन्त्योदात्तत्वेन बहुव्रीहिसमासः, तेन तु इन्द्र एव शत्रुः यस्य इति अर्थः सम्भवति। ऋत्विग्भिः आद्युदात्तत्वेन मन्त्रस्य उच्चारणं करणीयं स्यात्। परम् अन्त्योदात्तत्वेन उच्चारणं विहितम्। वारं वारं मन्त्रोच्चारणस्य आवृत्तिम् एवमेव कृता। यज्ञस्य अन्ते फलरूपेण वृत्रासुरनामकः राक्षसः समजयत, सः इन्द्रं मारयितुमशक्तः चाभवत्। किन्तु इन्द्रः एव तम् अमारयत्। अतः शुद्धोच्चारणस्य अतीव महत्त्वं भवति।

प्रहीणः स्वरवर्णाभ्यां यो वै मन्त्रः प्रयुज्यते।
यज्ञेषु यजमानस्य रुषत्यायुः प्रजाम् पशून्॥[1]

स्वरवर्णाभ्यां हीनो मन्त्रः यदि प्रयुज्यते, सः यजमानस्य आयुः प्रजा-पशुरूपसम्पदः नाशयति। एवं हि दृश्यते लोके-य उदात्ते कर्त्तव्ये अनुदात्तं करोति, खण्डिकोपाध्यायस्तस्मै चपेटां ददाति, अन्यत्त्वं करोषीति। महाभाष्ये सस्वरपाठे[2] वाक्यमिदं साधूच्चारणस्य वैशिष्ट्यं प्रतिपादयति।

अपि च— **महो अर्णः सरस्वती प्रचेतयति केतुना।**
धियो विश्वा विराजति॥[3]

---

1. नारदीयशिक्षा-१/६
2. १-१-१
3. ऋग्वेद-१-२-४

मन्त्राणां, वाक्यानाम् उच्चारणे यदि दोषाः सम्भवेयुः तर्हि अभीष्टं फलं न प्राप्नोति। अपि च दोषपूर्णया वज्रसदृशया तया वाण्या यजमानः हन्यते।

यदि पाठकः पठनकलायां कुशलः न भवति तर्हि अर्थस्य अन्यार्थः, विपरीतार्थो वा समापतति। तेन भाषायां नीरसभावः, कदाचित् भावशून्यता वा भवेत्। अतः छात्रेभ्यः प्राथमिकावस्थायामेव शद्धोच्चरणस्य शिक्षणं प्रदेयम्।

शुद्धोच्चारणप्रकारः

व्याघ्री यथाऽऽहरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।

भीतापतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत्॥

मधुरं च न चाव्यक्तं व्यक्तं चापि न पीडितम्।

स नादस्यैकदेशस्य न वर्णाः सङ्करं गताः॥

यथा सुमत्तो नागेन्द्रः पदात्पदं निधापयेत्।

एवं पदं पदाद्यन्तं दर्शनीयं पृथक् पृथक्॥

व्याघ्री यथा स्वपुत्रान् मुखात् न पतन्ति, दन्तैः पीडा च न भवेदिति धिया तान् दंष्ट्राभ्यां सम्यक् धृत्वा नयति। एवं प्रकारेण उच्चारणं शुद्धं भवेत् तथा न केनापि प्रकारेण कर्णकटुता च न भवेत्।

महर्षिः याज्ञवल्क्यः कथयति–वर्णनाम् उच्चारणं मधुरं स्पष्टं च भवेत्। स्पष्टं यदि भवति इतरवर्णे च प्रभावितं न भवेत्। समस्तवर्णानाम् उच्चारणप्रकारः एवं भवेत् एकः वर्ण–अन्यवर्णैः सह मिलितः इति प्रतीतिः न स्यात्। यथा सुमत्तः गजः प्रथमम् एकं पदं निधाय, ततः द्वितीयं पदं सावधानेन स्थापयति, तेनैव प्रकारेण एकैकं पदं स्पष्टम् उच्चरणीयम् भवति।

उच्चारणदोषाः

वर्णलोपः—उच्चारणसमये कस्यचिद् वर्णस्य लोपः। यथा—

परमात्मा – प्रमात्मा, साप्ताहिकः – साप्ताहिकः, कार्तिकः – कातिकः।

स्वरभक्तिः—केषाञ्चन शब्दानाम् उच्चारणसमये स्वराणाम् अनपेक्षितमेलनम्। यथा—प्रतापः – परतापः महात्मा – महातमा जन्म – जनम।

वर्णागमः—उच्चारणावसरे स्वरव्यञ्जनानाम् अशुद्धागमनम्।

स्त्री – इस्त्री विद्वान् – विदवान्

वर्णविपर्ययः—उच्चारणकाले वर्णानां विरुद्धक्रमः।

प्रह्लादः – प्रल्हादः विह्वलः – विव्हलः चिह्नम् – चिन्हम्।

मात्राभेदः—ह्स्वस्वरस्य स्थाने दीर्घस्वरः, दीर्घस्वरस्य स्थाने ह्स्वस्वरः यदि उच्यते तर्हि अयं दोषः भवति। यथा—ईश्वरः - इश्वरः, पौरुषः - पोरुषः, गुरुः - गुरू, कविः - कवी।

अनुनासिकदोषः-ङ, ञ, ण, न, म-एतेषां वर्णानामुच्चरणसमये एकस्य अनुनासिकाक्षरस्य स्थाने अन्यस्य प्रयोगः भवति। यथा—लवणम्-लवनम्, श्रवणम्-श्रवनम्।

व स्थाने ब प्रयोगः -व स्थाने ब वर्णस्य, ब स्थाने व वर्णस्य प्रयोग-। यथा—

बहिष्कारः - वहिष्कारः

श स्थाने ष प्रयोगः-शकारस्य स्थाने षकारः, एकारस्य स्थाने शकारः, अथ वा शकारस्य स्थाने सकारः, शकारस्य स्थाने सकारः। यथा—

पाषाणः-पाशाणः, षण्मुखः - शण्मुखः, कश्यपः - कष्यपः, शङ्करः - सङ्करः स त् - शकृत्, शकलम् - सकलम्, स्वजनः - श्वजनः।

अनुचितगतिः—

पाणिनीयशिक्षायाम् उच्चारणदोषान् एवं प्रतिपादयति।

गीती शीघ्री शिरः कम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाऽधमाः॥

अशुद्धोच्चारणस्य कारणानि

१. वर्णानां, शब्दानां ध्वनिज्ञानस्य अभावः।

२. प्रयत्नलाघवम्।

३. संस्कृतशब्दानाम् उच्चारणसम्बद्धाभ्यासाभावः।

४. उच्चारणसम्बद्धप्रवृत्तिहीनता।

५. शारीरिकदोषः।

६. स्थानीयभाषायाः प्रभावः।

शुद्धोच्चारणविधयः

छात्रेभ्यः संस्कृतध्वनीनां, शब्दानां च उच्चारणस्य शास्त्रीयविधिना शिक्षणं प्रदातव्यं वर्त्तते। यदि शास्त्रपद्धत्या शिक्षणं न दीयते तर्हि छात्राणाम् उच्चारणं विकृतं भवेत्। संस्कृतस्य उच्चारणशिक्षणाय अधोदत्तविधयः प्रयोज्याः भवन्ति।

१. अनुकरणविधिः—अध्यापकः स्वयं संस्कृतध्वनीनां, वर्णानां, शब्दानां च उच्चारणं छात्राणां पुरतः सम्यक् कुर्यात्। छात्रा तदुच्चारणं शृत्वा, अनुकृत्य च सम्यक् उच्चरन्ति। यतो हि छात्राणाम् आदर्शपुरुषः अध्यापकः - एव। छात्राश्च नित्यं शिक्षकमनुकुर्वन्ति। अनुकरणं तेषां मुख्यलक्षणं भवति। अतः अध्यापकस्य आदर्शवाचनम्

अतिमहत्त्वपूर्णं भवति। शुद्धोच्चारणस्य, सुवाचनकौशलस्य प्रस्तुतीकरणं तथैव भवति। तदानीम् अध्यापकः, अल्पविराम, पूर्णविरामादिचिह्नान्यनुसृत्य सम्यक् पठेत्। तच्छ्रुत्वा छात्राणां च उच्चारणं, वाचनं च सम्यक् भविष्यति।

२. **आवृत्तिविधिः**— छात्राणाम् उच्चारणं यदि अशुद्धं भवति तर्हि संस्कृताध्यापकः छात्रैः वारं वारं ध्वनीनां, वर्णानां, शब्दानाम् आवृत्तिं कारयेत्। यावत् उच्चारणं सम्यक् भवति तावत् शुद्धोच्चारणस्य अभ्यासः कारणीय एव।

३. **परिवर्त्तनविधिः**—कक्ष्यायां बहुवारम् अभ्यासकारणेनापि भूयोभूयः उच्चारणे दोषं कुर्वन्ति तदा तादृशछात्राणां स्थानं परिवर्त्य यः सम्यक् उच्चारणं करोति तस्य पार्श्वे उपावेशनीयम्। अन्यथा तेषाम् उच्चारणे शुद्धता नागच्छेत्।

४. **अवरोधविधिः**—शीघ्रं शीघ्रं वदति चेत् तस्य उच्चारणे अशुद्धम्, अस्पष्टं चागमिष्यति। अतः अस्मिन् समये अध्यापकः तेषां शीघ्रतायाम् अवरोधः करणीयः। शनैः शनैः उच्चारणाय अभ्यासः दातव्यः। गच्छति समये सः सम्यगुच्चारणे समर्थः भवति।

५. **पूर्णताविधिः**—अस्मिन् विधौ ध्वनौ, वर्णे, शब्दे वा ध्यानं न दीयते। सम्पूर्णवाक्यस्य शुद्धोच्चारणे ध्यानं दीयते। नूतनशब्दानाम् उच्चारणावसरे विधिरयं अत्यन्तोपयोगी। अनेन छात्राणाम् आत्मविश्वासभावनायाः जागरणं भवति।

शुद्धोच्चारणोपायाः

१. वर्णानां शुद्धोच्चारणाय आवृत्ति-पुनरावृत्तिरूपेण सम्यक् अभ्यासः करणीयः।

२. प्रत्येकमप्यक्षरं शनैः शनैः वदेत्।

३. छात्रेभ्यः बहुश्रवणाय अवसरः प्रदेयः। बहुश्रवणेन सह ते व्यवहारकुशलिनो भवन्ति। एवं छात्राः वारं वारं नूतननूतनशब्दानां श्रवणेन शुद्धोच्चारणाय अवसरं प्राप्नुवन्ति। कक्ष्यायामपि यः सम्यक् उच्चरति तेन सह संवादकरणेनापि उच्चारणे सामर्थ्यं प्राप्नुयुः। अपि च भौगोलिक-ऐतिहासिकयात्रास्वपि तेभ्यः शुद्धोच्चारणश्रवणाय अवसरान् कल्पयेत्।

निष्कर्षः—

अनुकरणम्, अभ्यासः, आत्मविश्वासः, इति त्रयः शुद्धोच्चारणाय हेतुः। अध्यापकः यथा छात्राः एभिः त्रिभिः सह सन्निहिताः भवन्ति तथा अवसरं प्रकल्पयेत्। सर्वप्रथमं ते कठिनशब्दानां शुद्धोच्चारणं सामूहिकरूपेण कुर्युः। तत्पश्चात् योग्यच्छात्रैः अन्यच्छात्रेभ्यः शुद्धोच्चारणस्य अभ्यासः कारणीयः। तेन तेषां शुद्धोच्चारणे अधिकः प्रभावः नूनं पतति।

❑

१५. गद्यशिक्षणम्

तेषाम् ऋगर्थवशेन पादव्यवस्था गीतिषु सामाख्या शेषे यजुः इति जैमुनिमुनिना यजुश्शब्दस्य व्याख्या कृता। अर्थात् ऋग्वेदे पादव्यवस्था, साम गीयते, अवशिष्टं यजुरेव। यजुः अपादः, अगीतात्मकः। अत एव दण्डिना उक्तम् - अपादः पदसन्तानो गद्यम्। पादशून्या पदसंरचना एव गद्यमिति। न केवलं संहिताग्रन्थेषु ब्राह्मणेपनिषद्ग्रन्थेषु च उदत्ताः, राज्ञां चरितं च गद्यात्मककथनरूपे एव सन्ति। ऋग्वेदे नाराशंसिगाधाः सन्ति। समग्रे वेदसाहित्ये पद्येन सह गद्यस्यापि स्थानं विद्यते। गद्यमिदं सरलं, समासरहितं भूत्वा सुबोधकमस्ति। कुत्रचित् गद्येऽस्मिन् उपमारूपकादीनाम् अलङ्काराणां च प्रयोगः विहितः।

ततः वेदाङ्गेषु, आयुर्वेदादिग्रन्थेषु, सूत्रवाङ्मये च गद्यस्य प्राधान्यम् अस्ति। गभीरेषु दार्शनिकग्रन्थेष्वपि भाष्यरूपेण गद्यं लभ्यते। वैदिकसाहित्ये सरला सुबोधा गद्यशैली गभीरेषु शास्त्रग्रन्थेषु गभीरं रूपम् अधरत्। क्लिष्टस्य विषयस्य विवरणाय गद्यमपि प्रौढरूपमधरत्। अस्मिन् समये एव गद्यशैली सशक्ता, गभीरा जाता। तार्किकयुक्तिभिः प्रौढं नूतनं रूपं चालभत। पुराणेष्वपि गद्यं दृश्यते यत् सरसरूपेण वर्त्तते। अपि च प्रौढता, अलङ्कारता च प्रविष्टे। एवं क्रमेण वैदिकसूत्रभाष्यपुराणकालेषु विभिन्नरूपेषु दृश्यमानं गद्यं लौकिकसाहित्ये भिन्नं रूपम् अधरत्सरलं समासरहितं वैदिकगद्यं, प्रौढं गभीरं भाष्यकगद्यं, सरसं, सालङ्कारं पुराणगद्यं, समाससहितं, श्लेषाद्यलङ्कारोपेतं चमत्कारयुक्तं लौकिकगद्यमिति विमर्शका अभिप्रयन्ति।

वैदिककाले एव गद्यसाहित्यस्य उद्भवः जातः। संहिताग्रन्थेष्वेव गद्यांशः मिलति। ऋग्वेदस्य दशममण्डले - ऋतुं च सत्यं चाभीद्धातत्तपसोऽध्यजायत। ततो रात्र्यजायत। ततः समुद्रोऽर्णवः। समुद्रादर्णवादधिसंवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी। सूर्याचन्द्रमसौ धाता यथाऽपूर्वमकल्पयत्। दिवं च पृथिवीं चान्तरिक्षमथो सुवः इति सुमनोहरस्य गद्यस्य प्रस्तावः लभ्यते।

गद्यस्य लक्षणम्

ओजस्समासभूयस्त्वमेतद्गद्यस्य लक्षणम्॥

ओजो गुणसम्पन्नत्वं, समासबाहुल्यं च गद्यकाव्यस्य लक्षणम्। ओजसः लक्षणं काव्यप्रकाशे एवं प्रतिपादितम्—

दीप्यात्मविस्तृते हेतुरोजो वीररसस्थितिः।

आत्मनः, चित्तस्य वा या दीपितरूपा विस्तृतिः, तस्याः कारणम् ओजः।

व्यञ्जकास्तु —

वर्गस्याद्यतृतीयाभ्यां युक्तो वर्णौ तदन्मितौ।
उपर्यधो द्वयोर्वा स रेफाष्टठढैस्सह ॥
शकारश्च षकारश्च तस्य व्यञ्जकतां गताः।
तस्या समासबहुला घटनौद्धत्यशालिनी ॥

यथा— चञ्चद्भुजभ्रमितचण्डगदाभिघात—
संचूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानावनद्धघनशोणितशोणपाणि-
रुत्तंसयिष्यति कचांस्तव देवि भीमः॥

गद्यां कवीनां निकषं वदन्ति इति आभाणकवाक्यं गद्यस्य महत्त्वं प्रतिपादयति।

गद्यप्रभेदाः

अग्निपुराणकारः पञ्च गद्यकाव्यप्रभेदान् प्रत्यपादयत्। यथा - कथा, आख्यायिका, परिकथा, खण्डकथा, कथानिका चेति। अपादः पदसन्तानो गद्यमाख्यायिका कथा इति गद्यकाव्यप्रभेदो द्वौ इति काव्यादर्शकर्त्ता दण्डी न्यरूपयत्। अतः प्राधान्येन द्वौ भेदौ कथाऽख्यायिकारूपौ एव स्वीक्रियेते।

कथा—

न वक्त्रा परवक्त्राभ्यां चोक्ता नोच्छ्वासवत्यपि।
संस्कृताऽसंस्कृता चेष्टा कथाऽपभ्रंशभाक्तथा॥
अन्यैः स्वचरितं तस्या नायकेन तु नोच्यते।
स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः॥
कथा कल्पितवृत्तान्ता सत्यार्थाऽख्यायिका मता।

आख्यायिका—

संस्कृतानुकूलश्रव्यशब्दार्थपदवृत्तिना।
गद्येन युक्तोदात्तार्था सोच्छ्वासाख्यायिका मता॥
वृत्तमाख्ययते तस्या नायकेन स्वचेष्टितम्।
वक्त्रं चापरवक्त्रं च काले भावार्थशंसि च॥
कवेरभिप्रायकृतैः कथनैः कैश्चिदङ्किता।
कन्याहरणसङ्ग्रामविप्रलम्भोदयान्विता॥

उदा-बाणभट्टस्य हर्षचरितम्-आख्यायिका

आख्यायिकायाः वैशिष्ट्यं प्रतिपादयन् वदति स्म-

करोम्याख्यायिकाम्बोधौ जिह्वाप्लवनचापलम्

कादम्बरी-कथा (धिया निबद्धमतिद्वयी कथा) भवति।

पुनः गद्यं त्रिविधम्। यथा-वृत्तग्रन्थि, चूर्णिका, उत्कलिकाप्रायम् इति। पद्यभागवत् वृत्तग्रन्थि भवति। अनाविद्धललितपदं चूर्णम्।

गद्यसाहित्यपरिचयः

सुबन्धुः—अस्य वासवदत्ता इत्याख्यो ग्रन्थः एव संस्कृतगद्यसाहित्ये आद्यः इति विमर्शकाणाम् अभिप्रायः। बाणभट्टः हर्षचरिते ग्रन्थे वासवदत्तायाः प्रशंसाम् एवं चकार।

कवीनामगलद्दर्पो नूनं वासवदत्तया।
शक्त्येव पाण्डुपुत्राणां नूनं वासवदत्तया॥

बाणभट्टः—बाणोच्छिष्टं जगत्सर्वम्।

कादम्बरीग्रन्थस्य वैशिष्ट्यम्—

नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्ट स्फुटो रसः।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम्॥

कादम्बरीरसास्वादने आहारोऽपि न रोचते।
इति कादम्बरीविषयकाणि आभाणकानि सुप्रसिद्धानि॥

दण्डी— जाते जगतविाल्मीकौ कविरित्यभिधाऽभवत्।
कवी इति ततो व्यासो कवयस्त्वयि दण्डिनि॥

उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥

इत्यनेन दण्डिनः पदलालित्यं लोकप्रसिद्धमेव।

त्रयोऽग्नयः त्रयो वेदाः त्रयो देवास्त्रयो गुणाः।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः॥

दण्डिनः दशकुमारचरितम् गद्यप्रभेदेषु कथानिका भवति।

अन्ये केचन प्रसिद्धाः गद्यकवयः— तेषां काव्यानि

धनपालस्य तिलकमञ्जरी, जीवनधरचरितम् च, अगस्त्यस्य-कृष्णचरितम अम्बिकादत्तव्यासस्य - शिवराजविजयः, बदरीनाथ झामहोदयस्य-गुणेश्वरचरितम् नारायणखस्ते महोदयस्य-विद्वच्चरितपञ्चकम् च प्रसिद्धानि गद्यकाव्यानि।

गद्यविशेषा:

वर्त्तमानशिक्षाया: अनुसारं १0 प्रकारका: गद्यविशेषा: भवन्ति।

१. कथा - यथा - ऐतिहासिककथा:, पौराणिककथा:, नैतिककथा:, काल्पनिककथा:, विनोदपूर्णकथा:।

२. जीवनचरित्रम्

३. वैज्ञानिकाविष्कारा:

४. वर्णनम्, प्राकृतिकदृश्यम्

५. विचारात्मकनिबन्धा:

६. प्राकृतिकविषया:। यथा-जीवजन्तुपशुपक्ष्यादिविषया:

७. पत्रव्यवहार:

८. विमर्शनात्मका:-यथा-ग्रन्थविमर्श:, रचनाविमर्श:, व्यक्तिविमर्श:, सामाजिक-विमर्श:।

९. मानवव्यवहारात्मका:। यथा - निवास:, आचारव्यवहारा:, नीतिनियमादय:।

१०. यात्रा

गद्यशिक्षणोद्देश्यानि - सामान्यानि

प्राथमिकस्तरे - (परिचयात्मकस्तर:)

१. छात्राणां संस्कृतशब्दपरिचय:।

२. संस्कृतशब्दानां शुद्धं स्पष्टं च उच्चारणशिक्षणम्।

३. नूतनशब्दानां ज्ञानं प्रापयित्वा तेषां प्रयोगाय अवसरप्रदानम्।

४. संस्कृते सरलवाक्यानाम् अर्थावगमनाय क्षमताप्रदानम्।

५. संस्कृतभाषाया: सामान्यपरिचय:।

६. छात्रेषु संस्कृतपठनं प्रति अभिरुचिविकसनम्।

७. पाठगतभावानाम्, विचाराणां च ग्रहणशक्तिकल्पनम्।

८. संस्कृते विविधनैतिककथाभि: छात्रेषु चरित्रनिर्माणम्।

माध्यमिकस्तरे : (वर्धनात्मकस्तर:)

१. संस्कृतगद्यसाहित्यं प्रत्यभिरुच्युत्पादनम्।

१. छात्राणां शब्दभण्डारस्य, सूक्तिभण्डारस्य च वर्धनम्।

३. विविधध्वनीनां, कठिनशब्दानां च उच्चारणसामर्थ्यसम्पादनम्।

४. संस्कृतभाषाया: व्यावहारिकज्ञानपरिचय:।
५. कल्पनाशक्ते: वर्धनम्।
६. छात्रेषु नैतिकताया: विकास:।
७. भावाभिव्यक्तीकरणाय अवसरप्रदानम्।
८. पाठगत-आदर्शानां समाचरणाय प्रेरणाप्रदानम्.
९. विविधगद्यशैलीनां परिचय:।
१०. लेखकस्य भावानुसारं पठनाय क्षमतावर्धनम्।

उच्चस्तरे - (अनुसन्धानात्मकस्तरः)

१. छात्राणां संस्कृतभाषावर्णन शैलीनां परिचयप्रदानम्।
२. छात्राणां शब्दभण्डारस्य, सूक्तिभण्डारस्य च यथशक्ति वर्धनम्।
३. दीर्घदीर्घवाक्यानि पठित्वा तेषाम् अर्थावगमने सामर्थ्यसम्पादनम्।
४. विवेचनात्मकशक्ते:, समीक्षणात्मकशक्ते: च वर्धनम्।
५. चरित्रविकासाय सहयोगप्रदानम्।
६. संस्कृतगद्यसाहित्यस्य अध्ययने छात्रेषु अभिरुच्युत्पादनम्।
७. संस्कृते स्वाभिप्रायप्रकटनाय अवसरप्रदानम्।
८. शब्दार्थयो: सौन्दर्यानुभूतिज्ञापनम्।
९. व्यावहारिकज्ञानस्य विकास:।

विशिष्टोद्देश्यानि—

प्राथमिकस्तरे छात्राणां संस्कृतगद्यशिक्षणं सामान्यत: सरलवाक्यैरेव क्रियते। लघुलघुकथाश्च प्रयुज्यन्ते। माध्यमिकस्तरे, उच्चस्तरे च निबन्ध:, वर्णनं जीवनवृत्तं, नाटकं, यात्रा इत्यादिभिस्सह शिक्षणं भवति। एतेषां विशिष्टोद्देश्यानि एवं भवन्ति।

१. **कथा—** कथाया: विषयज्ञानम्, भावग्रहणम्, भाषाशैल्या: परिशीलनम्, शीलनिर्माणम्, कल्पनाशक्ते: विकास:, व्याख्याशैल्या: परिचय:।

२. **वर्णनम्—** प्राकृतिकसौन्दर्यस्य परिचय:, तर्कशक्ते: जागरणम्, वर्णनशैल्या: परिचय:।

३. **जीवनवृत्तम्**-महापुराणां जीवनवृत्तस्य ज्ञानम्। जीवनमूल्यानां परिचय:। चरित्रस्य विकास:।

४. **निबन्ध:—** तत्तद्विषयवस्तुन: ज्ञानम्। जिज्ञासाया: विकास:। बौद्धिकशक्ते: विकास:, चारित्रकविकास:।

५. नाटकम्— रूपकसाहित्यस्य परिचयः। उद्वेगानाम् उदात्तीकरणम्।
रसानुभूतिः। आनन्दानुभूतिः। चरित्रनिर्माणम्।
विविधसन्दर्भेषु मर्यादापूर्वकव्यवहारस्य ज्ञानम्।

६. वैज्ञानिकाविष्कारः —ज्ञानवर्धनम्, वैज्ञानिक-आविष्कारणस्य, अभिवृद्धेः च गुणदोषयोः ज्ञानम्, विश्वगतेः अवगमः, साहसिककार्येषु अभिरुच्युत्पादनम्।

७. पत्रलेखनम् —विविधसन्दर्भेषु पत्रलेखनाभ्यासः। पत्रलेखनस्य स्वरूपावगमः। पत्रलेखने सम्बोधनपदादीनां ज्ञानम्।

गद्यशिक्षणसोपानानि

१. प्रस्तावना २. उद्देश्यकथनम् ३. प्रस्तुतीकरणम्
(अ) आदर्शवाचनम् (आ) अनुवाचनम् (इ) त्रुटिसंशोधनम्

४. पाठप्रवर्धनम् (पाठविकासः)
(अ) काठिन्यनिवारणम् (आ) विचारविश्लेषणम् (इ) सारकथनम्

५. मौनवाचनम् ६. पुनरावृत्तिः

७. कथाकार्यम् ८. गृहकार्यम्

आदर्शगद्यांशः

पूर्वं पाण्ड्यदेशे इन्द्रद्युम्नः इति ख्यातो विष्णुभक्तो राजा आसीत्। स चिरं धर्मेण भुवं प्रशास्य पुत्रे राज्यभारं निधाय वानप्रस्थाश्रमी मलयपर्वते अवसत्। स तत्र कस्मिंश्चित् दिने विष्णोः पूजां कुर्वन् ध्यानपरः आसीत्। तेन पथा प्रस्थितः महायशाः अगस्त्यमहर्षिः शिष्यैः सह तत्राजगाम। मौनी सः राजा तं दृष्ट्वाऽपि देवपूजालोपभयात् तमृषिं नापूजयत्। क्रुद्धः अगस्त्यः—"यस्मात् त्वं मां प्रत्युत्थानादिकमकृत्वा अवामनुथाः, तस्मात् त्वं गजो भव" इति तं शशाप। तस्मात् इन्द्रद्युम्नः गजेन्द्रो भूत्वा त्रिकूटनाम्नि पर्वते अभवत्। कदाचित् सः गजेन्द्रः घर्मार्त्तो अनेकाभिः करेणुभिः कलभैश्च सह जलं पातुं तत्रत्यं कञ्चन विपुलं सरः अभ्यगात्। सपरिवारः सः तत्सरो विगाह्य जलं निकामं पपौ। शुण्डादण्डेन जलमुद्धृत्य करेणूः सिषिञ्चे। ताभिश्च सः तथा सिक्तः। एवं तत्सरः लोडयन्तं गजेन्द्रः तत्र जलाशये स्थितो ग्राहः चरणे जग्राहः॥

गद्यशिक्षणविधयः

(अ) व्याख्याविधिः—

अध्यापकः गद्यपाठ्यांशे विद्यमानानां कठिनपदानां, वाक्यानां वा व्याख्यां करोति। सन्धिपदानां विभागः, समस्तपदानां विग्रहवाक्यानि च वदति। एतादृशपदानां पदविभागानन्तरमेव अर्थावगमः करणीयः। अपि च यथासमयं एते शब्दाः

श्यामफलकस्योपरि लेखनीयाः। प्रसङ्गानुसारं सन्धि-समासनियमानां च ज्ञानमपि देयं भवति। व्याख्या त्रिप्रकारका भवति-शब्दानां व्याख्या, वाक्यानां व्याख्या, सूक्तीनां व्याख्या। छात्रेभ्यः प्रत्येकस्मिन् पाठे केचन नतूनशब्दाः भवन्ति। अर्थात् ते शब्दाः छात्राणां पूर्वपरिचिता न भवन्ति, ते एव कठिनशब्दाः इत्युच्यन्ते। यदि येषां शब्दानाम् अर्थं स्पष्टं न भवति, तर्हि गद्यपाठः न वा सफलः, न वा छात्राणां लाभदायको भवति। प्रायः अध्यापकः कठिनशब्दानां व्याख्या, अनुवादो वा मातृभाषायां करोति। परमेतत् अर्थबोधने अपर्याप्तम्। अतः संस्कृतशब्दानां, वाक्यांशानां च व्याख्यातुम् अधोदत्तविधयः अनुसरणीयाः।

१. **प्रदर्शनम्**—शब्दपरिचयाय, अर्थावगमनाय च अयमुपायः सुकरो विद्यते।

२. **वस्तु**—चित्रम् - यथा - करेणुः कलभः ग्राहः, शुण्डा

३. **मानचित्रम्**—अस्ति भागीरथीनदीतीरे पाटलीपुत्रं नाम नगरम्। अत्र भागीरथी, पाटलीपुत्रम् (पट्ना) मानचित्रेण (माप्) पाठयितुं शक्नोति। केरलेषु पूर्वानद्यास्तीरे कालटि नाम अग्रहारे शिवगुरु नामा कश्चन साङ्गवेदाधीती विप्रोत्तमः आसीत्।

अत्र भारतदेशस्य मानचित्राधारेण केरल, पूर्णानदी, कालटि-इत्यादिपदानां स्पष्टीकर्त्तुं पारयति।

४. **प्रतिकृतिः**—विविधवस्तूनां, महापुरुषाणां, प्रतिकृतीः छात्रैः, अध्यापकेन वा निर्मीय कक्षायां दर्शयित्वा पाठयितुम् अध्यापकः शक्नोति। विशिष्य यदि पाठानां मध्ये विद्यमानानां चित्राणां बृहदाकारेण प्रतिकृतिं कारयित्वा दर्शयितुं च प्रभवति। विविधकठिनशब्दानामवबोधने अयमुपायः नितरां सहकरोति।

५. **प्रतिमा**—देवतानां, देशनायकानां, जन्तूनां, प्रतिमाः निर्मीय तत्तदर्थावबोधनं कर्त्तुमध्यापकः पारयति।

६. **रेखाचित्रम्**—सारण्यः (टेबुल्स), वृत्तमाध्यमेन, विविधरेखाचित्रमाध्यमेन च केचन अंशाः पाठनीयाः भवन्ति। तानंशान् सामान्यरूपेण पाठयामः चेत् अर्थावगमने छात्राः क्लेशमनुभवन्ति। अतः तादृशानाम् अंशानां पाठने अध्यापकः रेखाचित्राणि आश्रयेत्। तेन पाठनं रुचिकरं, छात्राणां बोधगम्यं च भवति।

(आ) उद्बोधनविधिः—

अनेन विधिना शब्दानामर्थं छात्राः स्वयं यथा कथयन्ति तथा अध्यापकेन प्रयत्नो विधेयः। तदर्थम् अध्यापकः वस्तु-चित्रादीन् प्रदर्शयन्ति। अभिनयेन सङ्केतं ददाति। तैः सङ्केतैः छात्राः अर्थं कथयितुं प्रयतन्ते। यदि एकः छात्रः न पारयति तर्हि अध्यापकः अन्यान् छात्रान् प्रष्टुं शक्नोति।

(इ) अनुवादविधिः—

अस्य विधेः अनुसारं शिक्षकः स्वयं शब्दस्य अर्थं मातृभाषायाम् अनूद्य (तत्समशब्दैः)श्यामफलके लिखित्वा च बोधयति। यथा—विपिनम्-अरण्यम्, व्योम-आकाशः।

(ई) कोशविधिः—

कोशविधेरनुसारम् अध्यापकः शब्दानामर्थज्ञानम् अमरकोशादि ग्रन्थानामाधारेण करोति। यथा विपश्चित् शब्दः—

विद्वान् विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः।
धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः॥

धीमान् सूरिः कृती कृष्टिलब्धवर्णो विचक्षणः दूरदर्शी दीर्घदर्शी ...... इत्यमरः।

(अत एव पाठयोजनालेखनसन्दर्भे उपर्युक्तग्रन्थानां सूची अपि लेखापानीया।)

अत्र विपश्चित् इति शब्दस्य पण्डित इति पर्यायशब्दकथनेन अध्यापकः सम्यक्तया अर्थावबोधनं कर्तुं शक्नोति।

(उ) अनुप्रयोगविधिः—

वाक्येषु तत्तच्छब्दान् अनुप्रयुज्य अर्थावबोधः कर्तुं शक्यते।

यथा- तथा	-	यथा राजा तथा प्रजाः।
यदा-तदा	-	यदा अध्यापकः आगच्छति तदा छात्राः उत्तिष्ठन्ति।
		यदा सूर्यः उदेति तदा अन्धकारः नश्यति।
		यदा धर्मस्य हानिः भवति तदा भगवान् अवतरति।
यावत्-तावत्	-	मन्त्री यावत् भाषणं करोति तावत् कार्यं न करोति।
		यावत् धनं तावत् बान्धवाः।
यदि - तर्हि	-	यदि सर्वे बुद्धिमन्तः तर्हि चौर्यं कथम् ?
		यदि जीवितुमिच्छसि तर्हि ममाज्ञां पालय।
		यदि गुणाः सन्ति तर्हि स्वयं विकसन्ति।

(ऊ) तुलनाविधिः—

शब्दानामर्थं तत्तच्छब्दानां पर्यायवाचिपदैः, विपरीतार्थकपदैर्वा तुलनां कृत्वा पाठयितुं शक्नोति अध्यापकः।

यथा - रिपुशब्दस्य अर्थः - अरिः, शत्रुः, विपक्षी, इत्यादिशब्दैस्सह तुलनां विधाय अर्थावबोधनं कर्तुं शक्यते।

(ऋ) व्युत्पत्तिविधिः —

अस्मिन् विधौ शब्दानां मूलशब्द, मूलधातु, प्रत्यय, उपसर्गान् विश्लिष्य अर्थावबोधनं भवति, यथा—निशाशब्दः। नितरां श्यति-तनूकरोति व्यापारान् इति। शो तनूकरणे इति धातुः। आतश्चोपसर्गे इति सूत्रेण कप्रत्ययः। तेन निशा इति रूपं सिद्ध्यति।

एवमेव— दाशरथिः - दशरथस्य अपत्यं पुमान् दाशरथिः।
जानकी- जनकस्य अपत्यं स्त्री जानकी।

वेदव्यासः– वेदान् व्यस्यति इति वेदव्यासः।

वैनतेयः – विनत्याः अपत्यं पुमान् वैनतेयः।

भागीरथी–भगीरथेन आनीता इयम् – भागीरथी (गङ्गा)।

सन्धिपदानि, समस्तपदानि च विश्लिष्य अर्थावबोधनं कृत्वा पाठनं कदाचित् सुकरं भवति। यथा—

मातेव रक्षति पितेव हिते नियुङ्क्ते

कान्तेव चाभिरमयत्यपनीय खेदम्।

अत्र – माता + इव, पिता + इव, कान्ता + इव,

च + अभिरमयति, अभिरमयति + अपनीय।

(लृ) प्रसङ्गविधिः—

केषाञ्चन शब्दानाम् स्पष्टीकरणं भौगोलिक-ऐतिहासिक-पौराणिकप्रसङ्गविवरणेनापि भवति।

(क) ऐतिहासिकप्रसङ्गः—

भगीरथः – एषः अंशुमतः पुत्रः। स्वपूर्वजनां सगरपुत्राणाम् उद्धरणाय ब्रह्माणमाराधयति स्म। ततो गङ्गाम् अप्रार्थयत्। तां भूलोकमानेतुं शिवं प्रति तपः अकरोत्। गङ्गां पीतं जह्नुं संप्रार्थ्य गङ्गां भूलोकमानीय सगरपुत्रान् स्वर्गं प्रापयति स्म। अस्यैव पुत्रौ–नाभागश्रुतौ।

कद्रुवा —

कश्यपमहर्षेः भार्या। दक्षस्य पुत्री। विनतायाः सपत्नी। अस्या सहस्रसंख्याकाः पुत्राः सन्ति। कद्रूविनते समुद्रतीरे विहरमाणे उच्चैश्रवमिति अश्वं दृष्ट्वा तस्य पुच्छं श्वेतं, कृष्णम् वा इत्यस्मिन् विषये स्पर्धां कुरुतः। या पराजिता सा अन्यस्या दासी भवेदिति नियमः कृतः। स्ववाक्यं यथार्थं कर्तुं स्वपुत्रान् अश्वस्य पुच्छे लम्बमानाः भवन्तु इति कथयति कद्रुवा। परं सर्वे तें निराकुर्वन्। अन्ते कर्कोटकः इति पुत्रः तस्या वाक्यं पालयति। एवं विनता कद्रुवायाः दासी भवति।

(ख) भौगोलिकप्रसङ्गः—

मलयपर्वतः– लोके सप्त कुलपर्वताः सन्ति। तेषु अन्यतमः भवति–मलयपर्वतः।

महेन्द्रो मलयस्सह्यो देवतात्मा हिमालयः।

ध्येयो रैवतको विन्ध्यो गिरश्चारावलिस्तथा॥

पाटलीपुत्रम्–गङ्गानद्याः तीरे इदं नगरमस्ति। पाटली, पुत्रकः इत्येताभ्यां नाम्ना इदं प्रसिद्धमभवत्। पाटली प्राक् महेन्द्रस्य पुत्री। पुत्रकस्य शिवानुग्रहः आसीत्। अयं

मयस्य कुमारान् वञ्चयित्वा तेभ्यः दण्डं, घटम् उपानहौ च नीत्वा तेषां सहायेन राजपुत्रीं पाटलीम् ऊढवान्। ततो नगरमिदं निर्मितम्।

(ए) पौराणिकप्रसङ्गः—

संस्कृतसाहित्ये अष्टादश पुराणानि, उपपुरणानि च विद्यन्ते। पाठनावसरे यदि कदाचित् कश्चन पौराणिकप्रसङ्गः आगतः तर्हि तस्य विषये पौराणिकपृष्ठभूमिः का इति छात्रेभ्यः पाठनीया वर्त्तते। यथा — सः त्रिशङ्कुस्वर्गे विद्यते। सामान्योऽर्थः भवति सः डोलायमानस्थित्यां वर्त्तते इति। त्रिशङ्कुस्वर्गस्य, डोलायमानस्थितेः कः सम्बन्धः ? इति विषयज्ञानपनाय, पाठनाय च पौराणिकी त्रिशङ्कुकथां श्रावयेत्। एवमेव विश्वामित्रसृष्टिः।

(ए) टीकाविधिः—

अयं विधिः प्राचीनकालात् संस्कृतशिक्षणे प्रचाल्यमाना वर्त्तते। टीका नाम निरन्तरव्याख्या। अस्य विधेः समन्वयकविधिरिति नामाऽपि विद्यते। यतो हि अस्मिन् विधौ आवश्यकतानुसारं कोश-प्रयोग-व्युत्पत्ति-इत्यादिविधयः प्रयुज्यन्ते।

निष्कर्षः—

अध्यापकः, शब्दार्थसम्बद्धव्याख्याविषये उपर्युक्तविधीन् प्रयोक्तुं शक्नोति। प्राथमिकमाध्यमिकस्तरयोः उद्बोधनविधिः अधिकतया उपयोक्तव्यः। अत्रैव अपेक्षितानुसारं प्रयोगविधिं च प्रयोकुं शक्यते। उच्चस्तरे कोश-तुलना-व्युत्पत्तिविधीनां प्रयोगः लाभदायको भवति। कठिनशब्दानां, वाक्यानां च व्याख्यया सह अर्थं, भाषागतसौन्दर्य; व्याकरणं च पाठनीयम्। छात्रा एव सन्धि समास-समाससम्बद्धप्रश्नान् यथा पृच्छेयुः, शिक्षकेन तथा प्रयत्नः विधेयः।

आदर्शगद्यपाठः

षष्ठी कक्ष्या—

ध्रुवः

कदाचित्	अङ्कं	अध्यारोहत्
आरोढुम्	प्रायतत	आह
तोषय	प्रययौ	अपश्यत्
निवेद्य	जग्राह	अलभत

पूर्वम् उत्तानपादो नाम राजा आसीत्। तस्य सुनीतिः सुरुचिः इति द्वे भार्ये स्तः। तयोः ज्येष्ठायाः सुनीतेः पुत्रः ध्रुवः। सुरुच्याः कुमारस्तु उत्तमः। राज्ञः सुरुच्याम् उत्तमे च महती प्रीति अवर्त्तत। कदाचित् उत्तमः ध्रुवश्च क्रीडतः स्म। तदानीम् उत्तमः पितुः अङ्कम् अध्यारोहत्। तं दृष्ट्वा ध्रुवोऽपि पितुः अङ्कमारोढुं प्रायतत। तदा तं सुरुचिः न्यवारयत्, आह च एवं - मम कुमारस्यैव पितुः अङ्कम् आरोढुम् अधिकारः। तव न इति।

बालो ध्रुवः तस्या वाक्यानि श्रुत्वा भृशं दुःखितः मात्रे तत्सर्वं न्यवेदयत्। सुनीतिरपि वत्स! भगवन्तं तपसा तोषय। तदङ्क एव उपविष्टो भविष्यसि - इति तमवदत्। एवं मात्रा प्रेरितः ध्रुवः तपः कर्त्तुं वनाय प्रययौ।

मार्गमध्ये सः नारदम् अपश्यत्। स्ववृत्तं तस्मै निवेद्य तस्मात् वैष्णवं मन्त्रं जग्राह। सः जपेन विष्णुं संतोष्य बहून् वरान् अलभत। ततः चिरं राज्यं परिपाल्य भगवदाज्ञानुसारेण ध्रुवपदं प्राप। अद्यापि उत्तरस्यां दिशि अस्माभिः ध्रुवोऽयं नक्षत्रतया दृश्यते।

उद्यमेन दुष्कराण्यपि कार्याणि सिद्ध्यति।

अभ्यासः

१. प्रश्नाः—

(१) उत्तानपादः कः ? उ. उत्तानपादः राजा।

(२) ध्रुवः कस्याः पुत्रः ? उ. ध्रुवः सुनीतेः पुत्रः।

(३) उत्तमः कस्याः पुत्रः ? उ. उत्तमः सुरुच्याः पुत्रः।

(४) सुरुचिः ध्रुवं किमाह ? उ. सुरुचिः ध्रुवम् एकमकथयत् - पुत्रस्य उत्तमस्यैव पितुः अङ्कम् अधिरोढुम् अधिकारः तव न इति।

(५) सुनीतिः ध्रुवं किमवदत् ? उ. सुनीतिः ध्रुवं वत्स! भगवन्तं विष्णुं तपसा तोषय। तदङ्के एव उपविष्टो भविष्यति इति अवदत्।

(६) ध्रुवः नारदात् किं जग्राह ? उ. ध्रुवः नारदात् वैष्णवमन्त्रं जग्राह।

(७) इदानीं ध्रुवः कुत्र कथं दृश्यते ? उ. इदनीं ध्रुवः उत्तरदिशि नक्षत्रतया दृश्यते।

(८) अस्मिन् पाठे का नीतिः ? उ. उद्यमेन दुष्कराण्यपि कार्याणि सिद्ध्यन्ति।

२. उचितैः कुण्डलीदत्तपदैः वाक्यानि पूरयत —

(१) पूर्वं उत्तानपादो नाम .... आसीत्। (बालः, वैश्यः, राजा) उ. राजा

(२) सुनीतेः पुत्रः .... (उत्तमः, भास्करः, ध्रुवः) उ. ध्रुवः

(३) उत्तमस्य माता .... (सावित्री, लक्ष्मीः, सुरुचिः) उ. सुरुचिः

(४) ध्रुवः तपः कर्त्तुं वनाय .... (गमिष्यति, प्रययौ, न गतः) उ. प्रययौ

३. उचितैः पदैः पूरयत—

(१) उत्तानपादस्य .... इति द्वे भार्ये बभूवतुः। उ. सुनीतिः, सुरुचिः

(२) उत्तानपादस्य .... महती प्रीतिः वर्त्तते। उ. सुरुच्याम्।

(३) उत्तमः पितुः अङ्कम्.................. । उ. अध्यारोहत्

(४) ध्रुवः मार्गमध्ये नारदं .... । उ. अपश्यत्।

४. वर्तमानकाले लिखत —

(१) उत्तानपादो नाम राजा आसीत्। उत्तानपादो नाम राजा अस्ति।

(२) उत्तमः पितुः अङ्कम् अध्यारोहत् उत्तमः पितुः अङ्कं अधिरोहति।

(३) मार्गमध्ये स नारदमपश्यत् मार्गमध्यं स नारदं पश्यति।

(४) सः बहून् वरान् अलभत। सः बहून् वरान् लभते।

५. बहुवचने लिखत —

(१) राजा राज्यं पालयति। राजानः राज्यं पालयन्ति।

(२) सः नारदं पश्यति। ते नारदं पश्यन्ति।

(३) राजा आसीत्। राजानः आसन्।

(४) आकाशे नक्षत्रं दृश्यते। आकाशे नक्षत्राणि दृश्यन्ते।

६. पाठानुसारं चित्राणां निर्माणं कृत्वा स्ववाक्येषु कथां लिखत।

७. नक्षत्राणां नामानि लिखित।

सप्तमीकक्षा—

कालचक्रम्

(वर्णनात्मकपाठः)

कठिनपदानि—

१. निमेषः	२. प्रावृट्	३. सप्ताहम्	४. पक्षः
५. कर्षकः	६. चन्द्रिका	७. सलिलम्	८. पर्णानि
९. तपति	१०. कूजति	११. पङ्कम्	१२. मधुपः
१३. कुसुमिताः	१४. घण्टा	१५. शुष्यति	१६. वाति

षष्टिनिमेषा एका घण्टा। चुतर्विंशतिघण्टा एकं दिनम्। एकस्मिन् दिने दिवा रात्रिः इति द्वौ भागौ स्तः। सप्त दिनानि सप्ताहमित्युच्यते। पञ्चदश दिनानि एकः पक्षः। द्वौ पक्षौ एकः मासः। द्वादश मासा एकः संवत्सरः। द्वौ मासौ एकः ऋतुः। तस्मात् षड् ऋतवः। ते च क्रमेण—

१. वसन्तः	२. ग्रीष्मः	३. प्रावट्
४. शरत्	५. हेमन्तः	६. शिशिरः इति।

चैत्रवैशाखमासौ वसन्तर्तुः। वृक्षा कुसुमिता भवन्ति। कोकिलाः कूजन्ति। मधुपाः मधु पिबन्ति। उपवनानि शोभन्ते। ज्येष्ठाषाढौ ग्रीष्मर्तुः। सूर्यः तीव्रं तपति। नद्यादिषु जलं शुष्यति। दिवा वर्धते। जनाः तापमनुभवन्ति।

श्रावणभाद्रपदौ वर्षर्तुः। मेघाः वर्षन्ति। पर्वताः शीतलाः भवन्ति। नद्यादयः जलपूरिताः भवन्ति। भूमिः सस्यश्यामला जायते। कर्षकाः मोदन्ते। आश्वयुजकार्तिकौ शरदृतुः। आकाशं निर्मलं भवति। मेघाः निर्जलाः सञ्चरन्ति। चन्द्रिका विशदा भवति। मार्गाः पङ्करहिताः स्युः।

मार्गशीर्षपौषौ हेमन्तर्तुः। रात्रिः वर्धते। सूर्यः मन्दं तपति। विस्तारेण हिमं पतति। सलिलं शीतलतरं भवति। वायुः अतिशीतः वाति। माघफाल्गुनौ शिशिरर्तुः। वृक्षेभ्यः पर्णानि पतन्ति। सस्यानि फलन्ति। शीतम् अधिकतरं भवति।

अभ्यासः

क. प्रश्नाः—

१. एकस्मिन् दिने कति भागौ स्तः ? कौ च तौ ?

२. कति दिनानि सप्ताहे ?

३. कति मासौः संवत्सरे ?

४. ऋतवः कति ? के च ते?

ख. रिक्तस्थानानि पूरयत—

१. ग्रीष्मे नद्यादिषु जलं .... ।

२. चतुर्विंशतिघण्टाः .... ।

३. चैत्रवैशाखमासौ .... ऋतुः।

४. मधुपाः .... पिबन्ति।

५. वृक्षेभ्यः .... पतन्ति।

ग. समीचीनं वाक्यं (√) चिह्नेन असमीचीनं तु (×) चिह्नेन च सूचयत—

१. मार्गशीर्षपौषौ वर्षर्तुः। ( )

२. ज्येष्ठाषाढौ ग्रीष्मर्तुः। ( )

३. आश्वयुजकार्तीकौ वसन्तर्तुः। ( )

४. माघपाल्गुणौ शिशिरर्तुः। ( )

५. वसन्ते वृक्षाः कुसुमिताः भवन्ति। ( )

ग. वृध् धातुः - लट् रूपाणि—

वर्धते - वर्धेते - वर्धन्ते

वर्धसे - वर्धेथे - वर्धध्वे

वर्धे - वर्धावहे - वर्धामहे

घ. समुचितं रूपं अधोरेखाङ्कितं कुरुत।

१. कृषकौ .... । १. मोदते २. मोदेते ३. मोदन्ते।

२. उपवनं .... । १. शोभते २. शोभेते ३. शोभन्ते।

३. नक्षत्राणि .... । १. प्रकाशते २. प्रकाशेते ३. प्रकाशन्ते।

अष्टमी कक्षा—

वेदव्यासः

(कथात्मकपाठः)

पुरा अस्माकं श्रेयोऽभिलाषिणः बहवः महर्षयः मतविषयकान्, मन्त्रतन्त्रात्मकांश्च ग्रन्थान् व्यरचयन्। तेषु महानुभावेष्वन्यतमः व्यासमहर्षिः। इक्ष्वाकुवंशस्य कुलगुरोः वसिष्ठस्य शक्तिरिति पुत्र आसीत्। शक्तेः पुत्रः पराशरः। तस्य सत्यवत्यामेकः पुत्रो जातः। अयं सात्यवतेयः बदरीवने जातत्वात् बादरायणः अभवत्। असौ वेदानां विभागं कृतवान्। अत एव वेदव्यास इति ख्यातिं लब्धवान्। किञ्च कृष्णवर्णत्वात् द्वीपवासत्वाच्च एषः कृष्णद्वैपायन इत्यप्याहूयते। श्लोकः—

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः।
अफाललोचनश्शम्भुर्भगवान् बादरायणः॥

इत्यनेन श्लोकेन भारतीयास्सर्वे व्यासं त्रिमूर्त्यात्मकं मन्यन्त इति ज्ञायते। व्यासमहर्षिः उपनिषदः, अष्टादशपुराणानि च विरचितवान्। कुरुवंशीयानां चरितं वर्णयितुं महाभारतमिति नाम्ना उद्ग्रन्थं रचितवान्। वेदानाम् उपनिषदां च पठनं न सर्वेषां सुलभमिति मत्वा महामुनिरयं स्वीये भारतग्रन्थे यथावसरं तत्र तत्र वेदोक्तधर्मानपि विशदीचकार। अत एव महाभारतस्य पञ्चमवेद इति ख्यातिरस्ति।

द्वापरयुगस्य चरमभागे पाण्डवानां कौरवाणां च मध्ये महासङ्ग्रामस्सञ्जातः। तस्याद्यन्तौ समग्रमपश्यत् व्यासः। तस्मादेव तां कथामसौ यथातथं नवरसभरितमलिखत्। उत्तमग्रन्थेषु अन्यतममिमं भारतग्रन्थं व्यासः वर्षत्रयकाले लिखित्वा, मनुष्यलोके प्रचारं कर्तुं स्वशिष्यं वैशम्पायनं नियुक्तवान्। अस्मिन् ग्रन्थे लक्षादधिकाः श्लोकाः सन्ति। महत्त्वात् भारवत्त्वाच्च महाभारतमुच्यते इत्यार्योक्तिरप्यस्ति।

व्यासमधिकृत्य बहुविधाः कथाः कथयन्ति। तास्वेषा कथा प्रसिद्धा।

व्यासः स्वशिष्यैस्सह काशीपट्टणे निवसति स्म। एकस्मिन् दिने सशिष्यं नगर्यां भिक्षार्थमगच्छत्। कुत्रापि वा भिक्षा न लब्धा। तदा व्यथितः स व्यासः काशीवासिनः जनान् अभिशप्तुम् उद्युक्तः। तत् ज्ञात्वा विश्वेश्वरस्य पत्नी विशालाक्षी व्यासाय भिक्षां दत्वा "त्वं काशीमगरे निवसितुमनर्हः। यतो हि अत्रास्थानेव शप्तुमुद्युक्तः। अतो अन्यत्र

गच्छ'' इत्यादिदेश। तेन कारणेन निर्विण्णः स महर्षिः अष्टम्यां, चतुर्दश्यां च काशीनगरीमागत्य विश्वेश्वरं पूजयितुमनुमतिं लब्ध्वा गङ्गानदीं तीर्त्वा एकत्र निवासमकरोत्। तस्य प्रदेशस्य व्यासकाशी इति नाम।

व्यास- वेदविभागाद्युत्कृष्टकार्याणि कृत्वापि शान्तिहीनः, व्याकुलचित्तः, स्वाश्रमे निवसति स्म। एकदा नारदमुनीन्द्रः व्यासं द्रष्टुं सत्याश्रममागत्य विचारग्रस्तं तं विलोक्य श्रीमहाविष्णोः चरितं विरचय, मनश्शान्तिर्भविष्यति इत्यकथयत्। तदा व्यासः विष्णुपुराणं, भागवतं च व्यरचयत्। भागवते श्रीकृष्णस्य चरितमभिवर्णितम्। अद्यापि ग्रन्थोऽयं बहुभिः पठ्यते, श्रूयते च।

एवं वेदव्यासः वेदान् विभज्य, उपनिषद, अष्टादशपुराणानि च विरच्य, महाभारतग्रन्थं विलिख्य, न केवलं संस्कृतवाङ्मयस्य किन्तु सर्वेषां भारतीयानां च महोपकारं कृत्वा चिरस्मरणीयः अभवत्।

व्यासं वशिष्ठनप्तारं शक्तेः पौत्रमकल्मषम्।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम्॥

अभ्यासः

(क) प्रश्नाः —

१. भारतीयाः व्यासं कथं मन्यन्ते स्म ?

२. व्यासस्य बादरायणः, सात्यवतेयः, कृष्णद्वैपायनः, इति नामानि कुतः सञ्जातानि ?

३. बादरायणः वेदव्यास इति कदा प्रभृति व्यवह्रियते?

४. व्यासः कियति काले महाभारतग्रन्थं व्यरचयत् ?

५. महाभारते केषां कथा वर्णिता ?

६. कुतः महाभारतं पञ्चमवेद इति कथ्यते ?

७. महाभारतकथां मनुष्यलोके प्रचारं कर्त्तुं कं नियुक्तवान् ?

(ख) अधो दत्तप्रश्नयोः दशवाक्येषु उत्तरं ददत —

१. व्यासकाशी इति नाम तस्य प्रदेशस्य कुतस्सञ्जातम् ?

२. व्यासः विष्णुपुराणं भागवतं च केन कारणेन व्यरचयत् ?

(ग) दत्तैः पदैः रिक्तस्थानानि पूरयत—

(लब्धवान्, कृतवान्, नियुक्तवान्, रचितवान्)

१. बादरायणः वेदानां विभागं ....।

२. नारदवचनात् व्यासः विष्णुपुराणं ....।

३. भागवतं लिखित्वा व्यासः शान्ति ....।

४. भारतकथायाः प्रचारार्थं व्यासः वैशम्पायनं ....।

(घ) जनकस्य अपत्यं स्त्री जानकी। शकुन्तलायाः अपत्यं पुमान् शाकुन्तलेयः। उपरि दत्तानामुदाहरणानां साहाय्येन एतेषां विग्रहवाक्यानि लिखत—

१. सात्यवतेयः २. पौत्रः ३. दाशरथिः ४. वासुदेवः

(ङ) वचनान्तरे लिखत —

अ. १. नप्तारं २. नगर्यां ३. उपनिषदः ४. पुराणानि

आ. १. अकथयत् २. अस्ति ३. गच्छ ४. निवसति

(च) सन्धत्त— १. श्रेयः + अभिलाषिणः २. उक्तिः + अपि

३. श्लोकाः + सन्ति ४. वेदः + इति

(छ) विभजत— १. आद्यन्तः २. महोपकारः

३. मूर्त्यात्मकम् ४. आर्योक्तिः

नवमी कक्ष्या—

सम्भाषणम्

(संवादात्मकपाठः)

कौसल्या - जात, अस्ति ते माता ? स्मरसि वा तातम् ?

लवः - न हि।

कौसल्या - ततः कस्य त्वम् ?

लवः - भगवतः सुगृहीतनामधेयस्य वाल्मीकेः।

कौसल्या : अपि कथितव्यं कथय।

लवः - एतावदेव जानामि।

(नेपथ्ये)

भो भो सैनिकाः। एष खलु कुमारश्चन्द्रकेतुराज्ञापयति - न केनचिदाश्रमाभ्यर्णभूमयः आक्रामितव्याः इति।

लवः - क एष चन्द्रकेतुर्नाम।

जनकः - जानासि रामलक्ष्मणौ दाशरथी।

लवः - एतावेव रामायणकथापुरुषौ।

जनकः - अथ किम् ?

लवः - तत्कथं न जानामि ?

जनकः - तस्य लक्ष्मणस्यायमात्मजश्चन्द्रकेतुः।

लवः - उर्मिलायाः पुत्रस्तर्हि मैथिलस्य राजर्षेः दौहित्रः।

अरुन्धती - आविष्कृतं कथाप्रवीण्यं वत्सेन।

जनकः - (विचिन्त्य) यदि त्वमीदृशः कथायामभिज्ञस्तद्ब्रूहि तावत् पश्यामः, तेषां दशरथस्य पुत्राणां कियन्ति किं नामधयान्यपत्यानि केषु दारेषु प्रसूतानि ?

लवः - नायं कथाविभागोऽस्माभिः अन्येन वा श्रुतपूर्वः।

जनकः - किं न प्रणीतं कविना ?

लवः - प्रणीतो न प्रकाशितश्च।

कौसल्या- जात, भ्रातापि ते अस्ति ?

लवः - अस्त्यार्यः कुशो नाम।

कौसल्या- ज्येष्ठ इति भणितं भवति।

लवः - एवमेव। प्रसवानुक्रमेण स खलु ज्यायान्।

जनकः - किं यमावायुष्मन्तौ ?

लवः - अथ किम्।

जनकः - वत्स, कथय कथाप्रपञ्चस्य कियान्पर्यन्तः ?

लवः - अलीकपौरापवादोद्विग्नेन राज्ञा निर्वासितां देवीं देवयजनसम्भवां सीतामासन्नप्रसववेदनामेकाकिनीमरण्ये लक्ष्मणः परित्यज्य प्रतिनिवृत्त इति।

(प्रविश्य सम्भ्रान्ता वटवः)

कुमार, कुमार! अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते, सोऽयमधुनास्माभिः, स्वयं प्रत्यक्षीकृतः।

लवः - अश्वोऽश्व इति नाम पशुसमाम्नाये सांग्रामिके च पठ्यते। तद् ब्रूत कीदृशः ?

वटवः - अये श्रूयताम्-

पश्चात् पुच्छं वहति विपुलं तच्च धूनोत्यजस्रं
दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव।
शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्।
किं व्याख्यानैर्व्रजति स पुनर्दूरमेह्येहि यामः॥

(इत्यजिने हस्तयोश्चाकर्षन्ति)

लवः – (सकौतुकोपरोधविनयम्) आर्याः पश्यत। एभिर्नीतोऽस्मि। (इति त्वरितं परिक्रामति)

वटवः– पश्यतु कुमारस्तावदाश्चर्यम्।

लवः — दृष्टमवगतं च। नूनमाश्वमेधिकोऽयमश्वः।

वटवः – कथं ज्ञायते ?

लवः – ननु मूर्खाः, पठितमेव हि युष्माभिरपि तत्काण्डम्। किं न पश्यथ प्रत्येकं शतसंख्याकाः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारः।

अभ्यासः

क. प्रश्नाः—

१. चन्द्रकेतुः कः ?

२. लवस्य ज्येष्ठो भ्राता कः ?

३. वाल्मीकिना रामकथाप्रपञ्चः कियत्पर्यन्तं रचितः ?

४. वटुभिः अश्वः कथं दुष्टः ?

५. अश्वः आश्वमेधिक इति कथं निर्णीतः लवेन ?

ख. क स्तबकस्थविशेषणैः सह ख स्तबकस्थानुचितान् विशेष्यान् संयोजयत् —

क.	ख.
कियन्ति	पौरापवादः
चापपाणिः	अपत्यानि
मेध्यः	भ्राता
कथापुरुषौ	सीताम्
अलीकः	रामलक्ष्मणौ
देवयजनसम्भवाम्	अश्वः
रक्षितारः	कवचिनः

दशमी कक्षा—

वार्तापत्रिकाः

(निबन्धात्मकपाठः)

आधुनिके काले न केवलं भारते किन्तु सर्वेष्वपि देशेषु वरीवर्ति विशिष्टं स्थानं वार्तापत्रिकाणाम्। वार्ता नाम लोकवृत्तान्तः। वार्ताप्रधानः पत्रिकाः वार्तापत्रिकाः न तु

केवलं वार्ताविषयका:। प्राचीने काले भारतदेशे वार्तापत्रिका: आसन्नित्यत्र नास्ति किञ्चित् प्रमाणम्। प्रायस्तदानीं प्राकृतानाम् आगन्तुकमुखेनैव देशान्तरवार्ताज्ञानम् आसीत्। क्रान्तदर्शिनां महर्षिणां तु नासीत् परोक्षं किमपि। श्रूयतां कण्वोक्ति: शाकुन्तले- "वनौकस: सन्तोऽपि लोकज्ञा वयम्" इति।

आलोच्यमाने आंग्लेयोपज्ञमेव वार्तापत्रिकाप्रकाशनम् इत्यवगम्यते। इदानीम् आंग्लेय्याम् अन्ताराष्ट्रियभाषायां, राष्ट्रभाषायां हिन्द्यां, प्रान्तीयभाषासु च परश्शतं पत्रिका: प्रकाश्यन्ते। न ता लोकवार्तापरा: किन्तु प्रायश: साहित्यविषयका:। अस्ति सुधर्मा नाम्नी अद्वितीया दिनपत्रिका या मैसूरुनगरात् संस्कृतभाषायां प्रकाश्यते। पृष्ठद्वयात्मकेऽस्मिन् प्रथमे पृष्ठे वार्तामात्रं द्वितीये तु साहित्यविषया: केवलमिति विभाग: अस्ति।

वार्तापत्रिका: न केवलं वार्ता: किन्तु विषयान्तराण्यपि प्रकाशयन्तीति पूर्वमेवोक्तम्। तत्र वार्तासु राजकीयवार्ता:, प्रान्तीयवार्ता: अखिलभारतीयवार्ता:, विदेशवार्ता: नगरग्रामवार्ता:, सम्पादकीयम्, क्रीडाविशेषा:, चलनचित्रवार्ता:, विपणिवार्ता: इत्यादय: अन्तर्भवन्ति।

विषयान्तरेषु शैत्य-आतप-वर्षपातस्थिति:, सप्ताहफलानि, सदसां संयोजनानि, प्रमुखभाषाणानां संग्रह:, धूमशकटविमानादिसमयसारिणी, आकाशवाणी-दूरदर्शनकार्यक्रमविशेषा इत्यादय: अन्तर्भवन्ति। पत्रिकार्थं वार्तासम्पादनाय देशस्य कोणे कोणे प्रतिग्रामं च पत्रिकाविलेखका: नियुक्ता भवन्ति। पत्रिकासु काश्चिद् दैनिक्य:, काञ्चन साप्ताहिक्य:, काश्चन पाक्षिक्य:, अन्या: मासिक्य:, त्रैमासिक्य:, षाण्मासिक्य:, वार्षिक्यश्च।

विद्यावन्त: प्रायश: सर्वेऽपि प्रतिदिनं वार्तापत्रिका: पठन्ति। स्वगृहे स्थितस्यापि सकलजगत: वृत्तं करतलामलकवत् प्रकाशयति वार्तापत्रिका। वार्तापत्रिका: तत्कालीनचारित्रकग्रन्था: इत्युक्तौ नास्ति अतिशयोक्ति:। विश्वे विविधदेशानां, देशे विविधप्रान्तानां च परस्परस्नेहभाव:, सद्भावश्च पत्रिकाद्वारा संवर्धते। पाल्यपालकयो: परस्पराभिप्रायप्रकाशनाय वार्तापत्रिका: नितराम् उपकुर्वन्ति। देशभक्ता: देशनायकाश्च यं यम् अभिप्रायं सभासु आविष्कुर्वन्ति स सोऽभिप्राय: पत्रिकामुखेन सुगमतया जनसामान्यमुपयाति। यदि वार्तापत्रिका: नाभविष्यन् तर्हि प्रजाप्रबोध: एव सुशक: नाभविष्यत्।

पत्रिकासु प्रतिसप्ताहं कश्चन विशेषविषय: वैज्ञानिक:, साहित्यिक: अन्यो वा प्रस्तूयते। कदाचित् प्रसिद्धदार्शनिकानां, वैज्ञानिकानां वा सिद्धान्तविषया: सुलभशैल्या निबध्यते। कदाचित् आधुनिकसमस्या: तन्निवारणोपायाश्च विमृश्यन्ते। एतेषां पठनेन जनानां बुद्धिविकास: भवति।

सामान्यतः वार्तापत्रिकाः विषयवैविध्येन सर्वेषामपि जनानाम् उपकाराय प्रवर्तन्ते। विशालभावनां वर्धयन्त्यः जनताम् ऐक्यमत्ये स्थापयन्ति। आधुनिके काले सर्वैरपि विद्यार्थिभिः लोकज्ञानाय वार्तापत्रिकाः प्रतिदिनं पठनीयाः।

अभ्यासः

क. प्रश्नाः —

१. वार्तापत्रिकाणाम् आधुनिके काले कीदृशं स्थानं विद्यते ?

२. प्राचीनकाले वार्ताप्रसारः सामान्यजनानां कथमासीत् ?

३. वार्तापत्रिकाणां प्रवर्तकाः के ?

४. संस्कृतभाषायां का दिनपत्रिका अस्ति ? सा कस्मात् प्रदेशात् प्रकाश्यते ?

५. वार्तापत्रिकासु कीदृश्यः वार्ताः प्रकाश्यन्ते ?

६. वार्तापत्रिकाः लोकवार्ताः कथं लभन्ते ?

७. वार्तापत्रिकाः कति विधाः ?

८. कुत्र नास्ति अतिशयोक्तिः ?

९. वार्तापत्रिकाणां प्रयोजनं कीदृशम् ?

१०. विद्यार्थिभिः वार्तापत्रिकाः किमर्थं पठनीयाः ?

❑

१६. पद्यशिक्षणम्

संस्कृतसाहित्यं सुविशालम्, अतिसमृद्धं च वर्त्तते। साहित्यमिदं द्विप्रकारकम्। वैदिकम्। लौकिकं चेति। संस्कृतसाहित्यस्य आदिकाव्यं महामुनिवाल्मीकिप्रणीतं रामायणम्। काममोहितं, निषादेन मारितं, क्रौञ्चपक्षिणं दृष्ट्वा वाल्मीकेः यः शोकः समागतः, स एव शोकः श्लोकतां गतः। यथा रामायणे—

मा निषाद प्रतिष्ठा त्वमगमः शाश्वतीः समाः
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।। [1]

ध्वन्यालोके आनन्दवर्धनेनापि उक्तं यत्—

काव्यस्यात्मा स एवार्थः तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।। इति।[2]

कविः

क्रम् धातोः औणदिके, इन् प्रत्यये कृते बाहुलकात् मकारस्य वराकादेशे, रेफस्य लोपे सति कविरिति शब्दः निष्पद्यते। अथवा- गत्यर्थकात् कवतेः इनि प्रत्यये कृते कवि- इति रूपं सिद्धयति। अत एव तैत्तरीयसंहितायाम्—**विश्वा रूपाणि प्रतिमुञ्चते कविः** इति कवेः वैशिष्ट्यं प्रत्यपादयत्।

निरुक्ते-मेधावी कविः क्रान्तदर्शनो भवति। कवतेर्वा इत्युक्तम्। कवयति-वर्णयति कविरिति व्युत्पत्या अपूर्व-चमत्कारि-वस्तु-वर्णने समर्थस्यैव कविरिति वाचकः न तु इतिवृत्तमात्रवर्णनपरस्य।

भट्टतौतेन काव्यकौतुके उक्तम्—

नानृषिः कविरित्युक्तमृषिश्च किल दर्शनात्।
विचित्रभावधर्मांशतत्त्वप्रख्या च दर्शनम्।।
स तत्त्वदर्शनादेव शास्त्रेषु पठितः कविः।
दर्शनाद्वर्णनाच्चाथ रूढा लोके कविश्रुतिः।।
प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता।
तदनुप्राणनाज्जीवेद् वर्णनानिपुणः कविः।।

विचित्रभावधर्मांशतत्त्वदर्शकः, वर्णनानिपुणः कविरिति लोके प्रसिद्धः। यतो हि कविः स्वप्रज्ञया काव्यस्य निर्माणं कर्तुं पारयति।

---

1. २-१४
2. १-५

मम्मटः—

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति॥

लोकोत्तरवर्णनानिपुणः कविः, यस्य कर्म काव्यं भवति। यतो हि कविः अपूर्वकाव्यसृष्टिं करोति, अतोऽयं प्रजापतिः।

अत एव अग्निपुराणे—

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्त्तते॥
न कवेर्वर्णनं मिथ्या कविः सृष्टिकरः परः॥

इति सुप्रतिपादितम्।

फलतः नवनवोदितप्रतिभया अनुप्राणितसजीववर्णने यः निपुणः स एव कविरिति सिद्धम्।

काव्यम्

मम्मटाचार्यः काव्यप्रकाशे—

तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि।[1]

अर्थात् दोषरहितौ, गुणसहितौ शब्दार्थौ काव्यम्।

विश्वनाथः— साहित्यदर्पणे - वाक्यं रसात्मकं काव्यम्।[2]
रसभूयिष्ठं वाक्यं काव्यमिति विश्वनाथकविराजस्य मतम्।

जगन्नाथः— रसगङ्गाधरे- रमणीयार्थप्रतिपादकः शब्दः काव्यम्।
यः शब्दः रमणीयार्थं प्रतिपादयति, स एव काव्यम्।

भोजराजः— निर्दोषं गुणवत्काव्यं अलङ्कारैरलङ्कृतम्।
रसान्वितं कविः कुर्वन् कीर्त्तिं प्रीतिं च विन्दति॥

भामहः— शब्दार्थौ सहितौ काव्यम्.

रुद्रटः— ननु शब्दार्थौ काव्यम्।

काव्यप्रयोजनानि

सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित्।
यावत्प्रयोजनं नोक्तं तावत् तत् केन गृह्यते॥

---

1. १-४-१
2. १-३

इति लोकप्रसिद्धिः। अत इदानीं प्रयोजनानि प्रतिपाद्यन्ते—

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥[1]

काव्यं कीर्त्तये, धनप्राप्तये, व्यवहारज्ञानाय, अमङ्गलनाशाय, सद्यः ब्रह्मानन्दप्राप्तये कान्तासदृशोपदेशाय च भवति।

भामहः— धर्मार्थकाममोक्षाणां वैचक्षण्यं कलासु च।
करोति कीर्त्तिं प्रीतिं च साधुकाव्यनिषेवनम् ॥

विश्वनाथेन साहित्यदर्पणे—चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते।

अल्पमतीनामपि अनायासेन चतुर्वर्गफलप्राप्तिः काव्यादेव भवतीति अभिप्रायः।

लाभः पूजा ख्यातिः धर्मः कामश्च मोक्षश्च।
इष्टानिष्टप्राप्तित्यागौ ज्ञानं फलानि काव्यस्य ॥

काव्यहेतवः

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥

काव्यपरिचयः

१. कुमारदासः — जानकीहरणम्–षोडशसर्गाः
जानकीहरणं कर्त्तुं रघुवंशे स्थिते सति।
कविः कुमारदासश्च रावणश्च यदि क्षमः ॥

२. भारविः— किरातार्जुनीयम् – अष्टादशसर्गाः
स्फुटता न पदैरपाकृता न च स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहतं क्वचित् ॥
नारिकेलफलसम्मितं वचो भारवेः।
भारवेरर्थगौरवम्।

३. माघः— शिशुपालवधमहाकाव्यम् – द्वाविंशतिसर्गाः
नवसर्गे गते माघे नवशब्दो न विद्यते।
मेघे माघे गतं वयः। माघे सन्ति त्रयोगुणाः।

४. रत्नाकरः— हरविजयमहाकाव्यम्– पञ्चविंशतिसर्गाः

---

1. काव्यप्रकाशे १–२

य: सज्जनो जगति यश्च खलैकवत्तिर्द्वावप्यलीकवचसावभिदध्महे।

तौ एको गुणानसत एव यत: परस्य वक्तीतर: किल सतोऽपि विनिह्नुते ताम्॥

५. **शिवस्वामी**—कप्फनाभ्युदयम् - विंशतिसर्गा:।

विदितबहुकथार्थश्चित्रकाव्योपदेष्टा

यमककविरगम्यश्चारुसन्दानमानी।

अनुकृतरघुकारोऽभ्यस्तमेण्ठप्रचारो

जयति कविरुदारो दण्डदण्डि: शिवाङ्क:॥

६. **क्षेमेन्द्रः**—दशावतारचरितम्

७. **मङ्खुकः**—श्री कण्ठचरितम्- पञ्चविंशतिसर्गा:

सूक्तौ शुचावेव परे कवीनां सद्य: प्रमादस्खलितं लभन्ते।

अधौतवस्त्रे चतुरं कथं वा विभाव्यते कज्जलबिन्दुपात:॥

८. **श्रीहर्ष**:-नैषधचरितम्-द्वाविंशतिसर्गा:

साहित्ये सुकुमारवस्तुनि दृढन्यायग्रहग्रन्थिले

तर्के वा मयि संविधातरि समं लीलायते भारती।

शय्या वाऽस्तु मृदूत्तरच्छदवती दर्भाङ्कुरैरास्तृता

भूमिर्वा हृदयङ्गमो यदि पतिस्तुल्या रतिर्योषिताम्॥

उदिते नैषधे काव्ये क्व माघ: क्व च भारवि:॥

हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा।

कृतं मध्यबिलं विलोक्यते धृतगम्भीरखनीखनीलिमा॥

ऐतिहासिककाव्यानि

९. **वाक्पतिराजः** - गउडवहो

१०. **पद्मगुप्तः**—नवसाहसाङ्कचरितम् - अष्टादशसर्गा:।

११. **बिल्हणः**—विक्रमाङ्कदेवचरितम् - अष्टादशसर्गा:।

साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्रा:।

यदस्य दैत्या इव लुण्ठनाय काव्यार्थचोरा: प्रगुणीभवन्ति॥

१२. **कल्हणः**—राजतरङ्गिणी - अष्टौ तरङ्गा:।

भुजवनतरुच्छायां येषां निषेव्य महौजसां

जलधिरशना भेदिन्यासीदसावकुतोभया।

स्मृतिमपि न ते यान्ति क्ष्मापा विना यदनुग्रहं
प्रकृतिमहते कुर्मस्तस्मै नमः कविकर्मणे ॥

१३. हेमचन्द्रः— कुमारपालचरितम् - अष्टाविंशतिसर्गाः।

आदौ विंशतिसर्गाः संस्कृतभाषायाम्, अवशिष्टा अष्टौ तु प्राकृतभाषायां च विद्यन्ते।

१४. सोमेश्वरः—कीर्तिकौमिदीकाव्यम्।

शास्त्रकाव्यानि

व्याकरणशास्त्रनियमानुसारं, पदप्रयोगज्ञानाय, अन्यान्यशास्त्रपरिज्ञानाय यानि काव्यानि विरचितानि, तानि शास्त्रकाव्यानि इत्युच्यन्ते। अर्थात् काव्यपाठमाध्यमेन शास्त्रपरिज्ञानम् एतेषां काव्यानां प्रयोजनम्। एतादृशकाव्येषु प्रसिद्धं भवति–भट्टिकाव्यम्।

१५. भट्टिः—भट्टिस्वामिना प्रणीतस्यास्य काव्यस्य तन्नाम्ना एव प्रसिद्धिः जाता। **"दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम्"** इति अस्य काव्यस्य प्रसिद्धिः। अस्यैव अपरं नाम रावणवधमहाकाव्यमिति वर्त्तते। अस्मिन् काव्ये द्वाविंशतिसर्गाः सन्ति। तत्र पुन- १६२१ संख्याकाः श्लोकाः सन्ति। तत्र स्वयं भट्टिस्वामी वदति यत्—

काव्यमिदं लिखितं मया वलभ्यां श्रीधरसेनवरेन्द्रपालितायाम्।
कीर्त्तिरतो भवतान्नृपस्य तस्य क्षेमकरः क्षितिपो यतः प्रजानाम्॥
न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्न जहार यन्मनः॥

एवमेव भट्टभीमस्य रावणार्जुनीयं, हलायुधस्य कविरहस्यं, वासुदेवस्य वासुदेवविजयकाव्यं च शास्त्रकाव्यकोटौ अत्यन्तप्रसिद्धानि।

देवकाव्यानि

प्रधानतया देवतानां कीर्त्तिं गातुं यानि काव्यानि रचितानि तानि देवकाव्यानि भवन्ति। यद्यपि माघकुमारसम्भवरघुवंशादिषु काव्येषु देवतानां गानं वर्त्तते, तथापि तानि कवित्वप्रदर्शनाय एव विरचितानि। तान्येव काव्यानि देवकाव्यानि यत्र देवतानां कीर्त्तनं प्रधानं विद्यते।

उत्प्रेक्षावल्लभगोकुलनाथस्य भिक्षाटनकाव्यम्—

शृङ्गारपद्धत्या शिवस्य वर्णनमत्र चित्रितम्। शिवः भिक्षार्थम् इन्द्राणीप्रभृतीनां देवाङ्गनानां समीपं गच्छति, तदा ताः शिवस्य सौन्दर्यं दृष्ट्वा विमोहिताः भवन्ति। इदमेवात्र काव्यवस्तु।

नीलकण्ठदीक्षितस्य शिवलीलार्णवः—

अस्मिन् काव्ये २२ सर्गाः सन्ति। मधुरास्थितस्य सुरेन्द्रनाथशिवस्य लीलानां वर्णनमत्र कृतम्। मूलवस्तु स्कन्दपुराणान्तर्गत-हलास्यमाहात्म्यात् संग्रहीतम्। काव्यमिदं सरसया, सरलया च भाषया ग्रथितम्, अतीव मनोहारि च विद्यते। मङ्गलाचरणं यथा—

पूतः स्वतः पूततरं ततो यद्गाङ्गं पयः शङ्करमौलिसङ्गात्।
तत्पातु मातुः प्रणयापराधपादाहतैः पूततमं ततो नः॥
अन्विष्यं खिन्नं निगमानशेषानमी नमीनं प्रथमं स्मरामः।
अन्विष्यमाणा निगमैरशेषैरम्ब स्तुमस्ते वयमक्षिमीनम्॥ इति।

अन्यानि प्रसिद्धानि देवकाव्यानि—

जयद्रथः - हरचरितचिन्तामणिः, लोलम्बराजः - हरिविलासकाव्यम्, वेदान्तदेशिकः - यादवाभ्युदयम्, राजचूडामणिदीक्षितः - रुक्मिणीकल्याणम्, कृष्णदासकविराजः-गोविन्दलीलामृतम्, अमरचन्द्रसूरिः - बालभारतम्, देवप्रभसूरिः-पाण्डवचरितम्, कृष्णानन्दः - सहृदयानन्दम्, वामनभट्टबाणः-नलाभ्युदयम्।

यमककाव्यानि

घटखर्परस्य यमककाव्यम्—

घटखर्परस्य वास्तविकं नाम किमिति न ज्ञायते। तेन हि—

आलम्ब्य चाम्बुतृषितः करकोशपेयं भावानुरक्तवनितासुरतैः शपेयम्।
जीयेय येन कविना यमकेन तेन तस्मै वहेयमुदकं घटखर्परेण॥

इति अस्य प्रसिद्धिः जाता। यमककाव्यमिदं केवलं २२ श्लोकैः ग्रथितम्। अत्र काचन विरहिणी वर्षस्य आरम्भसमये प्रियतमं सन्देशं प्रेषयति।

नीतिवर्मणाः कीचकवधकाव्यम्—

अत्र पञ्च सर्गाः, १७७ संख्याकाः श्लोकाश्च सन्ति।

वासुदेवस्य नलोदयकाव्यम्—

अत्र चत्वारः सर्गाः, २११ संख्याकाः श्लोकाश्च सन्ति। अस्य काव्यस्य यमकं नितान्तं हृद्यम्। मनोहारि च। यथा—

योजनि ना गोपीतश्चचार यो वल्लवाङ्गनागोपीतः।
भूर्येना गोपीतः कंसारेर्द्वेषमेव योनागोपीतः॥

श्लेषकाव्यानि

सन्ध्याकरनन्दी रामचरितम्, धनञ्जयः राघवपाण्डवीयम्, कविराजमाधवभट्टः-राघवपाण्डवीयम् हरदत्तसूरिः - राघवनैषधम्, विद्यामाधवः - पार्वतीरुक्मिणीयम्,

वेङ्कटाध्वरी-यादवराघवीयम्, चिदम्बरकविः - राघवपाण्डवयादवीयम्, दैवज्ञसूरिः - रामकृष्णविलोमकाव्यम् च प्रसिद्धानि।

कवयित्र्यः

विज्जिका—

नीलोत्पलदलश्यामा विज्जिकामामजानतः।
वृथैव दण्डिना प्रोक्ता सर्वशुक्ला सरस्वती॥

विज्जिकया मुक्तकानि रचितानि। न किमपि काव्यमनया नोपनिबद्धम्। मुक्तकानां माध्यमेन तस्याः प्रतिभाप्रकर्षः परिचीयते। कवेरभिप्रायशब्दगोचरं स्फुरन्तमाद्येषु पदेषु केवलम्।

वदद्भिरङ्गैः कृतरोमविक्रियैर्जनस्य तूष्णीं भवतोयमञ्जलिः॥

सुभद्रा—अस्याः विषये राजशेखरः वदति यत्—

पार्थस्य हृदये स्थानं लेभे खलु सुभद्रया।
कवीनां च वचोवृत्तिचातुर्येण सुभद्रया॥

सुभद्रायाः एकमेव पद्यं वल्लभदेवस्य सुभाषितवल्यां प्राप्यते।

फल्गुहस्तिनी—

सृजति तावदशेषगुणाकरं पुरुषरत्नमलङ्करणं भुवः।
तदपि तत्क्षणभङ्गि करोति चेदहह कष्टमपण्डितता कवेः॥

अनया विरचितानि पद्यानि प्रसिद्धैः कविभिः स्वीकृतत्वात् अस्याः अपि प्रसिद्धिः जाता। लखिमा, मोरिका, इन्दुलेखा, वैजयन्ती, मारुला, विकटनितम्बा, त्रिवेणी-क्षमाराव् प्रभृत्यः स्त्रीकवयः संस्कृतसाहित्ये प्रसिद्धाः।

खण्डकाव्यानि

खण्डकाव्यस्य अपरं नाम वर्त्तते-गीतकाव्यमिति। खण्डकाव्यमेतत् पञ्चप्रकारकं विद्यते। १. ऋग्वेदकालिकं खण्डकाव्यम्। २. भक्तिरसमयं खण्डकाव्यम्। ३. ऐतिहासिकं खण्डकाव्यम्। ४. रूपकान्तर्गतं खण्डकाव्यम्। ५. सङ्कीर्णं खण्डकाव्यम्।

मेघदूतम्—अत्र पूर्वभागः, उत्तरभागश्चेति द्वौ भागो स्तः। अस्मिन् काव्ये किमपि मादकं तत्त्वं विद्यते येन सर्वे वदन्ति यत् माघे गतं वयः इति। मेघदूते यद्वर्णनमस्ति तत् मनोगतानां विरहिजनभावानामपि अभिव्यञ्जकं भवति। यथा—

वेणीभूतप्रतनुसलिला सावतीतस्य सिन्धुः
पाण्डुच्छायातटरुहतरुभ्रंशिभिर्जीर्णपर्णैः।

सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती
काश्यं येन त्यजति विधिना स त्वयैवोपपाद्यः॥

ऋतुसंहारम्—लघुकायेऽस्मिन् काव्ये षट्सर्गाः, १५३ श्लोकाश्च सन्ति। एते श्लोकाः षड्ऋतुवर्णने निबद्धाः। प्रकृतेः सर्वकालिकाः अवस्थाः परिवर्त्तमानाः सन्ति, तासामत्र दृष्टिगोचरमानीताः। कविताशैली सरसा, सरला प्रतिभाति।

मन्दानिलाकुलितचारुतराग्रशाखः पुष्पोद्गमप्रचयकोमलपल्लवाग्रः।
मत्तद्विरेफपरिपीतमधुप्रसेकश्चित्तं विदारयति कस्य न कोविदारः॥

गीतगोविन्दम्—वङ्गदेशीयोऽयं जयदेवः लक्ष्मणसेनस्य राज्ञः सभायां आसीत्। गीतगोविन्दनामकं कृष्णस्तुतिपरकं द्वादशसर्गात्मकं काव्यम् अनेन विरचितम्। सरसमधुरकवितायाः पराकाष्ठा अत्र दृश्यते। अयमप्येकः विशेषोऽत्र विद्यते यद् भक्तिरसस्य, सरसभावस्य चैकत्र समावेशः परिलक्ष्यते। जयदेवेनैव स्वयमुक्तम् यत्—

यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम्।
मधुरकोमलकान्तिपदावलिं श्रुणु तदा जयदेवसरस्वतीम्॥ इति।

अत्रत्यानि गीतानि रागतालसुबद्धानि, नितान्तमधुराणि, परिष्कृतपदानि च विराजन्ते।

यथा—

चिन्तयामि तदाननं कुटिलभ्रूरोषभरेण।
शोणपद्ममिवोपरि भ्रमताकुलं भ्रमरेण॥
निन्दन्ति चन्दनमिन्दुकिरणमनुविन्दति खेदमधीरम्।
व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम्॥

अमरुकशतकम्—अस्य कवेः मुक्तकानि श्रृङ्गारसस्यन्दीनि प्रबन्धायमानानि प्रसिद्धानि सन्ति। यथा—

असद्वृत्तो नायं न च खलु गुणैरेव रहितः
प्रियो मुक्ताहरस्तव चरणमूले निपतितः।
गृहाणेमं मुग्धे व्रजतु निजकण्ठप्रणयिता-
मुपायो नास्त्यन्यस्तव हृदयसन्तापशमने॥

अपि च-

प्रस्थानं वलयैः कृतं प्रियसखीरस्त्रैरजस्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः।
यातुं निश्चितचेतसि प्रियतमे! सर्वे समं प्रस्थिता
गन्तव्ये सति जीवित! प्रियसुहृत्यर्थः किमु त्यज्यते।

आर्यासप्तशती—गाथासप्तशत्याः प्रभावेण गोविन्दाचार्यः मुक्तकस्वरूपं, श्रृङ्गाररससर्वस्वभूतं आर्यासप्तशतिनामकं ग्रन्थमकरोत्। मङ्गलाचरणश्लोके एव कवेः श्रृङ्गारमयकवित्वम् अनुभवितुं शक्नुमः—

मा वम संवृणु विषमिदमिति सातङ्कं पितामहेनोक्तः।

प्रातर्जयति सलज्जः कज्जलमलिनाधरः शम्भुः॥

भामिनीविलासम्—सरसकवितानिर्माणधुरीणः जगन्नाथः स्वकीयानि पद्यरत्नानि भामिनीविलासमिति नाम्ना सङ्गृहीतवान्।

दुर्वृत्ता जारजन्मानो हरिष्यन्तीति शङ्कया।

मदीयपद्यरत्नानां मञ्जूषैषा मया कृता॥

स्वयं दक्षः, विमर्शकः, प्रकाण्डपण्डितः, दार्शनिकतत्त्वनिधिरयं कविः स्वकाव्यं तथा निर्मितवान् यथा तत्र रेखापि त्रुटेः अन्विष्यापि द्रष्टुं न शक्यते। यथा—

मधुद्राक्षा साक्षादमृतमथ वामाधरसुधा

कदाचित् केषाञ्चित् न खलु विदधीरन्नपि मुदम्।

ध्रुवं ते जीवन्तोऽप्यहह मृतका मन्दमतयो

न येषामानन्दं जनयति जगन्नाथभणितिः॥

अन्ये ग्रन्थाः—गङ्गालहरी, सुधालहरी, अमृतलहरी, करुणालहरी, लक्ष्मीलहरी, यमुनार्णवचम्पूः, आसफविलासः, प्राणाभरणम्, जगदाभरणम्, चित्रमीमांसाखण्डनम्, मनोरमाकुचमर्दनम्, रसगङ्गाधरश्च।

इतरे मुक्तककाराः—भर्तृहरिः-शतकत्रयम्, भल्लटः-भल्लटशतकम्, मधुसूदनः -मधुसूदनशतकम्, हरिहरोपाध्यायः - हरिहरसुभाषितम्।

स्तोत्रकाव्यानि

यस्मिन् काव्ये काञ्चित् देवता मनसि निधाय स्तुतिः कृता तत् स्तोत्रकाव्यम्। वेदकालादारभ्य स्तोत्रसाहित्यं विराजते। पुराणेषु, इतिहासेषु स्तोत्राणि प्राप्यन्ते। महिम्नस्तोत्रादेव लौकिकस्तोत्राणां आरम्भो जात इति विमर्शकाणामभिप्रायः। पाण्डित्यपूर्णया, मनोहरया, भावप्रणतया च शैल्या महिम्नस्तोत्रम् अतीव प्रख्यातम्।

यथा— **हरिस्ते साहस्रं कमलबलिमादाय पदयो—**

र्यदेकोनेतमिन्निजमुदहरन्नेत्रकमलम्।

गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा

त्रयाणां रक्षायां त्रिपुरहर जागर्त्ति जगताम्॥

सूर्यशतकम्—अस्यैव मयूरशतकमित्यपि नाम वर्त्तते। आनन्दवर्धनेन ध्वन्यालोके मयूरस्य सूर्यशतकात् पद्यानि उद्धृतानि सन्ति। काव्यस्य प्रौढेः किमन्यत् प्रमाणमावश्यकम् ? तथापि—

दत्तानन्दाः प्रजानां समुचितसमयाकृष्टसृष्टैः पयोभिः
पूर्वाह्णे विप्रकीर्णे दिशि दिशि विरमत्यह्नि संहारभाजः।
दीप्तांशोर्दीर्घदुः खप्रभवभवभयोदन्वदुत्तारनावो
गावो वः पावनानां परममपरिमितां प्रीतिमुत्पादयन्तु॥

सौन्दर्यलहरी—यद्यपि शङ्कराचार्याणां सर्वाणि स्तोत्राणि उत्तमकोटिकानि, तथापि आद्यशङ्कराचार्यकृतायां सौन्दर्यलहरीनामकस्तुतौ यावन्तः काव्यगुणाः सन्ति, तावन्तः अन्यग्रन्थेषु दुर्लभाः।

तनोतु क्षेमं नस्तव वदनसौन्दर्यलहरी-
परीवाहस्रोतः सरणिरिव सीमन्तसरणिः।
वहन्ती सिन्दूरं प्रबलकबरीभारतिमिर-
त्विषां बृन्दैर्बन्दीकृतमिव नवीनार्ककिरणम्॥

मुकुन्दमाला—स्तोत्रेषु काव्यगुणापेक्षया आत्मनिवेदनरूपगुण एव अधिकतया अपेक्ष्यते। तद्गुणभूयिष्ठकाव्यं च बहु आद्रियते। तादृशकाव्यं कुलशेखरकविना विरचिता मुकुन्दमाला। यथा—

दिवि वा भुवि वा ममास्तु वासो नरके वा नरकान्तक प्रकामम्।
अवधीरितशारदारविन्दौ चरणौ ते मरणे (ऽपि) विचिन्तयामि॥

शिवस्तोत्रावली—शिवस्तोत्रावली एकविंशतिसंख्याकानां शिवस्तोत्राणां संङ्ग्रहः आसीत्। उत्पलदेवस्य कविता प्रसादगुणभूयिष्ठा, आत्मनिवेदनस्तुतिपरका च।

कण्ठकोणविनिष्टमीश ते कालकूटमपि गे महामृतम्।
अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते॥

स्तुतिकुसुमाञ्जलिः—जगद्धरस्य स्तुतिकुसुमाञ्जलौ ३७ स्तोत्राणि, १४२४ संख्याकाः श्लोकाश्च सन्ति। अस्य भक्तकवेः सरसपदनिर्माणसहचरी, सरसकाव्यकाव्यक्षमता च सर्वदा आदरमलभताम्॥

चारुचन्द्रकलयोपशोभितं भोगिभिः सह गृहीतसौहृदम्।
अभ्युपेतघनकालशात्रवं नीलकण्ठमतिकौतुकं स्तुमः॥

पद्यशिक्षणविधयः

१. भाषानुवादप्रणाली

पाठविषयस्य प्रत्येकशब्दस्य मातृभाषायाम् अनुवादः क्रियते। ततः सम्पूर्णस्य अनुवादस्य प्रस्तुतिः भवति। अस्यां प्रणाल्यां छात्राणां कृते इदमत्यावश्यकमस्ति यत्

शब्दानामनुवादं स्मरणे स्थापयित्वा, अनुवादस्य सहायेन श्लोकस्य अवबोधः क्रियते। पद्यानामनुवादानन्तरं अध्यापकः छात्रैरपि अनुवादं कारयति। अस्यां प्रणाल्यां एतावदेव कर्तुं शक्यते।

महत्त्वम्—

अस्याः संस्कृतभाषाशिक्षणे अधिकमहत्त्वं नास्ति। कुत इति चेत् अस्याः आधारेण पद्यशिक्षणस्य वास्तविकोद्देश्यस्य पूरणं न भवति। परं तु भगवद्गीतायाः प्रथमाध्यायस्य कृते पद्धतिरियं समीचीना। यतो हि तत्र शब्दापेक्षया भावस्यैव महत्त्वं विद्यते।

२. दण्डान्वयप्रणाली

संस्कृतं एका संश्लिष्टा भाषा। अस्यां भाषायां प्रकृतिप्रत्ययादयः मिलित्वैव तिष्ठन्ति। परं विश्लेषणात्मकभाषायां मूलशब्दाः संबन्धसूचकशब्दाश्च (Prepositions) पृथक्तया विद्यन्ते। यथा—आङ्ग्लभाषायाम्। तस्यां भाषायां शब्दानां स्थितिः अतीव महत्त्वपूर्णा। यदि एकं पदम् इतस्ततः कुर्मश्चेत् विपरीतार्थः, अन्यार्थो वा आगमिष्यति। संस्कृते श्लोकाः किञ्चिदधिकतया एव जटिलाः भवन्ति। कुत इति चेत् श्लोके कर्ता, कर्म, क्रिया, पुनः तेषां विशेषणानि क्रमशो न भवन्ति। अतः विभक्तिज्ञानेन विना तत्र अर्थावबोधः सुग्राह्यः न स्यात्। अध्यापकः श्लोकस्य आदर्शवाचनं, पदच्छेदं च कृत्वा पश्चात् पद्यं दण्डान्वयपद्धत्या पाठयति। तदर्थं प्रथमं वाक्ये मुख्यक्रियायाः, मुख्यभागस्य वा अन्वेषणं करोति। तस्मिन् मुख्यखण्डे कर्तृकर्मक्रियापदानां विशेषणपदानि भवेयुः। अन्यस्मिन् वाक्ये वा भवेयुः। वाक्यखण्डे शब्दक्रमः एवंविधः भवेत्-कर्त्तुः विशेषणानि-कर्ता, कर्मणः विशेषणानि-कर्म, अन्यकारकशब्दविशेषणानि-कारकशब्दाः, अव्ययपदानि।

आद्ये विशेषणं योज्यं विशेष्यं तदनन्तरम्।
क्त्वाणमुल्यप् प्रभृत्येवं पूर्वं दण्डान्वये भवेत्॥

दण्डान्वयपद्धतिद्वारा यदि पाठयितुं वाञ्छति, तदा शिक्षकः छात्रान् अधोलिखितक्रमेण प्रश्नान् प्रष्टुमर्हति। यथा—

(क) अस्मिन् श्लोके कर्ता कः ?

(ख) अत्र कर्मपदं किम् ?

(ग) पद्ये क्रियापदं किम् ?

उदा-

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः॥

एतां पद्धतिमाश्रित्य अस्य श्लोकस्य पाठनम् एवंप्रकारेण भवेत्।

(१)	अ–श्लोके कर्तृशब्दः कः ?	शि–मया।
(२)	अ–कर्मपदं किम् ?	शि–तर्कसंग्रहः।
(३)	अ–क्रिया का ?	शि–क्रियते।
(४)	अ–किमर्थं क्रियते ?	शि–सुखबोधाय।
(५)	अ–केषां क्रियते ?	शि–बालानाम्।
(६)	अ–कथं क्रियते ?	शि–निधाय
(७)	अ–कुत्र निधाय ?	शि–हृदि।
(९)	अ–पुनः कथं क्रियते ?	शि–विधाय।
(१०)	अ–किं विधाय ?	शि–गुरुवन्दनम्।

विधिप्रक्रमः —

अस्य विधेः अनुसारम् अध्यापकः पूर्वमेव श्लोके विद्यमानानां शब्दानां विचारविश्लेषणं कृत्वा, तान् शब्दान् संश्लेषणात्मकदिशा स्थापयति। छात्रा अपि पूर्वमेव सिद्धाः भवन्ति।

गुणाः —

- सुगमतया अर्थावबोधः भवति।
- समग्रविषयस्य ज्ञानं सम्पाद्यते।
- व्याकरणस्य उपयोगः विरलः भवति।
- छात्राणाम् भावावबोधनं सुलभतया भवति।
- उच्चस्तरे पद्धतिरियं समुचिता, अनुसरणयोग्या च वर्तते।

दोषाः —

- छात्राः कक्ष्यायां निष्क्रियाः भवन्ति।
- छात्रेषु पद्धतिरियं प्रभावोत्पादनी नास्ति।
- कल्पनाशक्तेः वर्धनाय अवकाशो न भवति।
- शिक्षणे छात्रा जामिता भवेयुः।
- विशिष्य प्राथमिकमाध्यमिकस्तरयोः इयम् उपकारिणी नास्ति॥

दण्डान्वयप्रणाली, प्रारम्भे बालकानां कृते पाठनाय स्वल्पतया उपकरोति। किन्तु इयं नीरसपद्धतिः। यतः सर्वदा प्रश्नकरणमेव भवति। सर्वेषां प्रश्नानां कृते

व्याकरणज्ञानमावश्यकमस्ति। तर्हि एतादृशप्रश्नाः रसानुभूतिप्राप्तये बाधकाः, निरोधका वा भवन्ति। तेन छात्राः निष्क्रियाः तिष्ठन्ति। विधिरयं मनोवैज्ञानिकदृष्ट्या दोषपूर्णः। माध्यमिक-उच्चमाध्यमिकविद्यालयीयच्छात्राणां कृते पद्धतिरियं समुचिता न भवति।

खण्डान्वयपद्धतिः

अस्यैव अपरं नाम वर्तते प्रश्नोत्तरपद्धतिः इति। विद्यालयस्तरे दण्डान्वयपद्धतेरपेक्षया इयं समीचीना भवति, अनेन विधिना रुचिपूर्णं, प्रेरणदायकं शिक्षणं कर्त्तुं प्रभवामः। मनोवैज्ञानिकशास्त्रदृष्ट्या च पद्धतिरियं विद्यालयच्छात्राणां कृते समुचिता। **अन्वयप्रबोधे** खण्डान्वयस्य लक्षणमेवं प्रत्यपादयत्।

कर्तृकर्मक्रियास्तावच्छ्लोके योज्यास्ततः परम्।
किमो रूपं पुरस्कृत्य तृतीयादिनियोजयेत्॥
ल्यबन्तं च तुमन्तं च क्त्वान्तं कर्मविभूषितम्।
खण्डान्वये पुनः प्रश्नपूर्वमन्ते नियोजयेत्॥

गुणाः —

इयं मनोवैज्ञानिकसिद्धान्तानाम् अनुकूलतया विद्यते। प्रश्नोत्तरमाध्यमेन आरभ्य इयं सर्वदा छात्रान् सक्रियान्वितान् करोति। वाक्यं विविधशब्दशः विश्लेषणं क्रियते। तेन छात्राः सुगमतया वाक्यस्य तत्त्वं जानीयुः। अपि च शब्दानां पारस्परिकसम्बन्धमपि ज्ञातुं पारयन्ति। एवंप्रकारेण श्लोकावबोधने समर्था भवन्ति। प्रणालीयं मीमांसाशास्त्रस्य प्रसिद्धं भाषीयसिद्धान्तम् अनुकरोति। वाक्यावबोधने आकाङ्क्षा-योग्यता-सन्निधीनां नितरामावश्यकता वर्तते। अत्र छात्राणां स्तरानुकूलं प्रश्नानां वर्गीकरणं क्रियते। प्राथमिकावस्थायां कथमित्यादि प्रश्नाः मातृभाषायामपि प्रष्टुं पारयामः। अस्य विधेः आधारेण अध्यापकस्य छात्राणां च कथोपकथनाय, वार्त्तालापाय च अवसरः मिलति।

व्याख्याप्रणाली

पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना।
आक्षेपोऽथ समाधानं व्याख्यानं पञ्चधा स्मृतम्॥

अध्यापकः प्रथमं श्लोके विद्यमानानां पदानि विभजति। अनन्तरं प्रत्येकस्य पदस्य अर्थं वदति। श्लोके समस्तपदानि सन्ति चेत् तेषां विग्रहवाक्यानि वदति। पुनः वाक्यसंयोजनां करोति। पूर्वपक्षं प्रतिपाद्य समाधानं ददाति। अथवा—

विषयो संशयश्चैव पूर्वपक्षस्तथोत्तरः।
सङ्गतिश्चैव पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्॥

विषयावबोधनाय विषयः, संशयः, पूर्वपक्षः, उत्तरपक्षः, समन्वयः इति पञ्चविषयाः आवश्यकाः। अतः व्याख्यानं नाम कस्यापि विषयस्य, शब्दस्य वा

अर्थस्पष्टीकरणाय, तत्सम्बद्धभावानां सरलरूपेण अवगमनाय च एकः उत्तमः उपायः। **गार्लिक्** महोदयस्यानुसारं व्याख्या नाम सा, यया शब्देषु, तदर्थेषु च विद्यमानं काठिन्यं दूरीभवति। उदा—

सम्पूर्णकुम्भो न करोति शब्दम् अर्धो घटो घोषमुपैति नूनम्।
विद्वान् कुलीनो न करोति गर्वम् अल्पो जनो जल्पति साट्टहासम्।

पदच्छेदः—

सम्पूर्णकुम्भः, न, करोति, शब्दं, अर्धः, घटः, घोषम्, उपैति, नूनम्, विद्वान्, कुलीनः, न करोति, गर्वं, अल्पः, जनः जल्पति, साट्टहासम्।

पदार्थोक्तिः —

सम्पूर्णकुम्भः - पूर्णः घटः, शब्दं - ध्वनिं, न करोति, अर्धः अर्धभागे एवं जलं यत्र अस्ति सः, घटः - कुम्भः, नूनम् - अवश्यं, घोषं - शब्दं, उपैति - प्राप्नोति, कुलीनः - सद्वंशभवः, विद्वान् - पण्डितः, गर्वं - अङ्कारं न करोति, अल्पः - स्वल्पः, जनः - पुरुषः, साट्टहासं - आडम्बरेण सह, जल्पति - निरर्थकं वदति।

विग्रहवाक्यानि—

सम्पूर्णश्चासौ कुम्भश्च - सम्पूर्णकुम्भः - विशेषणपूर्वपदकर्मधारयसमासः। अट्टहासेन सह - साट्टहासम् - तृतीयातत्पुरुषसमासः।

टीकाविधिः

टीकृ गतौ इत्यस्माद्धातोः (भ्वा-आ-सेट्), गुरोश्च हलः[1] इत्यप्रत्यये कृते टीका इति शब्दः निष्पद्यते। टीक्यते अर्थः अनया इति टीका-विषमपदव्याख्या। अथवा गति-गमयत्यर्थान् इति टीका। हेमचन्द्राचार्यः अभिलाषितार्थन्चिन्तामणौ टीका निरन्तरव्याख्या इति व्याचचक्षे।

अमरकोशे—

सुगमानां (सुषमाणां विषमाणां च निरन्तरं व्याख्या यस्यां सा टीका इति व्याख्यां प्राददत्।[2] तर्हि व्याख्यायाः विशिष्टरूपमेव टीका इति वक्तुं पारयामः। प्रसिद्धः टीकाकारः **मल्लिनाथः** एवमभिप्रैति यत्—

इन्हान्वयमुखेनैव सर्वं व्याख्यायते मया। ।
नामूलं लिख्यते किञ्चित् नानपेक्षितमुच्यते॥
यन्निगूढमखिलं शक्त्या सर्वं प्रकाशते।
नामूलं लिख्यते किञ्चित् नानपेक्षितमुच्यते॥

अमरुशतकटीकाकृता वेमभूपालेन उक्तं यत्—

मूलश्लोकान् समाहृत्य प्रक्षिप्तान् परिहृत्य च।

विधत्ते विदुषामिष्टां टीकां ....

---

1. ३-३-२०३
2. ३-५-७

टीकालक्षणानि—

१. मूलादधिकं न लेखनीयम्। न वा वक्तव्यम्।

२. मूले यन्नास्ति, तन्न कथनीयम्।

३. अन्वयविधिद्वारा सर्वेषां शब्दानां व्याख्या करणीया।

४. मूले यानि रहस्यानि सन्ति, तानि स्वशक्त्या प्रकाशनीयानि।

५. मूलश्लोका एव व्याख्यातव्याः।

६. प्रक्षिप्तश्लोकाः परिहार्याः।

मल्लिनाथः वदति—

भारती कालिदासस्य दुर्व्याख्या विषमूर्च्छिता।
एषा सञ्जीवनी टीका तामद्योज्जीवयिष्यति॥

विधिक्रमः—

अध्यापकः श्लोकशिक्षणं यदा करोति तदाऽयं विधिः अनुसरणीयः। प्रथमं श्लोकं गति-यति-लयपुरस्सरं पठित्वा, श्लोकस्य अन्वयः करणीयः। ततः श्लोके स्थितानां सर्वेषां शब्दानाम् अर्थावबोधः करणीयः। पुनः श्लोके विद्यमानानि सन्धियुक्तपदानि स्वीकृत्य व्याकरणज्ञानं दातव्यम्। शब्दरूपाणां, धातुरूपाणां ज्ञानं सम्पादनीयम्। समासपदानां विग्रहवाक्यानि, समासनाम च पाठनीयम्। यदि श्लोके अलङ्कारः अस्ति चेत् तस्य लक्षणस्य परिचयं विधाय लक्षणसमन्वयमपि कार्यम्। पर्यायपदज्ञापनं, व्यतिरेकार्थकशब्दज्ञानं च देयम्। श्लोकछन्दसः परिचयोऽपि कार्यः।

प्रयोजनानि—

- सुगूढग्रन्थाशयबोधनं भवति।
- छात्राणाम् उपकाराय, सुखबोधाय च कल्पते।
- विदुषां तुष्टिं जनयति।
- कवेः हृदयं ज्ञापयति।
- शास्त्रीयं ज्ञानं वर्धयति।
- सम्यक् शास्त्रज्ञानं भवति।
- भाषायाम् अधिकारः आगच्छति।
- शब्दभण्डारः वर्धते। भाषणसामर्थ्यं जायते।
- छन्दसामनुसारं श्लोकपठनस्य अभ्यासो भवति।
- संस्कृते दृढं, विस्तृतं च ज्ञानं सिद्ध्यति।

टीकादेषाः—

दुर्बोधं यदतीव तद्विजहति स्पष्टार्थमित्युक्तिभिः
स्पष्टार्थेष्वतिविस्तृतं विदधति व्यर्थैः समासादिकैः।
अस्थानेऽनुपयोगिभिश्च बहुभिर्जल्पैः भ्रमं तन्वते।
श्रोतृणामितिवस्तुविप्लवकृतः सर्वेऽपि टीकाकृतः॥

(काव्यप्रकाशस्य टीकालेखनावसरे–भोजराजः)

१. यत्र अवबोधने बहुकाठिन्यं, दुर्बोधं वा वर्त्तते, अतिविस्तृतं व्याख्यानं च अपेक्षते, तत्र स्पष्टमित्युक्त्वा त्यजन्ति।

२. यत्र अर्थं स्पष्टतया प्रतिभाति, तत्र निरपेक्षितैः सन्धि–समासादिकैः अतिविस्तृतां व्याख्या कुर्वन्ति।

३. अनावश्यकस्थाने निरर्थकैः समासादिभिः भ्रमं कल्पयन्ति।

४. वस्तुनः यथार्थं तत्वमपि विपरीतार्थकशब्दैः प्रतिपाद्य श्रोतृणां पद्धितीयं सन्देहं जनयति।

५. यत्र संस्कृतं पाठ्यते सः स्तरः विद्यालयीयस्तरः। तत्र केवलं भाषायाः परिचयात्मकं ज्ञानं दीयते।

६. छात्राः बहुजामिताः भवन्ति।

उदा–

सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः॥[1]

टीका—

पतिं वरा सा इन्दुमती रात्रौ संचारिणौ दीपशिखेव यं यं भूमिपालं व्यतीयाय अतीत्य गता स स भूमिपालः। स सर्वं इत्यर्थः। नित्यवीप्सयोः इति वीप्सायां द्विर्वचनम्। नरेन्द्रमार्गे राजपंथे अट्टाख्यः गृहभेद इति। स्यादट्टः क्षौममस्त्रियम् इत्यमरः। विवर्णभावं विच्छायत्त्वम्। अट्टस्तु तमोवृतत्वम्। प्रपेदे।

टीकाविधेः समीक्षणम्—

प्राचीनकाले साहित्यपाठार्थं वा, शास्त्रशिक्षणाय वा टीकापद्धतिं समाश्रितवन्तः। टीकापद्धत्या काव्यानां तथा साहित्यस्य संरक्षणं सम्यक् जातम्। अस्याः पद्धतेः प्रयोगः प्रचुरेण तत्कालीनविद्वद्भिः कृतो वर्त्तते। अनेन विधिना शिक्षणं सरलं तथा सुन्दरं च भवति। संस्कृतमाध्यमेन संस्कृतशिक्षणायायं विधिः समीचिनः। परम्परागतधारायाः उच्चस्तरे अयं विधिः अत्यन्तोपयोगी।

---

1. र. वं. ६–६७

परम् अद्यतनशिक्षणप्रणाल्यां अस्याः पद्धतेः उपयोगिता अतिविरला वर्त्तते। प्राथमिकदशायां छात्राः सरलसंस्कृतमेव पठन्ति। तत्र संस्कृतभाषायाः परिचयः भवति। एतादृशानां छात्राणां कृते काव्यपाठनं, तदपि टीकापद्धतिद्वारा महते क्लेशाय कल्पते।

अपि चाधुनिकशिक्षणं छात्रकेन्द्रितं वर्त्तते। यदि टीकापद्धतिमाश्रित्य पद्यशिक्षणं क्रियते चेत् अध्यापकः सक्रियः भवति। न तु छात्राः। अतः माध्यमिकस्तरे अयं विधिः न स्वीकरणीयः।

तुलनाप्रणाली

वस्तुतः प्रणालीयं नवीना नास्ति। पूर्वोक्तानामेव विधीनां रूपान्तरं भवति। तुलना एवं प्रकरणेन कर्त्तुं प्रभवामः।

(अ) एकस्यैव कवेः विभिन्नश्लोकानां तुलना

(आ) विभिन्नकवीनां शैलीविषये

(इ) भावसाम्यविषये

(ई) विविधघटनानां साम्यविषये

(उ) भावभिन्नताविषये।

(ऊ) मातृभाषासंस्कृतभाषयोः।

अध्यापकः पद्यशिक्षणसन्दर्भे कस्यापि एकस्य पद्यस्य व्याख्यावसरे सम्बद्धनाम् अन्यान्यपद्यानां चयनं करोति। विधिरियम् उच्चकक्ष्यासु अनुसरणीयः॥

यथा— कालिदासः—

तां प्रत्यभिख्यातमनोरथानां महीपतीनां प्रणयाग्रदूत्यः।
प्रवालशोभा इव पादपानां शृङ्गारचेष्टा विविधा बभूवुः॥
सञ्चरिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः॥

बिल्हणः — विक्रमाङ्कदेवचरिते—

तदीयवक्त्रेन्दुविलोकनेन सान्द्रोल्लसद्रागयोनिधीनाम्।
तत्रागतानां पृथिवीपतीनामासन् विचित्राणि विचेष्टितानि॥
मध्येन येषा वसुधापतीनां जगाम सा कामवशीकृतानाम्।
स्वयंवरस्त्रग्रजसेव पूर्णास्तेषां दृशः साश्रुजला बभूवुः॥

समीक्षाप्रणाली

कविना शैली-अलङ्कार-छन्द-तर्क-कल्पना-विचार-भाव-तन्वादीनां माध्यमेन प्रतिपादितस्य जीवनदर्शनस्य वा गभीराध्ययनस्य अवसरः यत्र भवति तत्रेयं प्रणाली अनुसर्त्तव्या। प्रायः अयं विधिः उच्चस्तरे एव उपयोज्यः।

व्यासप्रणाली

साहित्यक-पौराणिक-ऐतिहासिक-वैज्ञानिक-अंशानां पाठनप्रसङ्गे अस्याः महान् उपयोगः। अपि च भगवत्पादस्य श्रीशङ्कराचार्यस्य उपनिषद्भाष्यस्य, भगवद्गीतायाः, ब्रह्मसूत्राणां च टीकापाठनसमये इयं पद्धतिः स्वीकार्या। तथा व्याख्याने, शास्त्रार्थे, धार्मिकप्रसङ्गे, उपदेशे चेयं समुचिता परन्तु कक्ष्याशिक्षणे समयाभावात् स्तरस्य अननुकूलत्त्वाच्च पद्धतिरियं नानुसर्त्तव्या।

गीत-नाट्यप्रणाली

प्रणालीयं प्राथमिकस्तरे अर्थात् सप्तमीकक्ष्यापर्यन्तं समीचीना वर्त्तते। यतो हि तस्मिन् स्तरे बालगीतानि पाठ्यविषयरूपेण भवन्ति। तेषाम् अर्थावबोधनेऽपि अधिकमहत्त्वं न भवति। गीतानामुद्देश्यं भवति यत् बालकानां लयतालादीनां परिचयप्रदानमेव। अत्र गानस्य, कदाचित् सङ्गीतस्य प्राधान्यं भवति। गाने बालकानां महती रुचिः वर्त्तते। एतेषु गीतस्य श्रवणे, स्वयं गाने च अभिरुचिः सहजतया एव तिष्ठति। गीतेषु विद्यमाना भाषा सरला, सुगम्या च भवेत्। तदा तेषां गीतानां रटने समर्थाः भवन्ति। व्यक्तिशः, सामूहिकरूपेण च छात्रैः अभ्यासः कारणीयः। गीतगानसमये करतालध्वनिनिवाणाय च छात्राः प्रेरिता भवेयुः। परन्तु संस्कृतभाषायां बालगीतानि तथा अभिनयगीतानि च विरलतयैव उपलभ्यन्ते। अतः गीतानां संग्रहणे, लेखने, गाने च संस्कृताध्यापकेन अपेक्षितः प्रयासः प्रयत्नः च विधेयः। उदाहरणाय गीतमेकं प्रस्तूयते।

हस्तपरिवारः

एषः स्नेहालुः तातः।
निकटे निवसति ननु माता।
ज्येष्ठा भगिनी दीर्घतमा।
मध्ये तिष्ठति अनामिका
कनिष्ठिका सा अन्ते च॥
हस्तकुटुम्बं मम पश्य।
हस्तद्वयेन प्रणमामि।
आशीर्वाद विन्दामि॥ (शिशुगीतानि, संस्कृतभारती नवदेहलीतः स्वीकृतमिदम्)

उपर्युक्तप्रणालीनां परिशीलनेन इदं स्पष्टतया वक्तुं शक्नुमः यत् माध्यमिकविद्यालयेषु संस्कृतपद्यशिक्षणाय खण्डान्वयपद्धतिः अत्युत्तमा, अनुसर्त्तव्या च। तुलनासमीक्षाप्रणाल्यौ उच्चस्तरे सहायकप्रणालीरूपेण उपकुरुतः। दण्डान्वयपद्धतिः विरलतया एव स्वीकरणीया। प्रायः सर्वेषु स्तरेषु अनुवादपद्धतेः त्यागः कार्यः।

संस्कृतपद्यशिक्षणे अभिरुच्युत्पादनाय उपायाः—

- सरलसरलश्लोकानां सुभाषितपद्यानां कण्ठस्थीकरणम्।
- प्रहेलिकानादीनाम् उपयोगः।
- अक्षरक्रीडा–पदक्रीडामाध्यमेन शिक्षणम्।
- अन्त्याक्षरीक्रीडाद्वारा पद्यप्रस्तुतीकरणस्य अभ्यासः।
- प्रसिद्धकवीनां जयन्त्युत्सवपालनम्। गीतायाः सामूहिकपठनाभ्यासः।
- व्यस्ताक्षरीक्रीडायाः अभ्यासः।
- विभिन्नसंस्कृतकवीनां काव्यग्रन्थसङ्ग्रहः।

पद्यशिक्षणाय पाठयोजनानिर्माणा उपयुक्ताः कक्षानुसारं केचन श्लोकाः—

षष्ठी कक्ष्या

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात्तदेव वक्तव्यं वचने का दारिद्रता॥

लालयेत् पञ्चवर्षाणि दशवर्षाणि ताडयेत्।
प्राप्तेतु षोडशे वर्षे पुत्रं मित्रवदाचरेत्॥

आचारः कुलमाख्याति देशमाख्याति भाषणम्।
सम्भ्रमः स्नेहमाख्याति वपुराख्याति भोजनम्॥

कस्य दोषः कुले नास्ति व्याधिना के न पीडिताः।
व्यसनं केन न प्राप्तं कस्य सौख्यं निरन्तरम्॥

उद्योगे नास्ति दारिद्र्यं जपतो नास्ति पातकम्।
मौनेन कलहो नास्ति नास्ति जागरतो भयम्॥

एकोऽपि गुणवान् पुत्रः निर्गुणैश्च शतैर्वरः।
एकश्चन्द्रस्तमो हन्ति न च ताराः सहस्रशः॥

राजपत्नी गुरोः पत्नी मित्रपत्नी तथैव च।
पत्नीमाता स्वमाता च पञ्चैता मातरः स्मृताः॥

अन्नदाता भयत्राता विद्यादाता तथैव च।
जनिता चोपनेताच पञ्चैते पितरः स्मृताः॥

पादाभ्यां न स्पृशेदग्निं गुरुं ब्राह्मणमेव च।
नैव गां न कुमारीं च न वृद्धं न शिशुं तथा॥
त्यज दुर्जनसंसर्गं भज साधु समागमम्।
कुरु पुण्यमहोरात्रं स्मर नित्यमनित्यताम्॥
उत्तमे क्षणकोपः स्यान्मध्यमे घटिकाद्वयम्।
अधमे स्यादहोरात्रं पापिष्ठे मरणान्तकः॥
वृश्चिकस्य विषं पुच्छं मक्षिकस्य विषं शिरः।
तक्षकस्य विषं दंष्ट्रा सर्वाङ्गं दुर्जने विषम्॥
स्वगृहे पूज्यते मूर्खः स्वग्रामे पूज्यते प्रभुः।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते॥
श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।
परोपकारः पुण्याय पापाय परपीडनम्॥

सप्तमी कक्ष्या

लक्ष्मीवन्तो न जानन्ति प्रायेण परवेदनाम्।
भूभारवहनश्रान्ते शेते शेषे हि माधवः॥
मातृवत्परभार्याश्च परद्रव्याणि लोष्टवत्।
आत्मवत्सर्वभूतानि यः पश्यति स पण्डितः॥
अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम्॥
सूखार्थी चेत् त्यजेद्विद्यां विद्यार्थी चेत् त्यजेत् सुखम्।
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्॥
मित्रद्रोही कृतघ्नश्च यश्च विश्वासघातुकः।
अलर्का इव हातव्याः त्रयस्ते सज्जनैस्सदा॥
श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन।
विभाति कायः करुणापराणां परोपकारेण न चन्दनेन॥
कुग्रामवासः कुलहीनसेवा कुभोज्रनं क्रोधमुखी च भार्या।
मूर्खश्च पुत्रः विधवा च पुत्री विनाग्निना षट् प्रदहन्ति देहम्॥
पिपीलिकानिर्मितवामलूरुः सर्पस्य गेहं भवति क्रमेण।
तथैव लुब्धैश्चिरकालगुप्तं स्वर्णं च गच्छत्यवनीशकोशम्॥

एकः स्वादु न भुञ्जीत एकश्चार्थान् न चिन्तयेत्।
एको न गच्छेदध्वानं नैकस्सुप्तेषु जागृयात्॥
अर्थनाशं मनस्तापं गृहे दुश्चरितानि च।
वञ्चनं चापमानञ्च मतिमान् न प्रकाशयेत्॥

अष्टमी कक्ष्या

सर्वत्र सम्पदस्तस्य सन्तुष्टंयस्य मानसम्।
उपानद्गूढपादस्यननु चर्मावृतैवभूः॥
सत्यानुसारिणी लक्ष्मीः कीर्तिः त्यागानुसारिणी
अभ्यासानुसरी विद्याः बुद्धिः कर्मानुसारिणी॥
नक्रः स्वस्थानवर्ती चेत् गजेन्द्रमपि कर्षति।
स एव चेत् च्युतः स्थानात् शुनापि परिभूयते॥
दानेन भोगी भवति मेधावी वृद्धसेवया।
अहिंसया च दीर्घायुः इति प्राहुर्मनीषिणः॥
अहो किमपि चित्राणि चरित्राणि महात्मनाम्।
लक्ष्मीं तृणाय मन्यन्ते तद्भरेण नमन्त्यपि॥
मूकः परापवादे परदारनिरीक्षणेऽप्यन्धः।
पङ्गुः परधनहरणे स जयति लोकत्रयेपुरुषः॥
चातकस्त्रिचतुरान् पयः कणान् याचते जलधरं पिपासया।
सोऽपि पूरयति विश्वमम्भसा हन्त हन्त महतामुदारता॥

नवमी कक्ष्या

उद्यमेन हि सिद्ध्यति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥
उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः दैवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः॥
अद्यापि नोज्झति हरः किल कालकूटं कूर्मो बिभर्त्ति धरणीं खलु पृष्ठभागे।
अम्भोनिधिर्वहति दुस्सहबाडबाग्निम् अङ्गीकृतं सुकृतिनः परिपालयन्ति॥
पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति।

आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः॥
छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव॥
दशकूपसमावापी दशवापीसमो ह्रदः।
दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः॥

दशमी कक्ष्या

यथा चित्तं तथा वाचो यथा वाचस्तथा क्रियाः।
चित्ते वाचि क्रियायां च महतामेकरूपता॥
वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति॥
महात्मनोऽनुगृह्णन्ति भजमानान् रिपूनपि।
सपत्नीः प्रापयन्त्यब्धिं सिन्धवो नगनिम्नगाः॥
पद्माकरं दिनकरो विकचं करोति
चन्द्रो विकासयति कैरवचक्रवालम्।
नाभ्यर्थितो जलधरोऽपि जलं ददाति
सन्त स्वयं परहिते विहताभियोगाः॥
गुणवज्जनसंपर्कात् याति स्वल्पोऽपि गौरवम्।
पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते॥
किं कुलेन विशालेन शीलमेवात्र कारणम्।
कृमयः किं न जायन्ते कुसुमेषु सुगन्धिषु॥
सर्वत्र गुणवानेव चकास्ति प्रथितो नरः।
मणिर्मूर्ध्नि गले बाहौ पादपीठेऽपि शोभते॥
गुणेषु क्रियतां यत्नः किमाटोपैः भयङ्करैः।
विक्रीयन्ते न घण्टाभिः गावः क्षीरविवर्जिताः॥

❑

१७. व्याकरणशिक्षणम्

वेदाङ्गेषु प्रधानं व्याकरणं, न केवलं वेदमन्त्रेषु विद्यमानानां अर्थावबोधनं करोति परं तु तेषां रक्षणमपि करोति। व्याक्रियन्ते-व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणम्। अर्थात् शब्दानां व्युत्पत्तिमधिकृत्य वदतीति। अत एवोक्तं-प्रकृतिप्रत्ययविभागपूर्वकशब्दव्युत्पत्याधायकं शास्त्रं व्याकरणमिति। अपि च पदस्वरूपं ज्ञापयित्वा अर्थनिर्णयं च करोति।

मुखं व्याकरणं स्मृतम् —

वेदपुरुषस्य व्याकरणं मुखं भवति। किमिति चेत् मुखं विना भोजनव्यापारः नास्ति। भोजनं विना शरीरं नास्ति। शरीरं विना प्राणरक्षणं न भवति।

ऋग्वेदे व्याकरणशास्त्रस्य प्रशंसा एवमस्ति—

चत्वारि शृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्ता सो अस्य।
त्रिधा बद्धो वृषभो रोरवीति
महादेवो मर्त्यां आविवेश॥ [1]

व्याकरणस्य चत्वारः शृङ्गाः भवन्ति। ते-नामाख्यातविसर्गनिपाताः। त्रयः पादाः-वर्तमानभूतभविष्यत्कालाः। द्वे शीर्षे-सुप्, तिङ्। सप्त हस्ताः-प्रथमादिसप्त विभक्तयः। त्रिधा बद्धः-व्याकरणरूपवृषभः उरः, कण्ठः, शिरः इति स्थानेषु बद्ध इति। वररुचिमहर्षिः व्याकरणस्य प्रयोजनानि पञ्च प्रतिपादितवान्। पतञ्जलिः तानि त्रयोदश यावत् प्रत्यपादयत्। तेषु रक्षा, ऊहः, आगमः, लघुः, असन्देहः अपभाषणम्, दुष्टशब्दः, अर्थज्ञानम्, धर्मलाभः, नामकरणमिति।

निर्वचनानि

१. व्याक्रियन्ते-पृथक्क्रियन्ते साधुशब्दाः, असाधुशब्देभ्यः प्रकृतिप्रत्ययादिज्ञान महिम्नाऽनेनेति व्याकरणम्।
२. व्याक्रियन्ते-परिज्ञायन्ते शब्दाः अनेनेति व्याकरणम्।
३. व्याक्रियन्ते-व्युत्पाद्यन्ते शब्दाः येनेति व्याकरणम्।
४. प्रकृतिप्रत्ययविभागपूर्वकशब्दव्युत्पत्याधायकं शास्त्रं व्याकरणम्।
५. आङ्ग्लभाषायां Grammar इति पदं grammatike techne इति ग्रीक्भाषापदात् निष्पन्नम्। अस्यार्थः भवति-the art of letters.

---

1. ४-५ ८-६

६. व्याकरणं नाम इयमुत्तरा विद्या[1]

७. व्युत्पत्तिर्यत्र शब्दानां विश्लेषणविवेचने।
व्याकरणं तत्र विज्ञेयं वेदाङ्गञ्च मुखं महत्॥

८. विविक्ता: साधव: शब्दा: प्रकृत्यादिविभागत:।
ज्ञाप्यन्ते येन तच्छास्त्रमत्र शब्दानुशासनम्॥

९. व्याकरणं नाम-अर्थविशेषमाश्रित्यि स्वरप्रकृतिप्रत्ययादीन् संस्कारविशेषेण वैदिकान् लौकिककांश्च शब्दान् करोतीति, तथाभूत: पाणिन्यादिमहर्षिप्रणीतो ग्रन्थसमूह:।

१०. आसन्नं ब्रह्मणस्तस्य तपसामत्तमं तप:।
प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधा:॥

११. व्याकरणं नाम शब्दसाधुत्वव्यवस्थापकं शास्त्रम्।

१२. आप: पवित्रं परमं पृथिव्यामपां पवित्रं परमं च मन्त्रा:। तेषां च सामर्थ्यजुषां पवित्रं महर्षयो व्याकरणं निराहु:॥

१३. साधुत्वज्ञानविषया सैषा स्मृतिनिबन्धनम्॥[2]

१४. लक्ष्यलक्षणे व्याकरणम्। लक्ष्यं च लक्षणं चैतत् समुदितं व्याकरणं भवति। किं पुनर्लक्ष्यं लक्षणं च। शब्दो लक्ष्यो सूत्रं लक्षणम्।

१५. To the teacher, Grammar methods of instructions, to the pupil, it brings insight into structural details.

१६. Grammar is a set of rules and regulations which controls and teaches us the correct use of the language.

१७. इदमन्धतम: कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥

१८. प्रधानं षट्स्वङ्गेषु व्याकरणम्।[3]

१९. प्रथमे हि विद्वांस: वैयाकरणा:। यतो हि व्याकरणमूलत्वात् सर्वशास्त्राणाम्।

२०. अव्याकरणमधीतं भिन्नद्रोण्यातरङ्गिणीतरणम्।
भेषजमपथ्यहितं त्रयमिदमकृतं वरं न कृतम्।

२१. यो वेद वेदवदनं सदनं हि सम्यक्
ब्राह्म्या: स वेदमपि वेद किमन्यशास्त्रम्।

---

1. म.भा. १. २. ३२
2. वाक्यपदीये-१ ४ २
3. महाभाष्यम्-१-१-१

यस्मादतः प्रथममेतदधीत्य धीमान्
शास्त्रान्तरेषु भवति श्रवणाधिकारी॥

२२. पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।
सर्वोपकारकं ग्राह्यं कृत्स्नं, त्याज्यं न किञ्चन॥ (भास्कराचार्यः)

व्याकरणस्य प्रकाराः

भविष्यपुराणे ब्राह्मपर्वे अष्टविधव्याकरणं प्रतिपादितं वर्त्तते।

प्रथमं प्रोच्यते ब्राह्मं द्वितीयमैन्द्रमुच्यते।
याम्यं प्रोक्तं ततो रौद्रं वायव्यं वारुणं तथा।
सावित्रं च तथा प्रोक्तमष्टमं वैष्णवं तथा।

लघुत्रिमुनिकल्पतरुकृत् नवविधव्याकरणानि प्रतिपादयन्ति। यथा—

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकलं पाणिनीयकम्॥

ऐन्द्रव्याकरणम्-ऐन्द्रव्याकरणमधिकृत्य उपमन्युः तमिळव्याकरणं तोल्काप्पियम ऐन्द्रव्याकरणस्याधारेण रचितमिति डॉ. बर्नल् महाशयस्याभिप्रायः। पाणिनेः पूर्वं बहवो वैयाकरणाः आसन्। ते सर्वे पाणिनिमहोदयेनैव उदाहृताः। श्रीतत्वनिधिनामके वैष्णवग्रन्थेऽपि अस्यैव श्लोकस्य उल्लेखः लभ्यते। रामायणेऽपि नवविधव्याकरणस्य प्रस्तावः अस्ति। उत्तरकाण्डेऽपि नवव्याकरणशब्दस्य प्रयोगः दृश्यते।

सोऽयं नवव्याकरणार्थवेत्ता[1] इति।

पञ्चव्याकरणानि—काशिकावृत्तिमध्ये[2] पञ्चव्याकरणानमुल्लेखः विद्यते। प्रायः तानि-१. ऐन्द्रम् २. चान्द्रम् ३. पाणिनीयकम् ४. काशकृत्स्नम् ५. आपिशलम्।

यद्यपि व्याकरणशास्त्रस्य अष्टविधत्वमेव प्रसिद्धम्। परं भास्करेण उक्तानि-अष्टौ व्याकरणानि एव प्रसिद्धानि।

त्रिमुनिव्याकरणम्—पाणिनिमहर्षेः अष्टाध्यायी, कात्यायनस्य वार्तिकं, पतञ्जलिमुनेः भाष्यं च त्रिमुनिव्याकरणमिति प्रसिद्धम्। अत एव

मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च।
वैयाकरणसिद्धान्तकौमुदीयं विरच्यते॥

इति भट्टोजीदीक्षितेन वैयाकरणसिद्धान्तकौमुदीप्रारम्भे मङ्गलाचरणं विहितम्।

व्याकरणशास्त्रस्य विभागः

अत्र द्वौ भागौ स्तः। १. पाणनिमहर्षेः प्राचीनाः। २. अर्वाचीनाः।

---

1. ३६-४७
2. ४.२.६०

व्याकरणस्य विभागाः-१. वैदिकमात्रम्। (प्रातिशाख्यादि) २. लौकिकमात्रम्। (कातन्त्रादि) ३. वैदिकलौकिकोभयविधम् (आपिशल, पाणनीयादि)।

पञ्चाङ्गव्याकरणम्—सूत्रपाठ, धातुपाठः, गणपाठः लिङ्गानुशासनं, शिक्षा च इति पञ्च अङ्गानि पाणिनिना ग्रथितानि इति हेतोः पाणिनीयव्याकरणस्य पञ्चाङ्गव्याकरणमिति प्रसिद्धिः।

वेदाङ्गत्वम्

ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च, प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति। तत्राङ्गानि-शिक्षा, व्याकरणम्, छन्दः, निरुक्तं, कल्पः, ज्योतिषमिति। अपि च तत्राऽपरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इति। तद्धयव्याकृतमासीत्। नामरूपाभ्यामेव व्याक्रियतासौ नामायमिदं रूपमिति।

छन्दः पादौ वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्येव ब्रह्मलोके महीयते॥

इदमक्षरच्छन्दो क्रमशः समनुक्रान्तम् यथा आचार्याः ऊचुः, ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भारद्वाजाय, भारद्वाजः ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यस्तं खल्विदमक्षरसमाम्नायमित्याचक्षते, न भुक्त्वा न वक्तुं प्रब्रूयात्, ब्रह्मराशिः इति अस्य चतुर्दशसूत्रकदम्बकस्य आम्नायत्वमुक्तम्। तन्मूलकत्वादेवास्य व्याकरणस्य वेदाङ्गत्वं युक्तम्। व्याकरणशास्त्रज्ञानेन सर्ववेदपाराणजं पुण्यं प्राप्नोतीति नागेशेन प्रतिपादितम्।

प्रकार्याणि

१.	शब्दरचना	२.	भाषारचना
३.	भाषाविश्लेषणम्	४.	नियमनिर्धारणम्
५.	साधुशब्दनिरूपणम्	६.	शुद्धप्रयोगः

व्याकरणस्य प्रधानांशाः

ध्वनिविचारः—ध्वनीनां विश्लेषणं वर्गीकरणं चात्र भवति।

पदविचारः— अत्र पदानां विश्लेषणं, विभक्तिप्रत्ययानामध्ययनं, सन्धिसमासादीनाम् अनुशीलनं, लिङ्गज्ञानम् क्रियते।

वाक्यविचारः—अस्मिन् विभागे वाक्येषु विद्यमानानां शब्दानां विचारः, तेषां क्रमः कारकाणां प्रयोगः, वाक्यानां रचना करणीया, विरामचिह्नानां अध्ययनं च विधीयते।

अर्थविचारः-अत्र शब्दस्य अर्थविचारः क्रियते। संस्कृतशब्दानाम् अर्थः प्रत्ययोपसर्गादियोजनेन परिवर्तनं प्राप्नोति। कदाचित् प्रकरणवशाच्च अर्थे भेदः भवति। अत एव वाक्यपदीये संयोगविप्रयोगसाहचर्यादिविशेषस्मृतिकारणैः शब्दानाम् अर्थप्रतीतिः जायते इत्युक्तम्। वेदे स्वरभेदेऽपि अर्थभेदः भवतीति वचनं तु अरुणो मासकृत्, नतस्य प्रतिमा अस्ति, यथेन्द्रशत्रुः इत्यादि-उदाहरणस्थलेषु स्पष्टमेव।

पाठ्यक्रमः

(१) संस्कृतवर्णमाला-शुद्धोच्चारणम्, वर्णानां वर्गीकरणम्।

(२) सन्धिः—स्वराः, व्यञ्जनानि, अच्सन्धिः, हल्सन्धिः, अन्ते विसर्गसन्धिः।

(३) नामशब्दाः - संज्ञापदानि, सर्वनामपदानि, विशेषणापदानि। लिङ्गभेदः वचनभेदश्च। कारकाणां ज्ञानम्।

(४) धातुपाठः - प्रथमं भ्वादिगणः, पश्चात् अन्यगणधातूनां पाठः।
प्रथमं परस्मैपदि, ततः आत्मनेपदि, अन्ते उभयपदी। पूर्वं पञ्चलकाराणां पाठः। ततः अवशिष्टानां पञ्च लकाराणां ज्ञानम्।

(५) समासः - प्रायः सर्वेषां समासानां ज्ञानं प्राथमिकस्तरतः एव भवेत्।

(६) कृदन्त- तद्धितप्रत्ययाः

(७) उपसर्गाः

प्रसिद्धव्याकरणग्रन्थाः	-	**ग्रन्थकाराः**
वाक्यपदीयम्	-	भर्तृहरिः
रूपावतरणम्	-	धर्मकीर्तिः
दुर्घटवृत्तिः	-	शरणदेवः
भाष्यप्रदीपम्	-	कैयटः
उद्योतः	-	नागेशभट्टः
प्रक्रियाकौमुदी	-	रामचन्द्राचार्यः
प्रक्रियासर्वस्वम्	-	नारायणभट्टः
पाणिनिवादनक्षत्रमाला	-	अप्पय्यदीक्षितः
सिद्धान्तकौमुदी	-	भट्टोजीदीक्षितः
लघुसिद्धान्तकौमुदी		
लघुशब्देन्दुशेखरम्		
बृहच्छब्देन्दुशेखरम्	-	नागेशभट्टः

कौमुदीप्रशस्तिः-

कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः।
कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः॥
अष्टाध्यायीमहाभाष्ये द्वे व्याकरणपुस्तके।
ततोऽन्यत्पुस्तकं यत्तु तत्सर्वं धूर्तचेष्टितम्॥

व्याकरणशास्त्रमहत्त्वम्-

नागो भाति मदेन कं जलरुहैः पूर्णेन्दुना शर्वरी
शीलेन प्रमदा जवेन तुरगो नित्योत्सवैर्मन्दिरम्।
वाणी व्याकरणेन हंसमिथुनैर्नद्यः सभा पण्डितैः
सत्पुत्रेण कुलं नृपेण वसुधा लोकत्रयं विष्णुना॥
द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः।
तत्पुरुष कर्मधारय येनाहं स्यां बहुव्रीहिः॥
येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥
सिंहो व्याकरणस्य कर्त्तुरहरत् प्राणान् प्रियान् पाणिनेः।[1]
नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्॥

वाग्वै पराच्यव्याकृतावदत्। ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुर्विति। तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्।[2]

सायणाचार्येण प्रतिपादितं यत् "तामखण्डां वाचं मध्ये विच्छिद्यप्रकृतिप्रत्ययविभागं सर्वत्राकरोत्।" अपि च ऋग्वेदमन्त्राः केचन शास्त्रस्यास्यमहत्त्वं वर्धापयन्ति।

१. **चत्वारि शृङ्गा त्रयो अस्य पादा**
द्वे शीर्षे सप्त हस्ता सो अस्य।
त्रिधा बद्धो वृषभो रोरवीति।
महो देवो मर्त्यां आविवेश।[3]

---

1. पञ्चतन्त्रम्-२.३३
2. तै.सं. ६. ४. ७
3. ४-५ ८-३

मानवेषु अन्तर्यामित्वेन विद्यमानं शब्दपरब्रह्म अद्भुतवृषभस्वरूपः। तस्य वृषभस्य चत्वारः शृङ्गाः, त्रयः पादाः, द्वे शिरसी, सप्त हस्ताश्च सन्ति। अयं मानवानामन्तः प्रविश्य त्रिभ्यः प्रदेशेभ्यः ध्वनिं करोति। अपि च सर्वान् कामान् प्रापयति॥ अत्र-

शृङ्गाः - सुबन्त-तिङन्त-उपसर्ग-निपाताः चतुर्विधशब्दाः।

पादाः - भूतभविष्यद्वर्तमानकालाः।

शिरसी-नित्यः (स्फोटः), अनित्यः (वैखरी)।

हस्ताः - सप्त विभक्तयः।

स्थानानि - उरः, कण्ठः, शिरः। (शब्दस्य अभिव्यक्तिप्रदेशाः)

वृषभः - वर्षति-काङ्क्षाः पूरयति। (सुशब्दप्रयोगतः)

रोरवीति-सततं नादरूपेण गोचरीभूतो भवति।

एतादृशशब्दब्रह्मज्ञः मानवः तत्सायुज्यमाप्नोति। अयमेवांशः भर्तृहरिणापि प्रतिपादितोऽस्ति। यथा—

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते॥[1]
वैखर्या मध्यमायाश्च पश्यन्त्या श्चैतदद्भुतम्।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम्॥
स्वरूपज्योतिरेवान्तः परा वागनपायिनी॥[2]

२. **उत त्वः पश्यन्न ददर्श वाचमुत त्व शृण्वन्न शृणोत्येनाम्।**
उतो त्वस्मै तन्वं विसस्रे जायेव पत्या उशती सुवासाः॥[3]

मन्त्रेऽस्मिन् प्रथमपादद्वयं व्याकरणज्ञानहीनेभ्यः, अन्तिमपादद्वयं व्याकरणज्ञानवद्भ्यश्च भवति। शब्दशास्त्रमजानानः शब्दं पश्यन्, शृण्वन् अपि साफल्यं न प्राप्नुयात्। शब्दसंस्कारहीनस्य स्वरूपज्ञानं वा अर्थज्ञानं वा न संभवेत्। परं व्याकरणज्ञस्य विषयः भिन्नः। वाग्देवी तादृशाय प्रियभार्येव स्वयमेवात्मानं समर्पयति। अर्थात् वैयाकरणस्य शब्दार्थस्वरूपं करतलामलकवद्भवति॥

३. **सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।**
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि॥[4]

---

1. वाक्यपदीये-१-१३१
2. वाक्यपदीये १-१४३
3. १०-७१-४
4. १०-७१-२

जालेन चूर्णशोधनमिव प्रज्ञानेन वैयाकरणाः शब्दज्ञानं परिशोध्य (अपशब्दान्, सुशब्दान् च पृथक् कृत्वा) सुशब्दानेव प्रयोगं कुर्वन्ति। एतेषां शब्दार्थाभेदज्ञानं, सर्वशब्दसाम्यम्, शब्दब्रह्मज्ञानं च क्रमशः भवेत्। अन्ततस्ते शब्दब्रह्मसायुज्यमपि प्राप्नुयुः॥

४. **सुदेवो असि वरुण यस्य ते सप्त सिन्धवः।**
अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव॥[1]

वरुणः सत्यदेवः। अर्थात् सत्येन प्रकाशयति। वैयाकरणा अपि सत्यस्वरूपा भवन्ति। सत्यस्वरूपं ब्रह्म तेषां मुखेषु सदा प्रकाशयत्येव। यथा अग्निः शून्यां लोहप्रतिमां प्रविश्य तत्रस्थं मालिन्यं परिहाय शुध्यति तथैव सप्तविभक्त्यन्तः साधुशब्दोऽपि वैयाकरणमुखं प्रविश्य प्रकाश्य च तेषां दुष्कर्मदोषमपहरति। साधुशब्दप्रयोजकाः शाब्दिका विगतकल्मषाः, वरुणसदृशा भूत्वा स्वर्लोकं प्राप्नुवन्ति।

प्रत्यस्तमितभेदाया यद्वाचो रूपमुत्तमम्।
यदस्मिन्नेव तमसि ज्योतिः शुद्धं विवर्तते।
इदं हि शास्त्रमाहात्म्यं दर्शनालसचेतसाम्।

कण्ठाभरणे-

अपशब्दवदाभाति न च सौभाग्यमुज्झति॥
रसालङ्कारसारापि वाणी व्याकरणोज्झिता।
श्वित्रोपहतगात्रेव न रञ्जयति सज्जनान्॥

छान्दोग्योपनिषदि व्याकरणमुपक्रम्य वेदानां वेदः इत्युक्तम्।[2]

व्याकरणशास्त्रस्य उत्पत्तिः

संसारे प्रवृत्तस्य सर्वस्य ज्ञानस्य आदिमूलं, सर्वज्ञानमयस्य वेदव्याकरणस्यापि आदिमूलं वर्तते। वैदिकमन्त्रेषु उपलब्धमानपदानां व्युत्पत्तिः अमुमेव सिद्धान्तं द्रढयति।

यथा— यज्ञेन यज्ञमयजन्त देवाः।[3]
ये सहांसि सहसा सहन्ते।[4]
पूर्वीरशन्तावश्विना।[5]
धान्यमसि धिनुहि देवान्।[6]
केतपूः केतं नः पुनातु।[7]

---

1. ८-६९-१२
2. प्रक्रियाप्रकाशः-२६-३४
3. ऋ. १-१६४-५०
4. ऋ. ६-६६-९
5. ऋ. ८-५ ३१
6. यजु. १-१-२०
7. यजु १-११-७

येन देवाः पवित्रेण। आत्मानं पुनते सदा।[1]

तीर्थैस्तरन्ति।[2]

व्याकरणशब्दः यस्मात् धातोः निष्पन्नः तस्य मूलार्थस्य प्रयोगः यजुर्वेदे उपलभ्यते। यथा—

दृष्ट्वा रूपे व्याकरोत्। सत्यानृते प्रजापतिः।

व्याकरणशास्त्रस्य उत्पत्तिः कदा अभवत् इति प्रश्नस्य उत्तरं निश्चितरूपेण वक्तुं न पारयामः। वैदिकपदपाठानां समीक्षायाः आधारेण एतावद्वक्तुं शक्यते यत्-पदपाठरचनायाः पूर्वमेव प्रकृतिप्रत्यय-धातु-उपसर्ग-समास-सन्धि-इत्यादीनां विभागः सम्पूर्णतया स्पष्टतया च निर्धारितः वर्त्तत इति। ऋग्वेदपदपाठे विषयोऽयं निरूपितो विद्यते।

श्रीरामचन्द्रकालेऽपि व्याकरणस्य सुव्यवस्थितपठनपाठनं प्राचलत्। यास्कमुनिनापि स्वीये निरुक्तग्रन्थे विविधव्याकरणानाम् उल्लेखः कृतः विद्यते। शाकटायनव्याकरणमपि यास्कात्पूर्वमेव रचितमिति विमर्शकानामभिप्रायः।

पारिभाषिकशब्दाः

परिभाषा- परितो व्यापृतां भाषां परिभाषेति कथ्यते।
परिभाषा चैकदेशस्था सर्वं शास्त्रमभिज्वलयति।
अनियमेनियमकारको न्यायविशेषः।

क्रिया- क्रिया नाम साध्यमानस्वरूपा, पूर्वापरीभूतावयवा।
यावत् सिद्धमसिद्धं वा साध्यत्त्वेनाभिधीयते।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते॥
गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पिताभेदः क्रियते व्यपदिश्यते॥

नाम— शब्देनोच्चरितेनेह येन द्रव्यं प्रतीयते।
तदक्षरविधौ युक्तं नामेत्याहुर्मनीषिणः॥
अष्टौ यत्र प्रयुज्यन्ते नानार्थेषु विभक्तिषु।
तन्नाम कवयः प्राहुर्भेदे वचनलिङ्गयोः॥

विभक्तिः - निर्देशः कर्मकरणं प्रधानमपकर्षणम्।
स्वाम्यर्थोप्यधिकरणं विभक्त्यर्थाः प्रकीर्तिताः॥[3]

अव्ययम्- सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्नव्येति तदव्ययम्॥

---

1. साम. उ. (५-२-८-५)
2. अथर्व १८.४.८
3. निरुक्तभाष्ये-१-६

बहुलम् - क्वचित्प्रवृत्तिः क्वचिद प्रवृत्तिः। क्वचिद्विभाषा क्वचिदन्यदेव।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति॥

आख्याता- क्रियासु बह्वीष्वभिसंश्रितो यः पूर्वापरीभूत इवैक एव।
क्रियाभिनिर्वृत्तिवशेन सिद्ध आख्यातशब्देन तमर्थमाहुः॥

धात्वर्थेन विशिष्टस्य विधेयत्वेन बोधने समर्थः स्वार्थयत्नस्य शब्दो वाऽख्यातमुच्यते।

वार्त्तिकम् - उक्तानुक्तदुरुक्तार्थव्यक्तिकारि वार्त्तिकम्।

भाष्यम्- सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥

प्रयोजनानि

आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।
प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः॥

ब्रह्मणः-आसन्नम्-

वेदार्थज्ञानाय निरुक्तस्य, गायत्री-जगतीत्यादिछन्दोविवेकाय छन्दशास्त्रस्य, वर्ण-स्वर-मात्र-स्थान-प्रयत्नादिविवेचनाय शिक्षायाः, वेदप्रतिपादितकर्मप्रयोगा-चरणाय कल्पशास्त्रस्य, तिथ्यादिकालज्ञानाय ज्यौतिषस्य आपेक्षा यद्यपि भवति, तथापि शब्दसंस्काररक्षोहागमादिद्वारा वेदस्वरूपावबोधनाय वेदस्य साक्षादुपकारकं व्याकरणशास्त्रं सर्वथा. सर्वदा च सिद्ध्यति।

तपसामुत्तमं तपः—

ब्रह्मचर्यम्, अधश्शय्या इत्यादयः तपः प्रकाराः सन्ति। तेषां प्रत्यक्षप्रयोजनं नास्ति। जन्मान्तरे वा, लोकान्तरे वा फलं सिद्ध्यति। तस्यैव अदृष्टफलम् इति नाम। एतस्मात् तपसः व्याकरणरूपतपः श्रेष्ठतमम्। अस्य तपसः साधुत्वम्, अर्थज्ञानमिति दृष्टप्रयोजनं, धर्मः, अदृष्टप्रयोजनम् इत्येतानि सन्ति।

साधुप्रयोगानुमिनाँश्च शिष्टान्न वेद यो व्याकरणं न वेद॥

सामर्थ्ययोगान्न हि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्।

शब्दानां तत्त्वा बोधः व्याकरणादृते भवितुं नार्हति।

तद् व्याकरणम् अपवर्गस्य उपायरूपम्।

वाणीदोषाणां चिकित्सारूपम् सर्वविद्यानाम्।

रक्षोहागमलघ्वसन्देहाः प्रयोजनम्-

रक्षा- भाषायाः तद्गतसाहित्यस्य संरक्षणम्।

ऊहः- शाब्दिक-आर्थिकदृष्ट्या नवीनकल्पना।

आगमः- भाषायाः सम्यक् ज्ञानाय विविधप्रक्रियाः भवन्ति।

लघु- भाषाज्ञानाय सरलतम उपायो व्याकरणमेव।

असन्देहः- भाषायाम् असाधुशब्दपरिज्ञानाय, सन्देहरहितप्रयोगाय च व्याकरणस्य महती आवश्यकता वर्तते।

भर्तृहरिणा भाषास्वरूपज्ञानाय व्याकरणमेव मुख्योपायः इति वाक्यपदीये प्रमाणितम्। यथा-व्यवहारातीतभाषायाः ज्ञानाय व्याकरणमेव मुख्यसाधनम् इति न्यायसिद्धान्तमुक्तावल्यां प्रतिपाद्य, व्याकरणम् शक्तिग्रहमिति व्याहरति। यथा-शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।

नामान्तराणि

शब्दानुशासनम्, शक्तिग्रहम्, वर्णविज्ञानशास्त्रं, पदविज्ञानशास्त्रम्, शब्दपारायणम्। अनुशिष्यन्ते शब्दा अनेनेति शब्दानुशासनम्।

व्याकरणशिक्षणस्य उद्देश्यानि

- छात्रेभ्यः संस्कृतभाषायाः ध्वनितत्त्वपरिचयप्रदानम्।
- शब्दधातुरूपाणां ज्ञानप्रदानम्।
- शुद्धवाक्यरचनायाः योग्यतासम्पादनम्।
- तर्कशक्तेः प्रवर्धनम्।
- रचनात्मकप्रवृत्तेः विकासः।
- शब्दानां साध्वसाधुज्ञानसम्पादनम्।
- भाषायाः गुणदोषपरिशीलने ज्ञानसम्पादनम्।
- सैद्धान्तिकव्याकरणस्य ज्ञानप्रदानम्।
- लब्धज्ञानस्य प्रयोगावसरप्रदानम्।
- भाषायां सम्पूर्णाधिकारसम्पादनम्।
- मौखिक-लिखितरूपभाषयोः शुद्धभाषायाः प्रयोगकरणे अभ्यासावसरः।
- छान्दसाः स्वल्पमतयः शास्त्रान्तररताश्च ये।

  ईशाना व्याधिनिरताः तथालस्ययुताश्च ये॥

  वणिक्सस्यादिसंसक्ताः लोकयात्रादिषु स्थिताः।

  तेषां क्षिप्रप्रबोधार्थम्॥

व्याकरणशिक्षणविधयः

सूत्रप्रणाली

किं नाम सूत्रम्-इति विवक्षायां दुर्गसिंहेन, सूते, सूत्रयति वा सूत्रमिति प्रतिपादितम्। अपि च-

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥
लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः॥

सूत्रं प्रत्ययं शासयतीति भर्तृहरिणा उक्तम्। यथा—

लिङ्गं लिङ्गपरिज्ञाने सूत्रं प्रत्ययशासकम्।
सोऽयमित्यभिसम्बन्धात् पुं शब्दे स्त्र्यभिधायिता।

A short or concise technical sentence used as a memorical rule. Any work or manual containing such aphoristic rules.

हैमकोशग्रन्थे सूत्रं तु सूचनाकारिग्रन्थे तन्तुव्यवस्थयोः इत्युक्तम्। सूत्र वेष्टने इति धातोः[1] एरच्[2] सूत्रं प्रतिष्णातम्[3] इति सूत्रे पाणिनिमुनिः सूत्रमिति पदं शुद्धमित्यर्थे प्रयुक्तवान्। तत्र प्रतेः स्नातेः षत्वम्। प्रतिष्णातं सूत्रम्। शुद्धमित्यर्थः। अन्यत्र प्रतिस्नातम् इति भट्टोजीदीक्षितस्य वृत्तिः। षट्प्रकारकाणि सूत्राणि सन्ति।

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥

१. संज्ञासूत्राणि २. परिभाषासूत्राणि ३. विधिसूत्राणि ४. नियमसूत्राणि ५. अतिदेशसूत्राणि ६. अधिकारसूत्राणि। पुनः सूत्रं द्विविधं भवति-सामान्यम्। विशेषञ्च।

विधिप्रक्रमः-

अस्मिन् विधौ व्याकरणसूत्राणां कण्ठस्थीकरणं भवति। येषां सूत्राणां प्रयोगं भाषायाः ज्ञानप्राप्त्यनन्तरं करिष्यन्ति। संस्कृतव्याकरणे सन्धिसूत्राणि पश्यामः। तत्र प्रथमम् अच्-हल्-विसर्गसन्धिसूत्राणां कण्ठस्थीकरणमेव भवति। ततः प्रयोगः भवति। यथा-इको गुणवृद्धी। अकः सवर्णे दीर्घः। इको यणचि। वृद्धिरेचि। इत्यादीनि सूत्राणि।

संस्कृतव्याकरणशिक्षणस्य विधिरयम् अत्यन्तप्राचीनः। अस्यां प्रणाल्यां शिक्षकः छात्रैः सूत्राणां रटनं कारयति। कण्ठस्थीकृतानां सूत्राणामाधारेणैव छात्राः भाषाज्ञानं प्राप्नुवन्ति। अपि च भाषाया प्रयोगं कुर्वन्ति।

---

1. चु-उ-से
2. ३-३-५६
3. ९-३-९०

लाभाः—

वस्तुतः विधिरयं उच्चस्तरीयाणां छात्राणां कृते अन्यन्तोपयोगी। अत्र व्याकरणसूत्राणां कण्ठस्थीकरणं कृत्वा व्याकरणशास्त्रे प्रवीणतां सम्पादयन्ति।

दोषाः—

१. मनोवैज्ञानिकसिद्धान्तानां प्रतिकूलोऽयं विधिः।

२. कण्ठस्थीकरणे अधिकं बलं दीयते।

३. कण्ठस्थीकृतानां सूत्राणां नियमानां वा प्रयोगः सम्पूर्णप्रावीण्यताप्राप्तेः पश्चात् कर्तुं प्रभवन्ति।

पारायणविधिः

संहिता-पद-क्रम-जटाद्यष्टविकृतिपाठैः वैदिकमन्त्राणा सस्वरपाठनमेव पारायणम् इति कथ्यते। यः नियमानुसारं पारायणं करोति तस्य पारायणिकः इति प्रसिद्धिः। वेदपारायणसमये केचन नियमाः अवश्यं पालनीयाः भवन्ति। सन्ध्यावन्दन-अग्निकार्यादिनित्यकर्मणः पश्चात् पारायणं प्रारभणीयम् भवति। भूमौ शयनीयम्। पारायणसमये किमपि अन्यद्भाषणं न करणीयम्। अतः अस्य नाम वाचं यमः (वाचां यमः) इति वर्तते। बहवः आहारनियमाः अपि भवन्ति। कश्चित् क्षीरमेव पिबति। एतादृशस्य पयोव्रतः इति नाम। अधिकतया पारायणं यः करोति तस्मै द्विपारायणिकः इति नाम।

आचार्यपाणिनिसमये पारायणविधिः विशेषप्राचुर्ये आसीत्। तदानीं पाणिनेः अष्टाध्यायीं सूत्रशः पारायणं चलति स्म। इदानीमपि केचन पारम्परिकविद्यालयाः सन्ति, यत्र अद्यापि नियमितरूपेण अष्टाध्याय्याः पारायणं प्रचलदस्ति।

कण्ठस्थीकरणविधिः

अत्र कोऽपि विषयः भवति, तस्य कण्ठस्थीकरणं, कण्ठाग्रकरणं भवति। यद्यपि कण्ठस्थीकरणे महान् परिश्रमः, परं तत्रैव अधिकं बलं दीयते। अर्थात् वारं आवृत्तिः क्रियते। आवृत्तेः संख्यानुसारं पञ्चकोऽधीतः, सप्तकोऽधीतः, अष्टकः, नवकः इति नाम भवति।

पाणिनिसमये व्याकरणस्य परीक्षा प्रचलति स्म। तदानीं परीक्षा अशुद्धिगणनस्य आधारेण आसीत्। एकदोषिणाः ऐकान्यिकः, द्विदोषिणः, त्रिदोषिणो त्र्ययन्यिकः इति प्रतिष्ठा आसीत्।

अर्थज्ञानविधिः

केवलं कण्ठस्थीकरणेन प्रयोजनं नास्ति, अर्थज्ञानमपि अत्यावश्यकमिति अस्य विधेः आशयः। यथा—

स्थाणुरयं भारहारः किलाऽभूत्
अधीत्य वेदं यो न विजानात्यर्थम्।
योऽर्थज्ञः सकलं भद्रमश्नुते
नाकमेति ज्ञातविधूतपाप्मा॥

इति निरुक्तवचनम् अत्र मुख्याधारो भवति। महर्षिपतञ्जलिरपि निगदति यत् - अग्निं विना शुष्ककाष्ठो यथा ज्वलितुं न प्रभवति तथैव अर्थज्ञानं विना केवलं कण्ठस्थीकरणं न प्रकाशते। यथा—

यदधीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्केन्धौ न तज्ज्वलति कर्हिचित्॥

अतः ज्ञायते यत् अर्थज्ञानपूर्वकरटनमेव श्रेयः, करणीयञ्चेति।

अव्याकृतप्रणाली

भाषायाः 'प्रयोगद्वारा छात्रः व्याकरणस्य ज्ञानं प्राप्नोति। यथा बालकः व्याकरणस्य ज्ञानं वा औपचारिकशिक्षणं वा विनापि मातृभाषायाः ज्ञानं प्राप्नोति तथैव संस्कृतभाषायाः ज्ञानं, संस्कृतव्याकरणस्य औपचारिकाध्ययनं विना प्राप्नुयात्। अतः अत्र पृथक्तया व्याकरणशिक्षणस्य आवश्यकता नास्ति।

व्याकरणं, शब्दरूपाणां माध्यमेन., नियमान् विना पाठयति। अवचेतनस्याधारेण पाठ्यपुस्तकस्य पठने, भाषणे, लेखने तथा सम्भाषणे च अभ्यासः प्रदीयतेऽत्र। अस्य सिद्धान्तस्य मुख्याभिप्रायः अस्ति यत् व्याकरणस्य औपचारिकशिक्षां विना केवलमभ्यासेन, भाषायाः शुद्धप्रयोगे कौशलसम्पादनम्। मातृभाषायाः अभ्यासः गृहे एव भवति। सहजतया, अनौपचारिकया, व्याकरणस्याध्ययनं विना शिक्षितुं शक्यते।

प्रणाल्या अस्या अभ्यासो न हि त्यक्तव्यः अभ्यासो हि परं बलम्। अनभ्यासे विषं भाषा............इति वचनं मूलमन्त्रः भवति।

बालः पठति।	अहं लिखामि।
बालौ पठतः।	आवां लिखावः।
बालाः पठन्ति।	वयं लिखामः।

एवंप्रकारेण अभ्याससमये प्रथमपुरुषादि-एकवचनादि वर्तमानकालादि-चिन्तनमेव न भवति संस्कृतव्याकरणे सहस्रशः नियमाः सूत्राणि च सन्ति। तर्हि केवलं प्रयोगेन, अनौपचारिकपद्धत्या च शिक्षितुं शक्यते। भाषायाः शुद्धप्रयोगाभ्यासः क्रमानुसारं न भवेदेव। तेन छात्राः आत्मविश्वासपूर्वकं शुद्धभाषाप्रयोगं कर्तुं न पारयन्ति। अल्पप्रयोगज्ञानाय, अभ्यासः गृहे एव भवति। सहजतया अनौपचारिकया,

व्याकरणस्याध्ययनं विना शिक्षितुं शक्यते। अधुना बहुषु विद्यालयेषु सिद्धान्तान् नियमान् च विना व्याकरणस्य अध्ययनं प्रचलति।

पाठ्यपुस्तकप्रणाली

अस्यां प्रणाल्यां प्रत्येकस्याः कक्ष्यायाः कृते पृथक्पृथक्तया पाठ्यपुस्तकानि सुनिश्चितानि भवन्ति। प्रायः अध्यापकाः निर्धारितं पाठ्यपुस्तकं सामान्यपाठ्यपुस्तकमिव पाठयन्ति। अस्मिन् सूत्राणि, परिभाषाः, नियमाः, उदाहरणानि, अभ्यासाः दीयन्ते. अध्यापकः सूत्राणि उपर्युक्तविषयान् पाठयित्वा पारिभाषिकशब्दानां परिचयं करोति।

गुणाः—

१. स्वाध्यायस्य अभ्यासो जायते।

२. समयस्य सदुपयोगो भवति।

३. पाठ्यपुस्तकानामुपयोगेन न केवलं छात्राः अपि तु अध्यापकाः अपि लाभान्विता भवन्ति।

४. अनेन विधिना प्राप्तं ज्ञानं स्थिरं भवति। चिरं तिष्ठति।

दोषाः—

१. मनोवैज्ञानिकसिद्धान्तानुसारं विधिरयं प्रतिकूलः। यतो हि रटने एव उत्सुकता भवति।

२. तर्कशक्तेः, विकासात्मकशक्तेः च वर्धनं न भवति।

आगमनपद्धतिः

प्रथमम् अध्यापकः उदाहरणानि उपस्थापयति। तेषामुदाहरणानां माध्यमेन नियमान्, सूत्राणि च छात्रैः निष्कासयति। अर्थात् आदौ उदाहरणानि, ततः नियमाः, सूत्राणि च भवन्ति। अस्यां पद्धतौ अभ्यासाय अनेकोदाहरणानि सदृशानि, छात्राणां पुरतः उपस्थाप्य नियमान्वेषणाय, निष्कासनाय वा छात्रान् प्रेरयति। अयं प्रकारः छात्राणां कृते नियमान्वेषणे रुचिजनको भवति। छात्राः उदाहरणेषु विद्यमानान् सामान्यान् सदृशान् अंशान् परिशील्य नियमान् स्वस्ववाक्येषु रचयन्ति। यदि कश्चन छात्रः उदाहरणेषु विद्यमानान् अंशान् परिशीलने समर्थः न भवति तर्हि नियमचिन्तनेऽपि समर्थः न भवति। अतः अध्यापकः सावधानेन उदाहरणानि छात्रेभ्यः दद्यात्। यानि उदाहरणानि छात्रैः सरलतया अवगम्यन्ते, तान्येव प्रस्तोतव्यानि, येन छात्राः नियमानां चिन्तने, प्रकाशने च सक्षमाः भवेयुः। अस्पष्टानि, सन्देहपूर्णानि उदाहरणानि अध्यापकः नोपस्थापयेत्।

अध्यापकस्य योगदानम्—

- सरलया भाषया उदाहरणानि छात्राणां पुरतः स्थापयेत्।
- नियमानां चिन्तने, अन्वेषणे छात्रेभ्यः सहकुर्यात्।
- प्रश्नोत्तरप्रणालीमाश्रित्य उदाहरणानि उपस्थापयेत्।

- अध्यापकः मार्गदर्शकः भूत्वा छात्रान् प्रेरयेत्।
- अध्यापकः स्वयं सक्रियो भूत्वा छात्रान् नियमनिरूपणे प्रोत्सहेत्।
- ततः अध्यापकः प्रामाणिकतया नियमनिरूपणं कुर्यात्।
- यदि केचन छात्राः उदाहरणेषु, नियमचिन्तने, अन्वेषणे, निरूपणे वा सन्दिहानाः भवन्ति, तर्हि अध्यापकः सावधानेन तान् वारं वारं बोधयेत्।
- पुनः सूत्रं स्पष्टतया बोधयेत्।
- अन्ते पुनः उदाहरणानि प्रस्तोतव्यानि। तेन छात्राणां नियमनिरूपणादि विषयेषु लब्धं ज्ञानं सुदृढं भवति।

आगमनविधेः सोपानानि—

१. उदाहरणप्रस्तावः

२. छात्रनिरीक्षणम्, विश्लेषणञ्च

३. सदृशांशानां वर्गीकरणम्

४. नियमीकरणम्

५. नियमपरिशीलनम्

६. सूत्रनिरूपणम्

७. सन्देहनिवारणम्

८. पुनः उदाहरणोपस्थापनम्

९. पुनरभ्यासः

गुणाः—

- पद्धरितियं सरला, स्वाभाविकी च वर्तते।
- नियमानां वारं वारं चिन्तनेन, विश्लेषणेन च सूत्राणां कण्ठस्थीकरणस्य आवश्यकता न भवति।
- स्मरणशक्तेः, तर्कशक्तेश्च वर्धनं भवति।
- पद्धतिरियं मनोवैज्ञानिकसिद्धान्तान् अनुसरति।
- छात्राः स्वतः ज्ञानं सम्पादयन्ति।
- शिक्षणप्रक्रमः अधिकप्रभावशाली वर्त्तते।
- अनया पद्धत्या शिक्षणसूत्राणां माध्यमेन प्रचलति।
- छात्राः अधिकतया सक्रिया भवति।

- छात्राणाम् आत्मविश्वासो वर्धते।
- छात्रैः प्राप्तं ज्ञानं स्थिरं भवति, चिरं तिष्ठति।

आधुनिकव्याकरणशिक्षणपद्धतिषु इयं पद्धतिः अत्युत्तमा भवति। ज्ञातादज्ञातं, विश्लेषणात् संश्लेषणम्, सरलात्कठिनम् इत्यादीनां शिक्षणसूत्राणां माध्यमेन शिक्षणं भवति। अतः इयं पद्धतिः व्याकरणशिक्षणसन्दर्भे स्वीकरणीया।

निगमनविधिः

अध्यापकः आदौ सामान्यनियमान्, ततः सिद्धान्ताः, ततः परिभाषाः पाठयति। अनन्तरं प्रयोगं कारयति। अस्य विधेः उपरि लेण्डन् महोदयेन सुष्ठु परिशोधनं कृतम्। सः अभिप्रैति यत् निगमनविधिना यत्र शिक्षणं भवति, तत्र आदौ परिभाषा-सिद्धान्त-नियमानां पाठनं भवति। पुनः अतिजागरूकतया तेषां व्याख्या विधीयते। अन्ते प्रयोगस्य अभ्यासः भवति इति। अर्थात् सामान्यात् विशेषं प्रति इति सूत्रस्य अनुसारं सूत्रशिक्षणं भवति। महर्षिपतञ्जलिना निगमनविधेः माध्यमेन महाभाष्यं भाषितवान्।

निगमनविधेः सोपानानि—

१. निमयबोधनम्

२. नियमस्पष्टीकरणम्

३. नियमनिरीक्षणम्

४. नियमपरीक्षणम्

५. उदाहरणानि

६. प्रयोगः

७. अभ्यासः

गुणाः—

- विधिरयं आगमनविधेः पूरकः।
- आदौ नियमज्ञानं भवति। ततः उदाहरणानां विश्लेषणमिति प्रकारः सरलः। अर्थात् उदाहरणज्ञानं सरलतया भवति।
- अत्र अल्पे एव समये सम्यक् व्याकरणज्ञानं भवति।
- उच्चकक्ष्यासु व्याकरणशिक्षणाय अयमवश्यम् अनुसरणीयः।

दोषाः—

- मनोवैज्ञानिकसिद्धान्तानाम् अनुकूलो नास्ति।
- नियमानां कण्ठस्थीकरणे छात्राः क्लेशम् अनुभवन्ति।

- अनेन विधिना छात्राणां व्याकरणज्ञानं सम्यक् न भवति।
- विचारात्मकशक्तेः विकासो न भवति।

आगमन-निगमनविध्योः सम्यक् परिशीलनेनेदं ज्ञायते यत् पृथक्तया विधिद्वये पूर्णता नास्ति। विधिद्वयं परस्परं पूरकं भवति। अतः संस्कृतव्याकरणशिक्षणे द्वयोरपि विध्योः प्रयोगेण शिक्षणं सफलं भवति। अपि च समन्वयरूपेण उभयोः विध्योः प्रयोगः विधेयः। कदाचित् प्राथमिक-माध्यमिकस्तरयोः आगमनविधिः, उच्चस्तरे निगमनविधिश्च स्वीकरणीये।

सहयोगप्रणाली

काव्यशिक्षणेन, साहित्यशिक्षणेन, रचनाशिक्षणेन सह आवश्यकतानुसारं व्याकरणनियमानामपि पाठः भविष्यति। अपि च पाठ्यपुस्तकपाठने, अनुवादसमये वा व्याकरणांशान् पाठयति। अर्थात् अत्र प्रसङ्गवशात् व्याकरणशिक्षणं भवति। परं प्रणालीयं स्वतन्त्रतया व्याकरणशिक्षणाय अनुकूला नास्ति। पद्धतिरियं आगमन-निगमनपद्धतेः पुष्टिं ददाति। यतो हि सूत्राणां, नियमानां वा पठनानन्तरं व्याकरणकालांशे उदाहरणानां सम्यक् अन्वेषणाय, परिशीलनाय च अवसरो मिलति। अभ्यासाय, प्रयोगाय च अवसरः लभ्यते। उदा-

द्वेष्योऽपि सम्मतः शिष्टः तस्यार्त्तस्य यथौषधम्।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता॥

अस्य श्लोकस्य पाठनावसरे अर्थावबोधनादि अन्यविषयैस्सह व्याकरणांशानपि बोधयति। यथा—

सन्धयः—

द्वेष्यः + अपि – द्वेष्योऽपि।	(विसर्गसन्धिः)
तस्य + आर्त्तस्य – तस्यार्त्तस्य।	(दीर्घसन्धिः)
यथा + औषधम् – यथौषधम्।	(वृद्धिसन्धिः)
प्रियः + अपि – प्रियोऽपि।	(विसर्गसन्धिः)
अपि + आसीत् – अप्यासीत्।	(यणादेशसन्धिः)
अङ्गुली + इव – अङ्गुलीव।	(दीर्घसन्धिः)
इव + उरगक्षता – इवोरगक्षता।	(गुणसन्धिः)

समासाः—

उरगेन क्षता उरगक्षता – तृतीयातत्पुरुषसमासः।

परं तु अन्यविषयैः सह व्याकरणशिक्षणमित्युक्ते कदाचित् मुख्यविषयस्य बोधनं न भवति। अपि चात्र व्याकरणं गौणतया पाठ्यते।

अनौपचारिकविधिः

सूरिभरद्वाजमहोदययोः अनुसारम् अस्मिन् विधौ व्याकरणनियमानां, सूत्राणां वा पाठनं न भवति। परं तु कथं भाषायाः सम्यक् प्रयोगः करणीयः इति विषयः मौखिकाभ्यासेन, प्रयोगाभ्यासेन, लेखनाभ्यासेन च भवति। अत्र वर्ण-जाति-लिङ्ग-वयः -योग्यता-इत्यादिभेदो न परिगण्यते। केवलं अभिरुचिरेव मुख्ययोग्यता भवति। नियमितसमयोऽपि नास्ति। दशदिनसंस्कृतसम्भाषणशिबिरेषु अयमेव विधिः उपयुज्यते। शिबिरमाध्यमेन श्रवणभाषणकौशलयोः अभ्यासः भवति।

अपि च नवदेहलीस्थ-राष्ट्रिसंस्कृतसंस्थानेन देशे इदानीं द्वादशशतसंख्याकानि अनौपचारिकसंस्कृतशिक्षणकेन्द्राणि प्रचाल्यन्ते, यत्र सहस्रशः साधारणजनाः संस्कृतम् पठन्ति। अत्र चतुर्विधभाषाकौशलाना शिक्षणं भवति। अस्या एव योजनायाः नाम- संस्कृतस्वाध्याययोजना। वर्णमालाः आरभ्य शिक्षणं भवति। शिक्षणं सर्वं छात्रकेन्द्रितं भवति।

गुणाः—

- अयं विधिः प्राथमिकस्तरे अत्यन्तम् अनुकूलः।
- विभिन्नशब्दानां प्रयोगे क्षमतां सम्पादयति।
- भाषणसामर्थ्यम् अर्जयति।
- अनेन विधिना शिक्षणं प्रभावोत्पादकं, रुचिपूर्णं भवति।

आदर्शपाठयोजना

प्रस्तावना—(पूर्वज्ञानपरीक्षणम्। अभिप्रेरणसम्पादनम्)

अ- १. रामः विद्यालयं गच्छति।

२. मुनीन्द्रः तपः करोति।

३. हरीशः श्लोकं पठति।

प्रथमवाक्ये सन्धियुक्तं पदं किम् ?

छा-विद्यालयः।

अ-सन्धिविच्छेदं कुरुत।	छा-विद्या+आलयः।
अ-द्वितीयवाक्ये सन्धियुक्तं पदं किम् ?	छा-मुनीन्द्रः। मुनि+इन्द्रः।
अ-तृतीयवाक्ये सन्धिपदं किम् ?	छाः-हरीशः। हरि + ईशः।
अ-अत्र का सन्धिः।	छा-दीर्घसन्धिः।
अ-देवेन्द्र इति पदस्य पदविभागः कथम् ?	छा-देव+इन्द्रः।
अ-का सन्धिः ?	छा-न जानीमः।

उद्देश्यकथनम् – (पाठ्यांशस्पष्टीकरणम्)

अ–अद्य वयं गुणसन्धिमधिकृत्य ज्ञास्यामः।

छा–तथैव इति वदन्ति।

उदाहरणोपस्थापनम्। (विषयप्रस्तुतीकरणम्)

अ–देव+इन्द्रः–देवेन्द्रः।	रमा+ईशः = रमेशः।
पर+उपकारः–परोपकारः।	गङ्गा+उदकम्–गङ्गोदकम्।
जल+ऊर्मिः–जलोर्मिः।	महा+ऊर्मिः–महोर्मिः।
राज+ऋषिः–राजर्षिः।	ब्रह्मा+ऋषिः–ब्रह्मर्षिः।

अ–देवेन्द्रः इत्यत्र पूर्वपदस्य अन्तिमस्वरः कः ?

छा–अकारः।

अ–परपदस्य पूर्वस्वरः कः ?

छा–इकारः।

अ–तर्हि अ, इकारयोः मेलनेन कः स्वरः आगतः?

छा–अ, इकारयोः मेलनेन द्वयोः स्थाने एकारः आगतः।

अ–एवमेव अन्यसन्धियुक्तपदानि परिशील्य वदत।

छा–तथैव।

रमा+ईशः–रमेशः।	आ+ई–एकारः ?
पर+उपकारः–परोपकारः।	अ+उ–ओकारः।
गङ्गा+उदकम्–गङ्गोदकम्।	अ+ऊ–ओकारः।
महा+ऊर्मिः–महोर्मिः।	अ+ऊ–ओकारः।
महा+ऊर्मिः–महोर्मिः।	आ+ऊ–ओकारः।
राजा+ऋषिः–राजर्षिः।	अ+ऋ–अर्कारः।
महा+ऋषिः—महर्षिः।	आ+ऋ–अर्कारः।

नियमनिरूपणम्–

अ– अ–इ

आ–इ एकारः

अ–ई

आ–ई

अ–उ

आ–उ

अ–ऊ ओकारः

आ–ऊ

अ–ऋ–अर् कारः, आ–ऋ–अर् कारः, अ–लृ–अल् कारः।

अ–ऋ , आ–ऋ अर्कारः

अ–लृ , आ–लृ अल् कारः

नियमस्पष्टीकरणम्–

आद्गुणः, उरण् रपरः इति सूत्रद्वयं पाणिनिमुनिना गुणसन्धिविषये उक्तं वर्तते। ३ वर्णादचि परे पूर्वपरयोः स्वरयोः एकः गुण आदेशः स्यात्।

पु .ावृत्तिः–(प्रयोगः तथा अभ्यासः)

अ–एतेषां पदानां सन्धिविच्छेदं कुरुत।

१.	राजेन्द्रः	2.	उमेशः	3.	गुणोदयः
४.	सूर्योदयः	५.	अपोहः	६.	महोदधिः
७.	वर्षर्तुः				

१८. नाटकशिक्षणम्

सर्वेन्द्रियाणां नयनं प्रधानम्।

इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्।

संस्कृतसाहित्ये वैदिकयुगात् नाटकानां परम्परा विद्यते। ऋग्वेदीयसूक्तेषु विद्यमानं सोमविक्रयणसामयिकस्य अभिनयस्य वर्णनं दृश्यकाव्यस्य सद्भावं प्रथयति। तथा च यम-यमीसंवादोऽपि नाटकस्यास्तित्वं कथयति। संहिताब्राह्मणग्रन्थयोः शैलश्शब्दस्य प्रयोगः रूपकस्य अस्तित्वं प्रमाणयति। गानप्रधाने सामवेदे संवादभूयिष्ठाः मन्त्राः उपलभ्यन्ते। उक्तं हि नाटकान्तम् हि साहित्यम् इति। लोके विद्यमानानां इतिवृत्तानां घटनानां वा चित्रणमेव नाटकम्। अत एव महाकविना कालिदासेन उक्तम् "नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्"॥

पञ्चमो वेदः-भरतमुनिः नाट्यशास्त्रं पञ्चमवेदतया पर्यगणयत्। यथा—

धर्म्यं यशस्यमायुष्यं सोपदेश्यं ससङ्ग्रहम्।
भविष्यतश्च लोकस्य सर्वकर्मानुदेशकम्॥
सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रवर्त्तकम्।
नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम्॥

संस्कृतसाहित्यं सर्वं द्विधा विभक्तम्। १. श्रव्यम् २. दृश्यम्।

नाट्यम्- अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते।
रूपकं तत्समारोपाद् दशधैव रसाश्रयम्॥

दशरूपकाणि— नाटकं सप्रकरणं भाणः प्रहसनं डिमः।
व्यायोगसमवकारौ वीथ्यङ्केहामृगा दश॥

नाटकस्य कथावस्तु-नाटकस्य इतिवृत्तं त्रिविधं भवति।

१. प्रख्यातम् २. उत्पाद्यम् ३. मिश्रम्।

नायकाः-धीरोदात्तः- रामयुधिष्ठिरादयः धीरशान्तः-चारुदत्तः धीरोद्धतः-भीमः धीरललितः - दुष्यन्तः।

नाटककाराः

१. अश्वघोषः—शारिपुत्रप्रकरणनामके अस्मिन् नाटके ६ अङ्काः सन्ति। अत्र शारिपुत्राय मौद्गल्यायनेन विहितं बुद्धोपदेशं वर्णितम्।

२. कालिदासः—कालिदासस्य त्रीणि रूपकाणि अति प्रसिद्धानि। तानि-अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयं च। उत्तमनाटकस्य कथोपकथन-चरित्रचित्रण-प्रकृतिवर्णन-रससृट्यादीनि यानि लक्षणानि अपेक्षितानि सन्ति, तेषां सर्वेषां समायोजनेन इदं नाटकम् अतिप्रशंसाभाजनमभवत्।

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।
तत्रापि च चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम्॥

१. यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठस्तम्भितबाष्पवृत्तिकलुषश्चिन्ता जडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः।
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः॥

२. पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥

३. शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्त्तुर्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥

४. अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मनः
त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः॥

अत एव उक्तम्- वासन्तं कुसुमं फलञ्च युगपद्ग्रीष्मस्य सर्वं च यत्
यच्चान्यन्मनसो रसायनमतः सन्तर्पणं मोहनम्।
एकीभूतमभूतपूर्वमथवा सन्तर्पणं मोहनम्-
ऐश्वर्यं यदि वाञ्छसि प्रियसखे शाकुन्तलं सेव्यताम्॥

मालविकाग्निमित्रम्-विदर्भराजदुहितुः मालविकायाः मालवेन्द्रेण अग्निमित्रेण सह प्रणयस्य कथा मनोरञ्जकया शैल्या अत्र निबद्धा। इतिवृत्तं लौकिकं वर्तते। प्रसक्तानुप्रसक्ततया नाट्यशास्त्ररहस्यान्यपि प्रकटीकृतानि।

विक्रमोर्वशीयम्—कुबेरं समाराध्य प्रतिनिवृत्ताम् ऊर्वशीं केशिनामको राक्षसः बलात् अपहर्त्तुं प्रयतते। तदानीं राजा पुरूरवा तां तस्मात् राक्षसात् अरक्षत्। ततः द्वयोः परस्परम् अनुरक्तौ सञ्जातौ। अत्र नाटके सर्वाणि पात्राणि दिव्यानि एव सन्ति।

विशाखदत्तः— मुद्राराक्षसं नाटकं, शृङ्गारकथां विनापि नाटकमिदम् अलौकिकेन सरसत्वेन सर्वान् आप्याययति। ओजोगुणभूयिष्ठमिदं च नाटकं सामाजिकमनोरञ्जनाय समर्थं वर्त्तते। इदमप्येकं विशिष्टमत्र विद्यते यत् स्त्रीपात्रं नास्ति। तथापीदं सरसं जातम्। एतत्सर्वं विशाखदत्तस्य काव्यकलाप्रावीण्येन सिद्धमिति निश्चप्रचम्। मुद्रया गृहीतो राक्षसः यत्रेति तन्मुद्राराक्षसमिति व्युत्पत्या मुद्राप्रवर्त्तको चाणक्य एवात्र नायकः। अत्र शैली विलक्षणा, अलङ्काराणां प्रयोगश्च अत्यन्तहृद्याः। आदावेव—

आस्वादितद्विरदशोणितशोणशोभां को हर्त्तुमिच्छति हरेः परिभूय दंष्ट्राम्॥

जृम्भाविदारितमुखस्य मुखात्स्फुरन्तीं को हर्त्तुमिच्छति हरेः परिभूय दंष्ट्राम्॥

भवभूतिः-कवेरस्य नाटकत्रयमिदानीमुपलभ्यमानं वर्त्तते।

महावीरचरितम्—रामायणान्तर्गतां रावणवधान्तां कथामाश्रित्येदं नाटकं विरिचितम्। कथाकथनदृष्ट्या नाटकमिदं नितान्तं रमणीयं वर्त्तते। अत्र तदानींतनराजनीतेः विवेचनमतिविस्तृतया कृतम्।

मालतीमाधवम्-दशभिः अङ्कैः विरचितमिदं प्रकरणम् मालतीमाधवयोः प्रेमातिशयत्वं हृद्यङ्गमतया वर्णितम्। ओजोगुणभूयिष्ठं गद्यमत्र बहुधा उपयुज्य रीतिसम्प्रदायस्य अनुसरणं चकार। यद्यपि प्रकरणेऽस्मिन् हास्यस्य अभावः विद्यते तथापि पाठकाः जामितां नानुभवन्ति।

उत्तररामचरितम् - उत्तरे रामचरिते भवभूतिविशिष्यते इत्युक्त्या एव अस्य नाटकस्य प्रतिष्ठां ज्ञातुं प्रभवामः। करुणरसप्रधानं नाटकमिदं मनोज्ञैः प्राकृतिकवर्णनैः सर्वेषां मनांसि सुतरां रञ्जयति। यथा—

निष्कूजिस्तिमिताः क्वचित्क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः
स्वेच्छासुप्तगभीरभोगभुजगश्वासप्रदीप्ताग्नयः।
सीमानः प्रदरोदरेषु विलसत्स्वल्पाम्भसो या स्वयं
तृष्यद्भिः प्रतिसूर्यकैरजगरस्वदेद्रवः पीयते॥

भवभूतिः सरलानां सरसानां मर्मप्रकाशकानां पद्यानां निर्माणे अतीव कुशल इति अनेन ज्ञायते।

किमपि किमपि मन्दं मन्दमासक्तियोगा-
दविरलितकपोलं जल्पतोरक्रमेण।
अशिथिलपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेवं व्यरंसीत्।

अत एवोच्यते—"भवभूतेः शिखरिणी निरर्गलतरङ्गिणी" इति।

हर्षनृपतिः—अस्य कवेः रूपकत्रयं विद्यते।

१. **रत्नावलीः**—उदयनसागरकियोः प्रणयनमाधारीकृत्य ग्रथितोऽयं रूपक-विशेषः। रत्नावली, सागरिकानाम्ना उदयनराजभवनं प्रविश्य महिष्याः वासवदत्तायाः दासी सञ्जाता। ततः उदयसागरिकयोः परस्परानुरागं विज्ञाय, वासवदत्ता स्वसुखं परित्यज्य तयोर्विवाहं कारयति।

२. **प्रियदर्शिका**-उदयनारण्यिकयोः प्रणयकथा वर्णिता। अङ्गराजस्य सुता प्रियदर्शिका उदयनस्य वाग्दत्ता वधूः आसीत्। तयोर्विवाहात्पूर्वमेव अङ्गदेशस्य राजा दृढवर्मा कलिङ्गराजेन बन्दीकृतः। अनेन कारणेन प्रियदर्शिका आरण्यिकेति नाम्ना उदयनराजभवनम् आगत्य राज्ञा परिणीता।

३. **नागानन्दम्**—जीमूतवाहनस्य यशोगानेन निबद्धमिदं नाटकम्। अत्र पञ्चाङ्काः सन्ति। बौद्धहिन्दूधर्मयोः अतिसुन्दरं वर्णनमत्र उपलभ्यते। हर्षस्य शैली सरला, सुबोधा च वर्त्तते। वर्णनानि अतिमनोहराणि, हृद्यङ्गमानि च। दिङ्मात्रमत्र उदाह्रियते—

किं पद्मस्य रुचिं न हन्ति नयनानन्दं विधत्ते न किं
वृद्धिं वा झषकेतनस्य तनुते नालोकमात्रेण किम्।
वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरुज्जृम्भते
दर्पः स्यादमृतेन चेदिह तदप्यस्त्येव बिम्बाधरे॥

भट्टनारायणः-वेणीसंहारम्-

इदं नाटकं महाभारतीयकथामाश्रित्य रचितम्। दुश्शासनेन अपमानिता द्रौपदी घोरां प्रतिज्ञाम् अकरोत् यत् दुश्शासनस्य मरणात्परमेव अहं केशसंयमनं करोमि इति। अस्या घटनायाः आधारेणैव इदं नाटकं रचितम्। पात्रनिर्मणकौशलमेव नाटकस्य प्रसिद्ध्यै मूलकारणं वर्त्तते। विशिष्य भीमसेनस्य पात्रचित्रणम् व्यापकतया सम्पादितम्। वीररसप्रधानं नाटकमिदम्। वीररसवर्णने कविः सिद्धहस्तः। यथा—

चञ्चद्भुजभ्रमितचण्डगदाभिघातनिष्पीडितोरुयुगलस्य सुयोधनस्य।
स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि भीमः॥

शुद्रकः - मृच्छकटिकम्-

रूपकेऽस्मिन् चारुदत्तवसन्तसेनयोः प्रणयकथाचित्रणं सरसं, मनोज्ञं च कृतम्। अपि च तात्कालिकसामाजिकचित्रणमपि सुष्ठु प्रतिपादितम्। दशाङ्काः सन्ति। उज्जयिन्या वेश्या वसन्तसेना नायिकाऽत्र। एवं चारुदत्त-शकार-धूतादि पात्राणां साधु सम्पादितम्। परं सर्वाणि स्वकपोलकल्पितानि। शूद्रकस्य शैली सरलतमा, नवानां

भावानाम् प्रकाशने कुशलोऽयं कविः। राजन्यायभवनवर्णनपरं पद्यमिदं नितान्तहृद्यम्।

चिन्तासक्तनिमग्नमन्त्रिसलिलं दूतोर्मिशङ्काकुलं
पर्यन्तस्थितचारुनक्रमकरं नागाश्वहिंस्राश्रयम्।
नानावाशककङ्कपक्षिरुचिरं कायस्थसर्पास्पदं
नीतिक्षुण्णतटं च राजकरणं हिंस्रैः समुद्रायते॥

भासः—

महाकविभासस्य त्रयोदशरूपकाणि प्रसिद्धानि। यथा—प्रतिज्ञायौगन्धरायणम्, अविमारकम्, स्वप्नवासवदत्तम्, प्रतिमानाटकम्, अभिषेकनाटकम्, मध्यमव्यायोगः, पञ्चरात्रम्, दूतवाक्यम्, दूतघटोत्कचम्, कर्णभारः, उरुभङ्गम्, बालचरितम्, दरिद्रचारुदत्तम् चेति॥

नाटकशिक्षणस्य उद्देश्यानि

भरतमुनिना स्वीये नाट्यशास्त्रग्रन्थे नाटकस्य त्रीणि उद्देश्यानि प्रतिपादितानि।

१. हितोपजननम् – व्यक्तेः समाजस्य च कल्याणार्थम् उपदेशप्रदानम्।

२. विश्रान्तिजननम् – व्यक्तेः समाजस्य च शान्तिप्रदानम्।

३. विनोदजननम् – व्यक्तेः, समाजस्य च मनोरञ्जनम्।

माध्यमिकस्तरे पाठ्यग्रन्थेषु प्रायः केचन पाठाः संवादात्मकपाठाः भवन्ति। संवादात्मकपाठानामपि पाठनं नाटकशिक्षणमिव भवति।

- संस्कृतरूपकाणां परिचयः।
- छात्रेभ्यः उचितारोह-अवरोहेण तथा भावपुरस्सरं च संवादकरणे ज्ञानप्रदानम्।
- छात्रेभ्यः अभिनयकलायाः परिचयप्रदानम्।
- छात्रेभ्यः विविधसन्दर्भेषु उचितमानवीयव्यवहारस्य परिचयः।
- छात्रेभ्यः मानवस्वभावस्य, मानवचरित्रस्य परिचयप्रदानम्।
- छात्रेभ्यः भाषाज्ञानस्य अभिवृद्धिसम्पादनम्।
- छात्राणां चिन्तनाशक्तेः क्षमतासम्पादनम्।
- प्रश्नोत्तरे, वार्त्तालापे, भाषणे, कथोपकथने च प्रभावोत्पादकरीत्या भावव्यक्तीकरणशक्तेः वर्धनम्।

शिक्षणविधयः

नाटकस्य वा संवादस्य वा शिक्षणाय त्रयः विधयः प्राधान्येन सन्ति।

अभिनयः—

भवेदभिनयोऽवस्थानुकारः स चतुर्विधः।

अवस्थानुकारस्य अयमर्थः यत् रामयुधिष्ठिरादिभिस्सह तादात्म्यापत्तिः। अस्याः तादात्त्तयापत्तेः अङ्ग-वाणी-वेश-सत्त्वरूपम् अभिनयचतुष्टयं साधनं भवति।

अभिपूर्वस्तु णीञ् धातुराभिमुख्यार्थनिर्णये।
यस्मात् पदार्थान्नयति तस्मादभिनयः स्मृतः॥
विभावयति यस्माच्च नानार्थान् हि प्रयोगतः।
शाखाङ्गोपाङ्गसंयुक्तस्तस्मादभिनयः स्मृतः॥

अभिनयः चतुर्विधः-

(क) आङ्गिकाभिनयः—

नटः, स्वशिरः-हस्त-उरः स्थल-पार्श्व-कटि-पादैः षडङ्गैः, नेत्र-भ्रुकुटि-नासिका-अधर-कपोल-चिबुकैः उपाङ्गैः च रामादिभिस्सह तादात्म्यस्थितेः, अभेदस्य वा अनुसन्धानं करोति।

(ख) वाचिकाभिनयः—

रामानुषङ्गि यद् वाक्यं नाट्ये तद् वाचिकं स्मृतम्।

नटः रसोचितराग-लयादिसमन्वितवाण्या रामादिभिस्सह तादात्म्यारोपणेन सहृदयहृदयेषु विभावादिभावान् अभिव्यञ्जयति।

(ग) आहार्याभिनयः—

आहार्याभिनयो नाट्योचितालङ्कारधारणम्।

नटः वेशभूषैः रामादिभिस्सह तादात्म्यारोपणेन सामाजिकानाम् अभिव्यञ्जनं करोति।

(घ) सात्त्विकाभिनयः

सत्त्वं नाम मनः प्रभवम्। स तु समाहितमनस्त्वादुत्पद्यते। मनः समाधानाच्च सद्यो निर्वृतिरिति। सत्त्वस्य स्वभावः रोमाञ्चाश्वादिकृतः। लोकस्वभावानुकरणाच्च नाट्यस्य सत्त्वमीप्सितम्।

स्तम्भस्वेदादीनां प्रदर्शनेन नटे रामादीनां तादात्म्यारोपस्य सम्पन्नताया अभिप्रायो भवति।

१. आदर्शनाट्यविधिः (पठनपद्धतिः)-

अध्यापकः स्वयमेव कक्ष्यायां पाठस्य एवं पठनं करोति येन पठनेन पाठे विद्यमानानां पात्राणां स्वभावं तथा चरित्रं च सम्यक् अवगन्तुं समर्था भवन्ति छात्राः।

अध्यापकः वाचिकाभिनयद्वारा पाठस्य पठनं करोति। परं तु अयं विधिः अवैज्ञानिको वर्त्तते। कुत इति चेत् अस्मिन् विधौ छात्राणाम् अवधानं शिक्षकस्य अभिनयपूर्वकपठने एव भवति। न तु नाटकगतानां भावानां च अवगमने भवति। अपि च नाटकशिक्षणस्य सर्वेषाम् उद्देश्यानां पूरणं न भवति। अतः अयं विधिः असमर्थः।

२. अभिनयविधिः (प्रयोगपद्धतिः)—

अस्मिन् विधौ वास्तविकाभिनयद्वारा नाटकस्य, संवादस्य वा शिक्षणं भवति। अत्र अभिनयः द्विप्रकारको भवति।

(क) रङ्गमञ्चविधिः—

रङ्गमञ्चस्य उपरि नाटकप्रदर्शनं विधिविधानपूर्वकं भवति। तेन नाटके पात्राणां दृश्यानां च पूर्णपरिचयः छात्राणां भवितुमर्हति। परं तु अत्र कालः, धनं, शक्तिश्च बहु अपेक्षन्ते।

(ख) कक्षाभिनयविधिः-

अध्यापकः कक्ष्यायामेव छात्रैः पाठस्य अभिनयं कारयति। अत्र छात्राः वेषभूषादिविषयेषु ध्यानं न ददाति। केवलम् पात्रोचितम् अभिनयं कुर्वन्ति। रङ्गमञ्चस्य आवश्यकता नास्ति। वेषभूषादीनाम् अवसरोऽपि कक्षापाठने न भवति। अयं विधिः कक्षापाठने अत्यन्तोपयोगी वर्तते। नाटकस्य संवादस्य वा पाठस्य शिक्षणावसरे यथासम्भवं प्रयोगः करणीयः। अत्र न रङ्गमञ्चस्य, न वा धनस्य अपेक्षा अस्ति। केवलं कालांशस्य समये एव पाठयितुं शक्नुमः।

३. व्याख्याविधिः-

अस्मिन् विधौ अध्यापकः उपयुक्तप्रश्नानां माध्यमेन पात्राणां चरित्रस्य, पाठगतभावानां विश्लेषणं च करोति। कुत्रचित् काठिन्यं भवति अध्यापकः स्वयं तन्निवारयति। अस्य विधेः माध्यमेन नाटकशिक्षणं गद्यशिक्षणवद्भवति। उपर्युक्तानां त्रयाणां विधीनां परिशीलनेन इदं ज्ञायते यत् एते त्रयः विधयः नाटकशिक्षणे उपयुक्ताः न भवन्ति। यतो हि नाटके न केवलं गद्यम्, न वा पद्यम्, उभयमपि तत्र भवति। तर्हि उभयस्यापि शिक्षणं भवेत्। तदर्थम् अनुकूलो विधिरपि भवेत्। अस्मिन् विधौ एवं प्रकारैः सोपानैः नाटकशिक्षणं करणीयम्। यथा—

(क) सामान्यपरिचयः— अध्यापकः कविविषये, नाटकविषये च सामान्यपरिचयं ददाति।

(ख) विषयोपस्थानम्- प्रायः पाठः नाटकस्य एकः भागः भवति। साक्षात् पाठने प्रविशति, छात्राणां पूर्वापरज्ञानपरीक्षणं न भवति। अतः अध्यापकः पाठगतनाटकांशस्य परिचयपूर्वकं विषयोपस्थापनं करोति।

(ग) **संक्षिप्तव्याख्या**—समासपदानां विग्रहवाक्यानि उक्त्वा व्याख्यां करोति। सन्धिपदानां पदच्छेदं करोति। भावविश्लेषणं करोति। चरित्रचित्रणसम्बद्धप्रश्नान् पृच्छति।

(घ) **पाठाभिनयः**—छात्रैः वाचकाभिनयमाध्यमेन सम्पूर्णपाठं वाचयति। अध्यापकः केवलम् अत्र निर्देशको भवति। एकैकः छात्रः पाठे विद्यमानानि पात्राणि एकैकं स्वीकरोति। किन्तु अत्र आङ्गिकाभिनयस्य आवश्यकता नास्ति।

नाटकपाठयोजनायाः प्रारूपम्

- प्रस्तावना
- उद्देश्यकथनम्
- विषयोपस्थानम्
- आदर्शवाचनम्
- अनुवाचनम्
- काठिन्यनिवारणम्
- बोधप्रश्नाः
- संक्षिप्तव्याख्या
- भावविश्लेषण – चरित्रचित्रणसम्बद्धप्रश्नाः
- अध्यापककथनम्
- पाठाभिनयवाचनम्
- पुनरावृत्तिप्रश्नाः
- गृहकार्यम्

❑

१९. रचनाशिक्षणम्

विचाराणां, भावानां च अभिव्यक्तीकरणाय द्वे उपाये भवतः। मौखिकः लिखितश्च। तत्र मौखिकाभिव्यक्तिः सहजा। सर्वप्रथमं बालकः स्वमातृभाषायाः माध्यमेन भावाभिव्यक्तीकरणं करोति। संस्कृतभाषायां मौखिकरूपेण भावाभिव्यक्तिः नैसर्गिकतया न भवति। तदर्थम् अध्ययनात्मकशक्तेः आवश्यकता वर्त्तते। उच्चस्तरे मौखिकरचना लिखितरचना च भवतः। परं माध्यमिकस्तरे तावत् छात्राः मौखिक-लिखितरूपभावाभिव्यक्तीकरणे समर्था भवेयुः इत्याशयः।

१. लिखितरचना—लिखितरचनायाः स्थायी मौखिकरचनापेक्षया अधिकः स्यात्। लिखितरचनायां चिन्तनस्य, विचारणस्य च समयः मिलति। व्याकरणदृष्ट्या अपि लेखनानन्तरं पुनः एकवारं पठितुमपि अवकाशः वर्त्तते। लिखितरचना शाश्वती भवति।

२. मौखिकरचना—मौखिकरचना तात्कालिकी। मौखिकरचना तथा लिखितरचना च एकस्मिन् समये एव पाठनीये। पृथक्तया पाठनं समीचीनं न भवति। किमिति चेत् उभयविधरचनाप्रकारः परम्पराश्रितः भवति। मौखिकाभिव्यक्तौ दक्षतां विना लिखितरचनायां कुशलो भवति। लिखितरूपभावानां पठनेन, परिशीलनेनैव मौखिकभावाभिव्यक्तिः क्रमेण स्पष्टतया भवति।

रचनाशिक्षणस्य उद्देश्यानि

१. छात्रेभ्यः सरलभाषायां शुद्धभाषायां स्वकीयानां भावानां व्यक्तीकरणाय अवसरप्रदानम्।

२. प्रश्नानाम् उत्तराणि पूर्णवाक्येषु प्रदानाय क्षमतासम्पादनम्।

३. भाषणे सूक्तीनां प्रयोगे अभ्यासप्रदानम्।

४. वार्त्तालापद्वारा विभिन्नसमयेषु अनुकूलभाषायाः प्रयोगकरणे सामर्थ्यसम्पादनम्।

५. यस्य कस्यापि विषयस्य उपरि दशवाक्यानि यावत् लेखने अभ्यासप्रदानम्।

६. दिनचर्यावर्णने क्षमतोत्पादनम्।

७. जीवनचरितलेखने प्रोत्साहप्रदानपूर्वकयोग्यताविकासः।

८. संवादे, तस्य लेखने क्षमतायाः अभ्यासः।

९. पत्रलेखने सामर्थ्यसम्पादनम्।

(अ) प्रारम्भिकस्तरे रचनाकार्यम्—

संस्कृतशिक्षणस्य कृते प्राथमिकस्तरः इत्युक्ते ६, ७, ८ कक्षाः इति वयं जानीमः। अस्मिन् स्तरे रचनाकार्यस्य प्रभावः अत्यधिको भवति। यतोहि अस्मिन् स्तरे छात्राणां भाषाज्ञानमपि न्यूनमेव भवति।

रचनाक्षमतोत्पादनाय केचन उपायाः—

(क) चित्राणां माध्यमेन प्रश्नकरणम्—अध्यापकः पुष्पस्य वा, विद्यालयस्य वा अन्यस्य कस्यापि वस्तुनः प्रदर्शनं कृत्वा सरलप्रश्नान् पृच्छति। छात्रान् सरलवाक्येषु उत्तरप्रदानाय प्रेरयति।

(ख) रिक्तस्थानपूरणम्—वाक्ये एकैकं पदं त्यक्त्वा वाक्यं निर्माति। छात्राः तद् रिक्तं स्थानं पूरयन्ति।

(ग) उपयुक्तशब्दग्रहणम्—अध्यापकः एकं वाक्यं लिखति। तत्र एकस्य शब्दस्य स्थानं त्यक्त्वा कोष्ठके उचितशब्देन सह अन्यशब्दानपि ददाति। छात्रेण उचितः शब्दः ग्राह्यो भवति।

(घ) वाक्यप्रयोगः—विशेषशब्दान् दत्त्वा तान् शब्दान् स्ववाक्येषु योजयित्वा वाक्यरचनां कर्तुं प्रोत्सहते। पाठ्यपुस्तके विद्यमानानां पदानामाधारेण सूक्तिवाक्यनिर्माणाय सूक्तीनां संग्रहणाय वा प्रेरयति।

(ङ) प्रश्नानाम् उत्तरलेखनम्—कांश्चन प्रश्नान् दत्त्वा उत्तरलेखनाय आदिशति।

(च) शब्दपरिवर्तनम्—वाक्यानि दत्त्वा तत्र शब्दपरिवर्तनाय निर्दिशति।

(छ) उत्तराणां प्रश्नलेखनम्—अध्यापकः उत्तरवाक्यानि दत्त्वा तत्तद्वाक्यानाम् आधारेण प्रश्नान् पृच्छति। एषोऽपि एकः उत्तमः उपायः रचनाकौशलसम्पादनाय।

(आ) माध्यमिकस्तरे रचनाकार्यम्—

विभक्तिप्रत्ययादीनां परिवर्त्तनद्वारा नूतनशब्दरचना। ततः वाक्यनिर्माणम्। उपसर्गाणां प्रयोगद्वारा शब्दप्रयोगस्य अभ्यासः वार्त्तालापलेखनम्। पत्रलेखनम्। दत्तस्य विषयस्य उपरि अनुच्छेदानां लेखनम्। संक्षेपलेखनम्–अनुच्छेदान् दत्त्वा तस्य भावस्य संक्षेपेण लेखनम्।

रचनाशिक्षणे मुख्यविषयाः

१. अधिकाधिकतया रचनाकार्यं सर्वं कक्ष्यायामेव भवेत्।

२. शब्दरचना, वाक्यरचना, तदनन्तरं लिखितरचना इति क्रमेण रचनाकार्यस्य अभ्यासः करणीयः। तेन लिखितरचनाकार्ये दोषा न्यूना भवति।

३. उत्तमानाम् आदर्शरचनानाम् उदाहरणपूर्वकं प्रस्तावः क्रियते चेत् तद्गत–रचनायाः महान् प्रभावः पतति।

४. रचनायां स्वाभाविकतासम्पादनाय कक्ष्यापरिसरे, वातावरणे वा रचनाकार्याभ्यासः करणीयः।

५. अध्यापकेन योग्यसामग्र्याः प्रयोगः करणीयः, येन छात्राः प्रेरणां प्राप्नुयुः।

६. अध्यापकः भाषाशुद्धतायां, शब्दसंगठने, क्रमबद्धतायां च विशेषध्यानं दद्यात्।

७. सामान्यतया अध्यापकेन रचनाशिक्षणविषये पाठ्यपुस्तकमेव अधिकतया उपयोक्तव्यम्।

अधोदत्तचित्रमाधारीकृत्य संस्कृते दशवाक्यानि रचयत—



रचनापाठयोजनायाः सोपानानि

प्रस्तावना	उद्देश्यकथनम्
विषयोपस्थापनम्	रचनासंशोधनम्
अध्यापककथनम्	कक्ष्याकार्यम्
पुनः संशोधनम्	गृहकार्यम्

❑

२०. अनुवादशिक्षणम्

अनुवादस्य निर्वचनम्

उद्देश्यानि

१. छात्राणां संस्कृतभाषायाः माध्यमेन विचाराणाम् आदानप्रदानाय योग्यतासम्पादनम्।

२. विभिन्नभाषासु विद्यमानानां साहित्यांशानामुपरि ज्ञानप्रदानम्।

३. छात्रेभ्यः मातृभाषायाम् अथवा अन्यभाषायाम् अभिव्यक्तीकरणशैल्याः परिचयः।

४. अन्येषां विचारान्, भाषां,शैलीं च ज्ञात्वा संस्कृतभाषायाम् अनुवादकरणस्य क्षमतोत्पादनम्।

५. आधुनिकासु अन्यभाषासु अभिव्यक्तानां विचाराणां संस्कृतभाषायाम् अभिव्यक्तीकरणाय अवसरप्रदानम्।

६. संस्कृतसाहित्यस्य आधुनिकविचारैः पुष्टीकरणम्।

अनुवादस्य स्वरूपम्

सामान्यतः अनुवादः त्रिप्रकारकः।

अक्षरानुवादः

अस्यैव शब्दानुवाद इति नाम। अस्मिन् अनुवादप्रकारे एकस्यां भाषायां विद्यमानानां पदानां स्थाने संस्कृतभाषायां समानार्थकपदानां प्रयोगः भवतीति हेतोः (अक्षरशः अनुवादः) शब्दानुवादः इत्युच्यते। अत्र अक्षराणां शब्दानां वा महत्त्वम् अधिकं विद्यते। अक्षरशः वा शब्दशः अनुवादः मक्षिकास्थाने मक्षिकास्थापनमिव। सैन्धवमानय इति वाक्यस्य अनुवादः लवणमानय वा अश्वमानय वेति कर्तुं पारयामः। कदाचित् युद्धसमये यदि लवणमानय इति अनुवादं करोति तर्हि महान् अनर्थः आपतति। यथा—

द्विदलम् - दाल	माषः - उड़द	सर्षपः - सरसो
कलायः - मटर	आसन्दिका - कुर्सी	पल्यङ्कः - पलंग
मञ्जूषा - सन्दूक	तृणम् - फूस	दारु - लकड़ी
गवाक्षः - खिडकी	कीरः - तोता	षट्पदः - भौंरा
बर्ही - मोर	खरः - गदहा	मेषः - भेड
स्थाली - पतेली	एकादशी - ग्यारसी	श्वा - कुत्ता

अत्र शब्दानां साक्षात् अनुवादः अन्यस्यां भाषायां भवति।

छायानुवादः

एतस्य अनुवादस्य शैली भिन्ना अस्ति। अत्र एकस्यां भाषायां विद्यमानम् अनुच्छेदं पठित्वा, सारं ज्ञात्वा, ततः अन्यभाषायाम्, अनुवादः करणीयो भवति। अत एव भावाभिव्यक्तिविषये अधिकं बलं दीयते। परं मूलपाठस्य सारमेव स्वीक्रियते। अस्य अपरं नाम अस्ति - निष्कर्षानुवादः। अस्मिन् अनुवादप्रकारे अयमेव दोषः यत् भाषा तथा शैली च उपेक्षिते भवतः। अस्यैव मर्मानुवादः इत्यपरं नाम।

यथा—

संस्कृतात् हिन्दी-

संगच्छध्वम् संवदध्वम् – मिलकर चलो, मिलकर बोलो।

दिवं विगाहते – आकाश में घूमता है।

तेजसां हि वयः न समीक्ष्यते – तेजस्वियों की आयु नहीं देखती जाती है।

भुवि पप्रथे – संसार में प्रसिद्ध हुआ।

अविवेकः परमापदां पदम् – अविवेक बड़ी आपत्तियों की घर है।

अङ्गीकृतं सुकृतिनः परिपालयिन्त – श्रेष्ठजन अङ्गीकृत वचन को पूरा करते हैं।

सीदति मे हृदयम् – मेरा हृदय बैठा जाता है।

कष्टः खलु पराश्रयः – दूसरों का भरोसा दुःखदायक है।

हिन्दीभाषायाः संस्कृतम्-

अंगूर खट्टे हैं – आलस्यं हीनमुच्यते।

आम के आम गुठलियों के दाम – एकक्रिया द्व्यर्थकरी प्रसिद्धा।

अपनी करनी पर उतरनी – कृत्यैः स्वकीयैः खलु सिद्धिलाभः।

एक अनार सौ बीमार – एकः कपोतपोतः श्येनाः शतशोऽभिधावन्ति।

मन चंगा तो कठौती में गंगा – जिते चित्ते जितं जगत्।

बन्दर क्या जाने अदरक का स्वाद – किमिष्टमन्नं खरसूकराणाम्।

आङ्गलात् संस्कृतम्—

सः मित्रं यः व्यसने स्यात् – A friend in need is a friend indeed.

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः – Diligence is the mother of goodluck.

महाजनो येन गतः स पन्थाः – Do what the greatmen do.

अल्पविद्या बहुभयङ्करी – Half knowledge is most dangerous.

स खलः करोति दुर्वृत्तं तद्धि फलति साधुषु - Wicked persons commit fault and goodmen suffer.

भिन्नरुचिर्लोकः - Men differ by nature.

प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् - Prevention is better than cure.

भावानुवादः

अत्र शब्दानां स्थाने केवलं शब्दानां स्थापनं वा अथवा केवलं सारांशस्य अनुवादो वा न क्रियते। मातृभाषायां अन्यभाषायां वा व्यक्तीकृतानां भावानां, तेषां तथ्यानां वा अनुवादः क्रियते। मूलपाठस्य प्रधानभावः अत्र अनुवादे प्रतिफलति। तदर्थं अनुवादकेन प्रयत्नः विधेयः। अर्थात् मूलपाठस्य, भावस्य तथा शैल्याश्च निर्वहणं भवति।

अनुवादशिक्षणस्य विधयः—

१. **पुस्तकविधिः**—अस्मिन् विधौ पुस्तकानां माध्यमेन अनुवादस्य शिक्षणं दीयते। अतः अनुवादस्य एव एतादृशानां पुस्तकानां निर्माणं कुर्वन्ति। व्याकरणक्रममाश्रित्य मातृभाषायां वाक्यानि लिखितानि स्युः। समानप्रकारकाणां वाक्यानां चयनं भवति। तेषाम् अनुवादः संस्कृतभाषायां कृतो विद्यते। प्रथमं सरलसरलवाक्यानामनुवादः, तत्पश्चात् संयुक्तवाक्यानाम् अनुवादः करणीयः।

२. **द्विभाषाविधिः**-इयं पद्धतिः प्रायः सभासु, आयोजनेषु वा उपयुज्यते। अत्र एका व्यक्तिः स्वमातृभाषायां कथयति। अन्या व्यक्तिः, तस्य अनुवादं संस्कृतभाषायां वदति। महापुरुषाणां भाषणसन्दर्भेऽपि एकैकस्य वाक्यस्य कथनानन्तरं तस्य वाक्यस्य अनुवादः करोति कश्चन अनुवादकः। कक्ष्यायामपि अनेन प्रकारेण कर्तुम् कारयितुं च अध्यापकः समर्थो भवति। एकः छात्रः अनुच्छेदे विद्यमानानां वाक्यानां एकैकशः वाक्यानि पठति। अन्यः छात्रः तस्य वाक्यस्य अनुवादं संस्कृतभाषायां करोति। अयं विधिः संस्कृतभाषाव्यवहारे छात्रेभ्यः प्रेरणां दास्यति। अपि च भाषासौष्ठवं च परिचयं करोति।

३. **तुलना-अनुकरणविधिः**—अस्यां पद्धतौ प्रथमम् आदर्शानुवादं करोति। आदर्शानुवादस्य प्रभावः नितरां छात्रेषु पतत्येव। ततः छात्राणाम् अनुवादाभ्यासाय मातृभाषायाः कश्चन परिच्छेदः दीयते। अध्यापकेन कृतया आदर्शानुवादशैल्या विश्लेषणं कृत्वा, मातृभाषायां तुलनां च कृत्वा तस्य अनुवादं कुर्वन्ति।

अनुवादे अवधेयाः अंशाः

१. अनुवादस्य कार्यं छात्रस्तरानुकूलं भवेत्।

२. तुलनात्मकशक्तेः विकासाय अवसरः प्रदातव्यः।

३. अनुवादकर्मणि कुशलताप्राप्तये अभ्यासः कारणीयः।

४. मूलभाषायाः, शैल्याश्च संरक्षणं करणीयम्।

५. अनुवादे सरलता तथा सुबोधता च अवश्यं भवेताम्।

६. मूलभाषायां तथा अनुवादभाषायां च सहजतया ज्ञानम् अत्यावश्यकम्।

७. अनुवादकार्ये व्याकरणस्य ज्ञानमत्यन्तम् आवश्यकम्।

८. छात्रैः कृतस्य अनुवादकार्यस्य संशोधनम्, अवश्यं करणीयम्।

९. यथाशक्ति कर्तृप्रयोगाः करणीयाः।

१०. मूलभावस्य, कविहृदस्य भङ्गो न भवेत्।

अनुवादे कण्ठस्थीकरणाय प्राधान्यं नास्ति। शब्दरूपाणां, धातुरूपाणाम् च अभ्यासः सम्यक् करणीयः। वाक्यानां क्रमेऽपि कश्चनः क्रमः अनुसरणीयः। प्रथमं सरलवाक्यानि ततः कठिनवाक्यानि इति क्रमः अनुसरणीयः। अनुवादः, सरलात् कठिनं प्रति इत्यादिशिक्षणसूत्राणां माध्यमेन भवति चेत्तदा छात्राणां महान् उपकारः भवति। एकवचनादि-अनुवादपाठनसमये एकवचनं, बहुवचनं, द्विवचनमिति क्रमः स्वीकरणीयः। तथैव कारकाणां पाठने अयं क्रमः योग्यः। यथा-प्रथम, द्वितीया, षष्ठी, सप्तमी, तृतीया, पञ्चमी, चतुर्थी इति।

अनुवादपाठयोजनायाः सोपानानि

प्रस्तावना

विषयोपस्थापनम्

मौखिककार्यम्

संशोधनम्

गृहकार्यम्

❑

२१. कथाशिक्षणम्

स्फुरत्कलापविलासकोमला करोति रागं हृदि कौतुकाधिकम्।
रसेन शय्यां स्वयमभ्युंपागता कथा जनस्याभिनवा वधूरिव॥
हरन्ति कं नोज्ज्वलदीपकोपमैर्नवैः पदार्थैरुपपादिताः कथाः।
निरन्तरश्लेषघनाः सुजातयो महास्रजश्चम्पककुड्मलैरिव॥

अनायासेन अवगमने समर्था, श्रवणे मनोहरा, शृङ्गारादिरसेषु केनाप्येकेन रसेन संयुता कथा जनानां हृदयेषु नूनमुत्सुकतां जनयति। मधुरालापे समर्था, हावभावयोः उतमनोज्ञा युवतिः स्वभर्त्तुः हृदि प्रेम यथा उत्पादयति, तथैव अनायासेन अर्थदात्री, दीपकोपमाद्यलङ्कारैः भरिता, अपूर्ववस्तुनिष्ठा, सततं श्लेषालङ्कारेण सन्निविष्टा, मनोहरा प्रकाश्यमानदीपसमाना, अभिनववस्तुग्राह्या कथा च चम्पककुड्मलैः पुष्पैः च ग्रथिता महामाला इव समस्तहृदयाकर्षिणी भवति। **कथाच्छलेन बालानां नीतिस्तदिह कथ्यते।** कथामाध्यमेन बालानां नीतिशिक्षा भवति। संस्कृते कथायाः द्वौ प्रकारौ भवतः। मनोरञ्जनात्मककथाः, उपदेशात्मककथाश्च। तत्राद्यः प्रकारः, मानवकथाः मनोरञ्जनात्मकाः। यथा—

गुणाढ्यः–बृहत्कथा	बुद्धस्वामी–बृहत्कथाश्लोकसङ्ग्रहः
क्षेमेन्द्रः – बृहत्कथामञ्जरी	सोमदेवः – कथासरित्सागरः
अज्ञातकविः – सिंहासनद्वात्रिंशतिका	श्वेताम्बरजैनः – शुकसप्ततिः
आर्यसूरिः – जातकमाला	सिद्धर्षिः – उपमितिभवप्रपञ्चिकथा

द्वितीयः प्रकारः, पशुपक्षिकथाः–उपदेशात्मकाः। यथा–छान्दोग्योपनिषदि ऋषभहंसादिसकाशात् ब्रह्मज्ञानं लभमानस्य सत्यकामस्य इतिवृत्ते पशुपक्षिकथाबीजं दृश्यते। यथा—पञ्चतन्त्रम्। तन्त्रैः पञ्चभिरेतच्चकार सुमनोहरं शास्त्रम् पञ्चतन्त्रम् इति। नीतिशिक्षार्थं प्रवर्त्तितासु कथासु नीति–अर्थशास्त्राभ्यां विपुला सामग्री सङ्गृहीता।

मनवे वाचस्पतये शुकाय पराशराय ससुताय।
चाणक्याय च विदुषे नमोऽस्तु नयशास्त्रकर्त्तृभ्यः॥

कथाकथनस्य प्रमुखाङ्गानि

शिक्षणदृष्ट्या कथाः निम्नलिखितेष्वङ्गेषु विभक्ताः भवन्ति।

१. कथाचयनम् २. कथाशिक्षकस्य लक्षणानि ३. कथाशिक्षणपद्धतिः
४. छात्रैः कथावाचनम् ५. कथाभ्यासः

कथाचयनम्

तार्किकदृष्ट्या कथायाः चयनं आदौ करणीयम्। कथा छात्रस्तरानुकूला भवेत्। कथा अतिदीर्घा अतिलघ्वी वा न स्यात्। एकस्मिन् कालांशे यथा समाप्यते तथा कथा चेतव्या। अवशिष्टां कथां पुनः अन्यस्मिन् दिने कथापाठनं छात्राणां कौतूहलं नाशयति। अपि च छात्राणां शारीरिक-मानसिक-आयुः, प्रज्ञां, जीवनं च मनसि निधाय कथाः चयनीयाः। वर्तमानजीवनाधारिताः, रुचिपूर्णाः कथाः भवेयुः, याभिः छात्राः अधिकतया प्रेरणां प्राप्नुयुः। बालकथाः विशेषलाभदा भवन्ति। बालकेभ्यः पशुपक्ष्यादिकथाः अधिकं रोचन्ते। प्रायः बालका भावुका भवन्ति। तेषां कल्पनाशक्तिश्च अधिका। अनया दृष्ट्या कथायाः चयनं करणीयम्। अतः सुखान्तकथाः ग्राह्याः। बाल्ये दुःखान्तकथानां, नैराश्यपूर्णकथानां पाठनेन तेषां मनसि तादृशा एव भावा उत्पद्यन्ते ये भावि जीवने कुप्रभावं जनयन्ति। आनन्दान्तकथासु विद्यमानैः उदात्तभावैः जीवने पूर्णतामधिगच्छेयुः।

कथायाः भाषा

कथायाः भाषा सरला, प्रभावोत्पादिनी च स्यात्। कथायां भाषा यदि कठिना भवति, तर्हि छात्राणां कथास्वादनं कष्टतरं भवति। नूतनशब्दैः, लोकोक्तिभिस्समोपेता कथा छात्राणां भाषाज्ञानं वर्धयति। प्रसङ्गानुसारं सरलश्लोकान्, सुभाषितानि च समायोजयेत्।

अध्यापकस्य विशेषताः

कथायां स्वयं विश्वस्तः भवेत्। अभिनयपूर्वकं कथां श्रावयेत्। तदेकध्यानी, तादात्म्यः, दत्तचित्तः सन् छात्रः यथा कथां श्रुणुयात् तथा अध्यापकेन प्रयत्नः विधेयः। समुचितगत्या कथां कथयेत्। कथाकथनसमये अध्यापकः समुचितप्रदेशे, समुचितमुद्रायाम् तिष्ठेत्, येन छात्राः सर्वे अध्यापकं द्रष्टुं शक्नुयुः। आत्मविश्वासेन कथां कथयेत्। कथाकथने अध्यापकस्य सङ्कोचभावः छात्राणां मनोरञ्जने प्रतिबन्धकः भवति। प्रसङ्गानुसारं स्वरस्य उच्चावचं च करणीयम्।

शिक्षणक्रमः

सर्वप्रथमम् अध्यापकः समुचतिप्रस्तावनया कथाम् आरभेत्। कथायाः आदर्शवाचनं कुर्यात्। ततः छात्रैरपि आदर्शवाचनं कारयेत्। कथायां विद्यमानानां कठिनशब्दानामर्थबोधनं करणीयम्। नूतनशब्दपरिचयः करणीयः। कथासम्बद्धचित्राणाम् उपयोगः विधेयः। चित्राणां माध्यमेन प्रश्नान् प्रष्टुमर्हति येन छात्राः भावव्यक्तीकरणे दक्षा भवेयुः। तेषां परिशीलनाशक्तिः एधते।

यदि कथा बृहती भवति तर्हि भागशः पाठनीयः। प्रथमभागस्य पाठनावसरे अध्यापकः स्पष्टं, मन्दं, सरलं च पाठयति। द्वितीयभागस्य पाठनावसरे पाठितभागस्योपरि प्रश्नान् पृष्ट्वा अग्रे पाठयति। छात्राणामुत्तरैः सार्धं श्यामपट्टे सारमपि

लेखितुं प्रभवति। यदा कथायाः समाप्तिर्भवति तदा प्रश्नैः कथायाः पुनरावृत्तिः करयणीया।

छात्रैः कथाकथनम्

कथायाः श्रवणानन्तरं कथान्तर्गतघटनाक्रमस्य कथनम्। कथासम्बद्धचित्राणां निर्माणम्। कथायां प्रयुक्तविशिष्टनूतनपदानां लेखनम्। तेषां पदानामधारेण पुनः कथायाः लेखनम्। श्लोकबद्धकथां गद्यरूपे लेखनम्। कथायां विद्यमानानां पात्राणाम् अभिनयः। कथासारांशस्य प्रश्नकरणम्।



अभ्यासः-

उपरिदत्तस्य चित्रस्य आधारेण कथायाः रचनं कुरुत ?

२२. शिक्षणोपकरणानि

प्रो. जे. जे. देबर् महाशयः कथयति यत् "ज्ञानस्य ४० प्रतिशतं संकल्पनाः चाक्षुषेन्द्रियद्वारा, २५ प्रतिशतं श्रवणकौशलद्वारा १८ प्रतिशतं स्पर्शानुभवद्वारा प्राप्तिः भवति इति। प्रो. पी.जे. रूलोन् महाशयेन प्रमाणितं यत् दृश्यं-श्रव्योपकरणानां माध्यमेन ३८ प्रतिशतं स्मरणशक्तेः वृद्धिः भवति। पेरो. चार्टर् महोदयः स्वीयानुभवेन कथ्यते यत् चलचित्राणां माध्यमेन यत् ज्ञानं प्राप्यते तस्य स्मरणं (९० प्रतिशतं) षट् सप्ताहपर्यन्तं तिष्ठति।

शिक्षणोपकरणानि द्विप्रकारकाणि—

(१) सामान्यानि—श्यामफलकम्। सुधाखण्डः। मार्जनी। सूचीदण्डः। पाठ्यपुस्तकम्।

(२) विशिष्टानि—(१) श्रव्योपकरणानि (२) दृश्योपकरणानि (३) श्रव्य-दृश्योपकरणानि ।

(३) श्रव्य-दृश्योपकरणानि—दूरदर्शिनी, गणकयन्त्रम्।

श्रव्यदृश्योपकरणानां प्राधान्यता

१. कक्ष्याशिक्षणे श्रव्य-दृश्योपकरणानि छात्रेषु पठनासक्तिं वर्धयन्ति। यदि अभ्यसने आसक्तिः भवति पाठ्यवस्तुन्यपि उत्सुकता भवति। एवम् अभ्यसने आसक्तिः श्रद्धा च वर्धेते। श्रद्धावान् लभते ज्ञानम् इति गीतावचनानुसारं श्रद्धया विषयज्ञानं वर्धते।

२. कक्ष्यापरिवेशं चैतन्यवन्तं, उत्साहभरितं च भवति। अध्यापकः यं कमपि शिक्षणोपकरणं दर्शयितुम् उद्युक्तः भवति तदानीं छात्राणां मुखारविन्दानि अतीव विकसितानि भवन्ति।

३. पाठे छात्राणाम् अवधानस्थापने श्रव्य-दृश्योपकरणानि नितरां सहकुर्वन्ति।

४. छात्राः सर्वदा सक्रियाः तिष्ठन्ति।

५. अधीतो विषयः बहुकालं मनसि तिष्ठति।

आकाशवाणी-

संस्कृतपाठाः, रूपकाणि, सम्भाषणानि, पद्यपठनम्, समस्यापूरणानि, प्रसङ्गश्रवणम् इत्यादयः।

ध्वनिमुद्रणयन्त्रम्— अनेन यन्त्रेण उच्चारणशिक्षणं दातुं शक्यते। श्रवणभाषणकौशलयोः अभ्यासः भवति। गीतानि, श्लोकान्, नाटकस्य भागान् मुद्रणं कृत्वा छात्राणां कृते श्रावयितुं शक्नुमः।

चित्राणि—महापुरुषाणां, कवीनां, नेतृणां, प्रसिद्धव्यक्तीनां, चित्राणि प्रदर्श्य पाठयितुं शक्यते। कथासन्निवेशचित्राणामपि प्रदर्शनं भवति।

कार्टून्स—प्रहसनानि, हास्यरसस्फोरकविषयाः, हास्यरसभावनानां विशदीकरणे एतेषाम् उपयोगः महान्।

स्फोरकपत्राणि—अक्षराणां, चित्राणां, पदसहितचित्राणां, पदक्रीडानाम् अक्षरनिर्माणक्रीडानां, व्याकरणांशानां च पाठने एतेषां स्फोरकचित्राणामुपयोगः अतीव विद्यते।

चार्टस्—कविपरिचये, कविजीवितविशेषादिषु, ग्रन्थपरिचये, अनेन बोधनोपकरणमाध्यमेन पाठनं क्रियते चेत् अत्यन्तरुचिपूर्णं भवति।

सद्यः चित्राणि—अध्यापकः बोधनसमये एव श्यामफलकस्योपरि भावस्पष्टीकरणाय सद्य एव चित्रलेखनं करोति। परमत्र येषां चित्रलेखने नैपुण्यमस्ति ते एव सद्यः चित्रनिर्माणे प्रभवन्ति।

चलनचित्राणि—पौराणिकचित्राणि, चारित्रिकचित्राणि तथा उत्तमहास्यचित्राणि प्रदर्श्य छात्राणामभिरुचिं वर्धयितुं शक्नुमः।

दूरदर्शनी—भाषाकार्यक्रमाणां, साहित्यकार्यक्रमाणां च प्रदर्शनं कर्तुं शक्नुमः।

बोधनोपकरणानां निर्माणम्-प्रयोगः

अध्यापकः शिक्षणोपकरणानि चतुर्विधतया सम्पादयितुं शक्नोति।

१. स्वयं निर्माणेन।

२. पूर्वनिर्मितानां संग्रहणेन।

३. छात्रनिर्मितेन, छात्रसंग्रहणेन।

४. विद्यालये विद्यमानानां शिक्षणोपकरणानां विनियोगेन।

❑

२३. मूल्याङ्कनम्

केषाञ्चन प्रमाणानाम धारेण एकस्य मूल्यनिर्णयः एव मूल्याङ्कनम्। एकस्य शिक्षाकार्यस्य, एकस्याः प्रणाल्याः वा पूर्वनिर्धारितलक्ष्यसिद्धिनिर्णयप्रक्रिया एव मूल्याङ्कनम्। वैदिककाले मौखिकी परीक्षाविधिः एव प्राचलत्। चारित्रिकाधारानुसारं क्री. पू. २२०० वर्षतः चीनदेशे राष्ट्रियपरीक्षापद्धतिः आसीदिति ज्ञायते। अमेरिकादेशे केम्ब्रिज् विश्वविद्यालये १७०२ तमे वर्षे प्रथमं लिखितपरीक्षाः प्रचालिताः। प्रथमतया मौखिकपरीक्षा त्रयोदशशताब्दौ एव पारिस्वेलोग्नाविश्वविद्यालययोः आरब्धा। अस्माकं देशे वुड् डिस्पाच् सूचनानुसारं १८५७ तमे वर्षे आङ्ग्लशासकैः संस्थापितेषु त्रिषु विश्वविद्यालयेषु परीक्षाविधानं समारब्धम्।

मूल्याङ्कनप्रकाराः

मूल्याङ्कने चत्वारः प्रकाराः सन्ति। ते—

१. नियुक्तिमूल्याङ्कनम् २. रूपकमूल्याङ्कनम्

३. सङ्कलनमूल्याङ्कनम् ४. व्याधिनिर्णायकमूल्याङ्कनम्

१. नियुक्तिमूल्याङ्कनम्-छात्राणां विविधकक्षासु प्रवेशाय, तेषां प्रतिभापरीक्षणाय च इदं मूल्याङ्कनम् उपयुज्यते। प्रवेशात्पूर्वं तत्सम्बद्धज्ञानस्य परीक्षणं कुर्वन्ति। छात्राणां पूर्वज्ञानस्याधारेण बोधनप्रकाराः प्रतिपाद्यन्ते. तत्प्रतिपादने मूल्याङ्कनमिदं नितरामुपयुज्यते। यथा—प्राक्शिक्षाशास्त्रिपरीक्षा (PSST), पूर्व शिक्षाचार्यपरीक्षा (PSAT)।

२. रूपकमूल्याङ्कनम्—शिक्षणाधिगमप्रक्रिया यदि वर्धमाना भवति, तदा अस्य मूल्याङ्कनप्रकारस्य उपयोगः। अधिगमे छात्रेभ्यः, अध्यापकेभ्यश्च फलाफलसम्बद्धां निरन्तरं पुनः पुष्टिं प्रापयित्वा अधिगमप्रगतिः परिशील्यते। छात्रेभ्यः स्वगुणदोषपरिज्ञानाय, अधिगमे अग्रेसरणाय च इयमेव पुनः पुष्टिः पुनर्बलनतया कार्यं करोति। तथैव अध्यापकेभ्यः शिक्षणे नूतनकौशलानां प्राप्तये पुनः पुष्टिरियम् उपकरोति।

३. दोषनिर्णायकमूल्याङ्कनम्—एकः छात्रः परीक्षायाम् अनुत्तीर्णः अभवत्। अनुत्तीर्णस्य कारणानि ज्ञात्वा पुनः कथं सफलतां प्राप्नोति, तदर्थं का प्रतिक्रिया विधेया इति इदं मूल्याङ्कनम् विशदीकरोति। यदि कश्चन छात्रः सर्वदा परीक्षायामनुत्तीर्णः भवति, पुनः विश्लेषणात्मकतया दोषनिर्णायकपरीक्षाः निर्वहन्ति। शिक्षणाधिगमसन्दर्भे छात्रैरनुभूयमानानां समस्यानां मूल्याङ्कनम्-दोषनिर्णायकमूल्याङ्कनम्।

४. सङ्कलनमूल्याङ्कनम्—एकस्य शिक्षाकार्यक्रमस्य समाप्त्यनन्तरं सः कार्यक्रमः शिक्षणलक्ष्याणां साधने कियत्साफल्यमवाप इति विषयस्य परिज्ञानाय

उपयुज्यमानं मूल्याङ्कनमेव सङ्कलनमूल्याङ्कनम्। प्राय: श्रेणीनिर्धारणे अयं प्रकार: उपयुज्यते। अस्मिन् मूल्याङ्कने अध्यापकनिर्मितपरीक्षा:, गुणमापकानि च भवन्ति।

मूल्याङ्कनस्य क्षेत्रम्

छात्राणां सर्वाङ्गीणविकास: एव शिक्षाया: मुख्यम् उद्देश्यं भवति। सर्वाङ्गीणविकासे शारीरिक-मानसिक-वैयक्तिक-नैतिक-सामाजिक-आध्यात्मिकादय: अंशा अन्तर्भवन्ति। यस्यां मूल्याङ्कनपद्धतौ सर्वेषां विकासानां मूल्याङ्कनं भवति सा पद्धति: श्रेष्ठा। परम् एकैकस्य विकासस्य परीक्षणं तु पृथक् पृथग्भवति। शारीरिकविकासस्य परीक्षणाय स्वास्थ्यपरीक्षापत्रम् आवश्यकं भवति। ज्ञानोपलब्धिविकासाभ्याम् उपलब्धिपरीक्षापत्रमपेक्षते। एवमन्येभ्य: विकासेभ्य: उपलब्धिपरीक्षापत्रं पृथक्तया निर्मेयं भवति।

संस्कृतक्षेत्रे मूल्याङ्कनम्

संस्कृतभाषायां, संस्कृतशिक्षणे च या पद्धति: प्रचाल्यमाना वर्त्तते सा अतिप्राचीना। प्राय: शतवर्षेभ्य: सैव पद्धति:। शिक्षक: पाठं पाठयित्वा, पुनस्तमनूद्य प्रश्नं निर्माति।

यथा— १. अधोलिखितस्य गद्यांशस्य अनुवादं कुरुत।

२. अधोलिखितानां शब्दानामर्थं लिखित।

३. संज्ञापदानां, क्रियापदानां वा रूपाणि लिखत।

कदाचित् सर्वं प्रश्नपत्रं निबन्धात्मकं भवति। समाधानमपि बहुविकल्पभूयिष्ठं भवति। एतादृशे मूल्याङ्कने कदापि प्रामाणिकतादिगुणा: न भवन्ति। अतोऽवश्यं मूल्याङ्कनपद्धति: परिवर्त्तनीया।

मूल्याङ्कनसाधनानि

- परीक्षापत्रनिर्माणम्।
- परीक्षापत्रे त्रयो गुणा अवश्यम् अपेक्षन्ते।

१. प्रामाणिकता—

आदर्शपूर्णस्य प्रश्नपत्रस्य प्रामाणिकता मुख्यं लक्षणं भवति। STODOLA महोदय: Basic Educational Tests and Measurement नामके ग्रन्थे प्रामाणिकतामेवं न्यरूपयत्-The term validity refers to the effectiveness of a test in acheiving specified purposes. अर्थात् यानि उद्देश्यानि शिक्षणस्यापेक्षितानि तेषां पूरणं यत्र भवति तत्र प्रामाणिकता भवतीति। अध्यापक: एकं लघुनिबन्धं लेखयितुं छात्रान् आदिशति। परं तस्मिन् विषये छात्राणां ज्ञानं नास्ति। यदि ते लिखन्ति, केवलं भाषाया: व्यक्तीकरणं भवति। अत: तत्र प्रामाणिकता नास्ति। यतो हि शिक्षणोद्देश्यानुसारं प्रश्नपत्रं नास्ति।

२. विश्वसनीयता—

निबन्धात्मकप्रश्नपत्रे अन्यान्यपरीक्षकाः भिन्नान् अङ्कान् दास्यन्ति। एकस्यैव प्रश्नस्य समाधानाय एकः परीक्षकः अधिकाङ्कान् ददाति। अपरः न्यूनाङ्कान्। कदाचित् अङ्कानां भेदम् अत्यधिकं भवति। एतादृशप्रश्नपत्रस्य विश्वसनीयता न भवति। वस्तुगतप्रश्नानां समाधानं निश्चितं, सीमितञ्च। एतादृशप्रश्नपत्राणां मूल्याङ्कनं कदाचित् संगणकयन्त्रेणापि क्रियते।

३. उपयोगिता—

सर्वप्रथम प्रश्नपत्रस्य विस्तारविषये विचारयति। पुनः प्रश्नस्य कठिनतानुसारम् अङ्कनिर्धारणं करणीयम्। प्रश्नपत्रे द्वौ भागौ निबन्धात्मकवस्तुगतत्मकौ पृथक्-पृथक् भवेताम्। प्रश्नानुसारम् उत्तरं प्रश्नपत्रे एव निर्धारिते प्रदेशे लेखनीयम्। वस्तुगतस्य, निबन्धात्मकस्य च कियान् समयः प्रदत्तः इत्यपि स्पष्टं सूचनीयम्।

शिक्षकस्य संसिद्धता

सर्वदा छात्रवत् शिक्षकेन मूल्याङ्कनविषये बहुचिन्तनीयम्। प्रश्नपत्रं तावत् शिक्षासिद्धान्तानामनुसारं निर्मेयम्। समयः, अङ्कानां विभागः इत्यादिषु सम्यक् ध्यानं देयम्। प्रात्येकस्य छात्रस्य प्राप्ताङ्कसूची (profile), शैक्षिकविकासाभिलेखनं (Cumulative Record) च सज्जीकरणीयं भवति।

परीक्षापत्रस्वरूपम्

प्रथमं प्रश्नानामाधारः दीयते। ततः अध्यापकः प्रश्नान् पृच्छति। छात्रेभ्यः उत्तराणि प्राप्य अङ्कान् दत्वा मूल्याङ्कनं विदधाति। परीक्षापत्रं स्वरूपतः त्रिप्रकारकं भवति। यथा—

१. मौखिकम्—अत्र प्रश्नाः उत्तराणि च मौखिकरूपेण भवन्ति। इमाः परीक्षाः परीक्षकस्य, परीक्षार्थिनश्च मध्ये प्रचाल्यमानस्य मौखिकसमचारस्योपरि आधारिताः। उच्चारणकौशल-वाचनकौशल-शब्दभण्डार-श्लोकपाठ - व्याकरणगत - शब्दक्रिया-रूपाणि इत्यादीनि अनेन परीक्ष्यन्ते। वार्त्तालापः-सामूहिकगोष्ठी-चर्च्चा दीनां माध्यमेन छात्राणाम् अधिगमसामर्थ्यस्य मूल्याङ्कनं कर्त्तुं शक्यते।

शलाका—शलाका परीक्षा मौखिकरूपस्य अत्युत्तमप्रकारः। शलाकाशब्दस्य अर्थः भवति-नेत्रयोः कज्जलीकरणाय उपयुज्यमानस्य कूर्चस्यैव शलाका इति नाम। यदा शलाकायाः उपयोगं कुर्मः तदा नेत्रे उन्मीलने भवतः। अन्यथा कज्जलीकरणं न सिद्ध्यति। अपि च कज्जलकरणेन नेत्रयोः शुद्धता आगच्छति।

गुरुः ज्ञानप्रदानेन छात्राणां नेत्रे उन्मीलनं कृत्वा अज्ञानरूपं अन्धकारं दूरीकरोति। अत एवोक्तम्—

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलीतं येन तस्मै श्रीगुरुवे नमः॥

परीक्षाक्रमः-यस्य विषयस्य परीक्षा करणीया तस्मिन् यत्र कुत्रापि शलाकां स्थापयति। तदा यत्र यः विषयः आगतः तस्मिन् विषये परीक्षा भवति। वस्तुतः शास्त्राणां परीक्षणे एतस्याः परीक्षायाः उपयोगः भवति। यथा-कौमुदीपरीक्षा भवति। तदा तद् ग्रन्थे यत्र कुत्रापि शलाकां स्थापयन्ति यत् प्रकरणमागतं तत्रैव परीक्षा भवति।

२. प्रायोगिकम्-

प्रयोगात्मककार्ये भागं गृहीत्वा, स्वाधिगमक्षमतायाः प्रदर्शनाय उद्दिष्टाः परीक्षाः। एताभिः परीक्षाभिः एकस्य नूतनविषयस्य, सर्जनात्मकशक्तिं, एकस्य सिद्धान्तस्य प्रयोगे समन्वयसामर्थ्यं च ज्ञातुं शक्यते। विज्ञानशास्त्रविषयेषु इयं बहुलतया उपयुज्यते।

३. लिखितम्—

अत्र प्रश्नाः, उत्तराणि च लिखितरूपेण भवन्ति। छात्राः प्रश्नपत्रे विद्यमानानां प्रश्नानां समाधानानि कर्गजे वा, प्रश्नपत्रे एव निर्दिष्टप्रदेशे वा लिखन्ति। समाधानपत्राणां मूल्याङ्कने यानि फलानि सम्भवन्ति, तान्येव शिक्षणाधिगमफलानि। लिखितपरीक्षाः प्रसिद्धमूल्याङ्कनसाधनानि। तासु निबन्धात्मकाः, लघूत्तरात्मकाः, वस्तुनिष्ठात्मकाश्च प्रधानाः।

निबन्धात्मकम्-छात्रः निर्दिष्टसमये, निर्दिष्टप्रश्नानां, निर्दिष्टप्रदेशे याः परीक्षाः लिखति ता एव निबन्धात्मकाः भवन्ति। विषयस्य विश्लेषणे, सङ् ग्रहणे, विमर्शने छात्राणां सामर्थ्यपरीक्षणाय निर्दिष्टोऽयं प्रकारः। अस्यां परीक्षायां छात्रैः दत्तानि उत्तराणि, तेषाम् अभिवृत्तीत्यादीनि वैयक्तिकलक्षणानि प्रकटयन्ति। अनेन प्रकारेण छात्राणाम् अभिव्यक्तीकरणशक्तिः, हस्तलेखनं, भाषा इत्यदिविषयाणां परीक्षणं भवति।

लाभाः—

१. एतेषां निर्माणं, निर्वहणं सुकरम्।
२. सङ्क्लिष्टाधिगमफलानां निरूपणाय श्रेष्ठं साधनम्।
३. विषयविश्लेषणादीनां छात्रान्तर्निहितशक्तीनां परीक्षणं भवति।
४. छात्राणाम् उत्तराणि सम्पूर्णतया समीचीनं वा, दोषपूर्णं वा न भवन्ति। अतः नियमिततया काँश्चन अङ्कान् प्राप्नुवन्ति।

दोषाः—

१. गणने विश्वसनीयता न भवति।
२. गणनाय अधिकः समयः अपेक्षितः।
३. यथार्थसमाचारज्ञानगणनं निर्दुष्टतया न भवति।
४. समग्रविषयस्य परीक्षणं न क्रियते।
५. हस्तलेखनादि-अनपेक्षितकारकाणां गणनया प्रामाणिकता न दृश्यते।

वस्तुनिष्ठपरीक्षाः

यः कोऽपि परीक्षकः निर्दुष्टतया परीक्षणाय सामर्थ्यमस्याः परीक्षायाः वर्त्तते।

लाभाः—

१. विषयनिष्ठा, निर्दुष्टगणना च भवति।

२. समग्रस्य पाठ्यक्रमस्योपरि प्रश्नान् प्रष्टुं शक्यते।

३. निर्वहणाय, गणनाय च अल्पः समयः अपेक्षते।

४. परीक्षानिर्वहणं सुकरम्।

५. कण्ठस्थीकरणस्य आवश्यकता न भवति।

६. वञ्चनस्य अवसर एव नास्ति।

दोषाः—

१. मुद्रणव्ययः अत्यधिकः भवति।

२. अपठित्वाऽपि, ऊहेनापि उत्तरं दातुं प्रभवन्ति।

३. निर्माणाय अधिकः कालः अपेक्षितः।

४. प्रश्नानां चयने अधिकं कौशलं अनिवार्यम्।

५. छात्राणाम् हस्तलेखनादि-अतिरिक्तशक्तीनां परीक्षणं न भवति।

वस्तुनिष्ठपरीक्षाप्रकाराः

१. **समाधानात्मकाः**—लघूत्तरात्मकप्रश्नाः एकपदोत्तरात्मकप्रश्नाः।

२. **चयनात्मकाः**—अत्र पुनः त्रयः प्रकारकाः सन्ति। सत्यासत्यकथनम्, रिक्तस्थानानि, बहुलैच्छकप्रश्नाः इति।

३. **योजनात्मकाः**—योजनात्मकविषयनिष्ठपरीक्षायाम् अंशाः द्वयोः पार्श्वयोः भवन्ति। एकस्मिन् पार्श्वे विद्यमानः अंशः, द्वितीयपार्श्वे विद्यमानेन केन अंशेन योजयति इति विषयः छात्रैः चयनीयः भवति। इमे अंशाः शब्दाः, चिह्नानि, लक्षणानि, कवयः-काव्यानि, लक्ष्यम्-सूत्रम् इत्यादयः भवितुमर्हन्ति।

उदा-

कविः	**काव्यम्**
कालिदासः	उत्तररामचरितम्
विशाखदत्तः	वेणीसंहारम्
भवभूतिः	अभिज्ञानशाकुन्तलम्
भट्टनारायणः	मुद्राराक्षसम्

उदा-

सुधीन्द्रः	वृद्धिसन्धिः
प्रत्यक्षम्	गुणसन्धिः
दिव्यौषधम्	यणादेशसन्धिः
गजेन्द्रः	दीर्घसन्धिः

लाभा:—

१. एतेषां निर्माणं सुकरम्।
२. मूल्याङ्कनम् शीघ्रतया कर्त्तुं शक्यते।
३. अल्पे समये पठितुं प्रभवन्ति। अत: अधिकान् प्रश्नान् प्रष्टुं पारयति।
४. अल्पे एव प्रदेशे अधिकप्रश्नान् प्रष्टुम् अवसर: मिलति।

दोषा:—

१. कण्ठस्थीकरणेन आधारितस्य यथार्थसमाचारस्यैव मापनं भवति।
२. कदाचित् एतादृशानां प्रश्नानां माध्यमेन अधिगमफलानां सम्यक् मूल्याङ्कनं न भवति।
३. छात्राणां पाठावगमनस्य सम्पूर्णमापनं कर्त्तुं न शक्यते।
४. अत्र असङ्गतसूचनानाम् आधिक्यं भवति।

बहुलैच्छिकप्रश्ना:

बहुलवरणप्रश्ने द्वौ भागौ स्त:। प्रथमभागे प्रत्यक्षप्रश्नो वा, असम्पूर्णवाक्यं वा भवति। अस्यैव स्टेम् इति नाम। द्वितीयभागे तत्प्रश्नसम्बद्धानि चत्वारि, पञ्च वा उत्तराणि भवन्ति। छात्र: तेषु उत्तरेषु समीचीनं चिन्वीत।

उदा-

(क) महाभारतस्य रचयिका क: ?

(१) कालिदास: (२) भास: (३) व्यास: (४) माघ: [ ]

(ख) महाभारते भागानां नाम ....

(१) अध्याय: (२) पर्व (३) स्कन्द: (४) काण्डम् [ ]

लाभा:—

बहुलैच्छिकपरीक्षा स्वल्पे समये पूरयितुं शक्यते। विषयनिष्ठया मापनं कर्त्तुं शक्यते। लघूत्तरप्रश्नेषु विद्यमाना अस्पष्टता अत्र न भवति। अध्यापक: अवबोधनादि-छात्रसामर्थ्यान् सम्यक् मापयितुं शक्नोति। अस्यां पद्धतौ उत्तमप्रश्नानां निर्माणं भवति।

दोषा:—

प्रश्ननिर्माणाय अधिक: समय: अपेक्षते। प्रश्नपत्रनिर्माणमपि बहुक्लेशतरं भवति। किमिति चेत् सर्वाणि उत्तराणि समीचीनानि यथा भान्ति तथा चेतव्यानि। मुद्रणव्यय: अपि अधिक: भवति। छात्राणां स्वभावाभिव्यक्तीकरणाय अवसर: न भवति।

निर्धारणमापन्य:–छात्राणां सामर्थ्यानि, व्यवहारान्, विविधविषयेषु छात्रै: प्रदर्शितप्रतिभां च निर्धारणमापन्य: मापयन्ति। निर्धारणमापन्य: द्विविधा:। १. गुणात्मकमापन्य, २. पौन: पुन्यमापन्य:।

१. गुणात्मकमापन्यः

गुणात्मकमापनीभिः व्यक्तेः गुणान्, व्यवहारं, प्रगतिं च मापयन्ति। तदर्थं पञ्चबिन्दुमापनी उपयुज्यते। पञ्चबिन्दुमापन्यां श्रेष्ठमित्यारभ्य अतिहीनमिति यावत् गुणस्थायिनः भवन्ति। उदाहरणार्थम्-छात्रस्य प्रयोगशालायाः कौशलमापनाय इयं गुणात्मकमापनी उपकरोति।

पञ्चबिन्दुमापनी—

५	४	३	२	१
श्रेष्ठम्	समीचीनम्	सामान्यम्	हीनम्	अतिहीनम्
Excellent	Good	Average	Poor	Very Poor

२. पौनः पुन्यमापन्यः—

पौनः पुन्यमापनीषु व्यवहारपौनः पुन्यं सदा इत्यारभ्य न कदापि इति यावत् विद्यमानायां पञ्चबिन्दुमापन्यां मापयन्ति। उदा-अहं संस्कृतशिक्षकः भवितुमीहे। अत्र पौनः पुन्यमापन्याः उपयोगः एवं भवति।

५	४	३	२	१
सदा	प्रायः	यदा-कदा	कदाचित्	न कदापि
Always	Frequently	Sometimes	Rarely	Never

३. सांख्यिकमापनम्—

प्रथमतः छात्रेभ्यः अङ्काः दीयन्ते। अङ्कानामाधारेण पञ्चबिन्दुमापके श्रेणीनिर्धारणं करोति। यथा—५, ४, ३, २, १ इति।

४. वाचिकमापनम्—

A, B, C, D, E इति, अथवा बहुसमीचीनं-सुसमीचीनं-सामान्यम्-अतिसामान्यम् इति पदैर्वा श्रेणीं निर्दिशति।

५. रेखाचित्रमापकम्—

मापकमेतत्, अध्यापकानामत्यन्तमुपकरोति। सर्वाङ्गीणविकासमाधारीकृत्य प्रत्येकस्य छात्रस्य स्थानं कुत्र वर्त्तत इति विचिन्त्य एकं चिह्नं प्रददाति।

प्रश्नावलिः (Questionnaire)

व्यवहारस्य मूल्याङ्कनसम्बद्धः प्रश्नसमूह एव प्रश्नावलिः। छात्राः प्रश्नावलीमध्ये स्थितान् प्रश्नान् अवगम्य समाधानानि दद्युः। इयं प्रश्नावलिः आम्, न (Yes, or No type) इति रूपेण वा, शोधनसूचिकारूपेण (Check list) वा, स्वेच्छारूपेण (Open ended) वा भवति।

उदा- १. अहं व्याकरणं पठामि। आम्/न

१. व्याकरणपाठनं नाम मम—

अभिरुचिः / आसक्तिः / अरुचिः / क्लेशः

३. पठ शिष्य! व्याकरणमिति गुरुवचनेन अहं चिन्तये..........।

साक्षात्कारः (Interview)

परीक्षकस्य, परीक्षार्थिनः साक्षात् मौखिकभाषणमेव साक्षात्कारः। साक्षात्कारे छात्रः विशेषज्ञैः पृष्टानां प्रश्नानां समाधानं दद्यात्। समाधानदानेन स्वीयां प्रतिभां प्रकटयेत्। ये साक्षात्कारं निर्वहन्ति ते समाधानप्रदानाय अधिकं समयं न ददति। कदाचित् पूर्वमेव प्रश्नान् निर्मीय साक्षात्कारसमये पृच्छन्ति। कदाचित् छात्राणां समाधानानि, प्रतिचर्यां चाधृत्य तत्काले एव प्रश्नान् निर्मीय पृच्छन्ति। साक्षात्कारे इमे अंशाः भवन्ति।

- परिचयः
- विषयज्ञानपरीक्षणम्
- अभिरुचिपरीक्षणम्
- व्यवहारपरीक्षणम्

निरीक्षणम्

परीक्षकः, मूल्याङ्कनसाधनेन निरीक्षणे छात्रव्यवहारं परिशील्य, अभिलिखति। निरीक्षणे द्वौ प्रकारौ भवतः।

१. सहजनिरीक्षणम्—वयं यं छात्रं निरीक्षामहे स न जानाति, मां निरीक्षन्त इति। एतादृशं भवति-सहजनिरीक्षणम्।

२. नियन्त्रितनिरीक्षणम्—निरीक्षणाय अपेक्षितपरिस्थितिं परिकल्प्य यन्निरीक्षणं क्रियते तद्भवति नियन्त्रितनिरीक्षणम्।

३. दैनिककार्यपरीक्षणम्—अध्यापकेन प्रतिदिनं गृहकार्यं दीयते। पुनः प्रदत्तस्य गृहकार्यस्य अङ्काः दीयन्ते। कक्ष्यायां छात्राणां संस्कृतभाषणं, वार्त्तालापः-इत्यादिपाठ्यसहगामिक्रियासु दैनिकपरीक्षणं भवति।

४. वार्षिकनिरीक्षणम्—सम्पूर्णे वर्षे छात्राणां संस्कृतभाषायां कियत् ज्ञानं प्राप्तम् ? कीदृशी प्रगतिरधिगता ? इति विषयं निरीक्षते।

परीक्षाः

पाठ्यप्रणालीमाधारीकृत्य छात्राणां पठनासक्तिं, ज्ञानोपार्जनं, ग्रहणशक्तिं च विविधपद्धतीभिः परिशील्य ते उत्तीर्णा अनुत्तीर्णा वा इति निश्चेतुं या प्रक्रिया भवति सैव परीक्षा।

प्रयोजनानि—

१. छात्राणामधिगमस्तरं विज्ञाय अपेक्षितं शिक्षणं दातुमुपकरोति।

२. कक्ष्यायाम् अध्यापकस्य कार्यसामर्थ्यं ज्ञातुं सहकरोति।

३. अनुसृतशिक्षणपद्धतयः योग्या न वा इति ज्ञानं भवति।

४. छात्राः पठने स्वगुणदोषान् अवगन्तुं प्रभवन्ति।

५. अज्ञान्, प्राज्ञाँश्च अभिज्ञाय पृथक्तया शिक्षणं दातुं शक्यते।

६. परीक्षाः छात्रेषु स्पर्धां वर्धयितुं समर्थाः।

७. पाठ्यप्रणालीसंस्करणाय परीक्षाः आधारभूता भवन्ति।

डॉ. बेञ्जिमन् ब्लूम्महाशयस्य योगदानम्

१९५७ तमे वर्षे भारतदेशे विद्यालय-विश्वविद्यालयस्तरयोः परीक्षापद्धतौ अपेक्षितपरिवर्त्तनानां सूचनाय शिक्षाविभागः अमेरिकादेशीयं, शिकागो विश्वविद्यालयस्य मुख्यपरीक्षकं डॉ. बेञ्जिमन् ब्लूम् महोदयं, भारतं प्रति समाह्वयत्। बेंजिमन् ब्लूममहोदयः भारतमागत्य विविधप्रदेशेषु विद्यमानाः शिक्षासंस्थाः परिशील्य महत्त्वपूर्णाः सूचनाः अकरोत्। ताः यथा—

१. शिक्षा, शिक्षणम्, अधिगमः, लक्ष्याणि-एतेषामानुगुण्येन परीक्षाः भवेयुः।

२. राष्ट्रियपरीक्षाविभागः संघटनीयः।

३. प्रत्येकं विश्वविद्यालये परीक्षाफलानि मनोविज्ञानशास्त्रज्ञैः अध्ययनं कारणीयम्।

४. परीक्षासम्बद्धसूचनाप्रदानाय प्रत्येकं विश्वविद्यालये एकं मनोवैज्ञानिकं नियोजयेत्।

५. अन्तर्मूल्याङ्कनाय ५० अङ्का, बहिर्मूल्याङ्कनाय ५० अङ्काश्च भवेयुः।

६. परीक्षापद्धतौ वस्तुनिष्ठतां प्रावेशयेत्।

उपर्युक्तान् सर्वान् प्रस्तावान् सर्वकारः अङ्गीकृत्य, १९५७ तमे वर्षे राष्ट्रियमूल्याङ्कनविभागं समारभत। अयमेव विभागः १९६१ तमे वर्षे राष्ट्रियशैक्षिक-अनुसन्धानपरिषत् मध्ये अन्तर्लीनः अभवत्।

निरन्तरसमग्रमूल्याङ्कनम्—अस्यां भावनायां द्वौ विषयौ स्तः।

१. निरन्तरम्—

परीक्षामभिलक्ष्य अध्यापका अपि काँश्चन पाठान् एव पाठयन्ति। परीक्षायाः पूर्वं काँश्चन अंशान् चित्वा छात्राः पठन्ति। परमयमंशः शिक्षालक्ष्याणामेव विरोधः। अतः वर्षारम्भादेव छात्रान् निकषादि परीक्षाभिः नियतं निरन्तरं मूल्याङ्कनं भवेत्। तेन अध्यापकः छात्राणां गुणदोषान् विज्ञाय स्वशिक्षणे आवश्यकपरिणामान् आनीय

अध्यापनं करोति। अतः आवर्षं छात्राणाम् मूल्याङ्कनं भवेत्। एतदेव निरन्तरमूल्याङ्कनम्।

२. समग्रम्—

साम्प्रदायिकमूल्याङ्कने केवलं पण्डितांशानामेव सीमितं भवति। अर्थात् ज्ञानात्मकक्षेत्रस्य सीमितं भवति। छात्राणां स्मरणशक्तिरेव परीक्ष्यते तत्र भावात्मक-संवेगात्मकक्षेत्राणाम् उपेक्षा जायते। अतः बालकस्य सर्वाङ्गीणविकासस्य मूल्याङ्कनं च भवति। वस्तुतः मूल्याङ्कनस्य लक्ष्यमिदमेवास्ति यत् सर्वाङ्गीणविकासस्य परीक्षणम्। तदानीमेव मूल्याङ्कनं समग्रं भवति। समग्रमूल्याङ्कने ज्ञानात्मकैरंशैस्सह अधोनिर्दिष्टाः अंशा अपि भवन्ति। अंशा अपि भवन्ति।

१. वैयक्तिक-सामाजिकांशाः (समयपालनं, सहयोगः, स्वच्छता, अनुशासनं सामाजिकसेवा)

२. अभिरुचयः (सङ्गीतं, साहित्यं, कला)

३. अपेक्षिताभिवृत्तयः

४. स्वास्थ्यम्

५. पाठ्यसहगामिक्रियासु क्षमतासम्पादनम् (गीतानि, क्रीडाः, निबन्धरचना, सभाभाषणम्)

३. परिगणनम्—

मूल्याङ्कनापेक्षया परिगणनस्य विस्तारः अधिकः। परीक्षाः, मूल्याङ्कनञ्च केवलं छात्रस्य कक्ष्याप्रकोष्ठस्य उपलब्धिमेव मापयन्ति। किन्तु विद्यालयाद्बहिरपि छात्राणामभिवृत्तीः, व्यवहारञ्च सम्यक्, मापयेत। तदर्थं परिगणनमावश्यकम्। आधुनिकशिक्षणपद्धतिषु प्रधानतया कृत्याधाराधिगमः मुख्यः। स्वाध्यायः एतासां पद्धतीनां मूलम्। प्राक्कल्पनैः, कृत्यैश्च छात्रकौशलानि सम्यक् परिगणयितुं शक्यन्ते।

लक्ष्याधारमूल्याङ्कनम्

शिक्षायाः अन्तिमं लक्ष्यं भवति व्यावहारिकपरिवर्त्तनम्। आदौ छात्रे विद्यमानः व्यवहारः शिक्षणानन्तरम् अस्माकमपेक्षानुसारं परिवर्तितो भवति तदा लक्ष्यप्राप्तिः सिद्ध्यति। लक्ष्यप्राप्तये अनेके उपायाः सन्ति। एते उपायाः एव अध्ययनानुभवाः। एतेषु उपायेषु यः कोऽपि उपायः अपेक्षितं परिवर्त्तनमानयत्येव। अतः शिक्षणात्पूर्वमेव पाठ्यांशे विद्यमानानि लक्ष्याणि मनसि निधाय तदनुकूलेन शिक्षणं दीयते चेत् लक्ष्याधारशिक्षणं भवति। लक्ष्याणि शिक्षणेन कक्ष्याप्रकोष्ठे साध्यन्ते। अत एव तेषां शिक्षणलक्ष्याणि इति नाम। पाठ्यांशानाधृत्य शिक्षणलक्ष्याणि तिष्ठन्ति। उदा-एकस्य पाठस्य देशभक्तिजागरणं शिक्षणलक्ष्यं भवति। अपरस्य नैतिकमूल्यवर्धनं शिक्षणलक्ष्यं भवेत्। अतो ज्ञायते यत् पाठ्यांशानाधारीकृत्य छात्राणां व्यवहारपरिवर्त्तनं परिणामः

सम्भवतीति। छात्रेषु अपेक्षितलक्ष्यसाधनाय ज्ञानात्मक-भावात्मक-संवेगात्मकक्षेत्राणि मुख्यानि भवन्ति। एतेषामेव H_3 इति नाम। Head, Heart, Hand। शिरः - चिन्तनस्य, हृदयः-भावस्य, हस्तः-नाडीव्यवस्थायाः च प्रतीका भवन्ति। उदा- अहिंसा परमोधर्मः इति पाठ्यविषयस्य लक्ष्यम् अहिंसाविषयसम्बद्धं ज्ञानं न भवति। पाठनान्तरं, पठनान्तरं वा छात्रः अहिंसामार्गे गच्छेत् इति लक्ष्यं भवति। इदं, शिक्षा-अधिगमयोरेव फलम्। अतः लक्ष्याधारशिक्षणाय लक्ष्यं प्राणभूतमिति सिद्धम्।

लक्ष्याणि-प्रयोजनानि

१. अध्यापकस्य शिक्षणसामर्थ्यं वर्धते।

२. छात्राणां ज्ञानसमुपार्जनस्तरं ज्ञापयति।

३. छात्रव्यवहारे अपेक्षितपरिवर्त्तनमानयति।

४. लक्ष्याधारेण शिक्षणं भवति।

५. लक्ष्याणि छात्राणाम् अधिगमज्ञानस्य, मूल्याङ्कनस्य च आधारभूतानि भवन्ति।

६. निर्दुष्टतया समग्रतया च मूल्याङ्कनं करोति।

लक्ष्याणि-गुणाः

१. स्वल्पे एव काले साधयितुं समर्थानि।

२. प्रयोगानुकूलानि।

३. सुलभतया समुपार्जनयोग्यानि।

४. मूल्याङ्कनात्परं परिवर्त्तयितुं योग्यानि।

लक्ष्याधारशिक्षणम् - लक्ष्याधारमूल्याङ्कनम्

शिक्षणाधिगमकृत्यानां, मूल्याङ्कनस्य च मूलं लक्ष्यम्। आधुनिकशिक्षणपद्धतिः लक्ष्यकेन्द्रिता वर्त्तते। अध्यापकः लक्ष्याणि मनसि निधाय शिक्षणं करोति। छात्राणामधिगमोऽपि लक्ष्यकेन्द्रित एव। शिक्षणाधिगमफलान्यापि लक्ष्याधारेणैव परिगण्यन्ते। एतदेव लक्ष्याधारमूल्याङ्कनम्। मूल्याङ्कनसमये अध्यापकः लक्ष्यं मनसि निदधाति, न तु शिक्षणाधिगमकृत्यानि। आधुनिकसन्दर्भे शिक्षणं छात्रकेन्द्रितमिति विषयो ज्ञात एव। शिक्षणे छात्राः सक्रिया भवन्ति। ते एव स्वयम् अधिगमकृत्यानि कुर्वन्ति। अत्राध्यापकः केवलं मार्गदर्शकः।

❑

२४. पाठयोजना

वार्षिकयोजना

संवत्सरस्य कृते एकस्याः कक्ष्यायाः कृते पाठ्यक्रमे (Syllabus) निर्णीतांशाः मासतः विभजनम् वार्षिकप्रणाली इति।

विद्यालयस्य कार्यदिनानि प्रायः २२० भवन्ति। एकैकस्मिन् सप्ताहे संस्कृतस्य ३ अन्तराणि भवन्ति। एकैकस्याः कक्ष्यायाः २५० कालांशाः भवन्ति। त्रैमासिक, अर्धवार्षिक, वार्षिक-परीक्षाणाम् उपाध्यायेन स्वीकृतावकाशानां च कृते ३० भवन्तु। एवं संस्कृतबोधनाय प्रायः १२० कालांशाः भवन्ति। तत्र

पद्यभागस्य	–	५०
गद्यभागस्य	—	३५
व्याकरण	—	१५
रचनाभ्यासस्य	—	१०
सहपाठ्यक्रियाणाम्	—	१०

एवं प्रकारेण विभज्य वार्षिकीं प्रणाली रचयेत्।

पाठ्यविभागप्रणाली (Unit Plan)

उपाध्यायस्य नाम	विद्यालयस्य नाम
कक्ष्या	विषयः
पाठ्यांशः	उपपाठ्यांशः
कालांशः	क्रमसंख्या
उपपाठयांशस्य नाम	लक्ष्याणि
विषयविश्लेषणम्	अध्यापकछात्रप्रक्रियाः
बोधनोपकरणानि	मूल्याङ्कनम्

पाठयोजना

Daily lesson planning involves defining the objectives, selecting and arranging the subject matter and determining the method and procedure. (Bining and Bining).

दैनन्दिनपाठयोजना-लक्ष्याणां विवरणम्, विषयसामग्रीसंचयनं तथा योजनम् पद्धतिः, विधानम् इत्यादिभिः निश्चयोपेता भवति। ए.के. डेविस् महोदयः अभ्यसनस्य चत्वारि सोपानानि प्रत्यपादयत्।

१-आयोजनम् (Planning)

२-व्यवस्थीकरणम् (Organisation)

३-अग्रेनयनम् (Leading)

४-नियन्त्रणम् (Controlling)

अध्यापक:, छात्रश्च पाठयोजनाद्वारा कक्षाप्रकोष्ठसम्बद्धानां कृत्यानां विषये अनुभवं प्राप्नुवंत:। अत: अध्यापक: स्वीयं बोधनाकार्यं सामर्थ्यपूर्णं निर्वहेत्। W.W. Kyburn महोदय: अकथयत् यत् यस्य कस्यापि कृत्यस्य बोधनम् पूर्वं प्राप्तानुभवद्वारा प्रारभणीयमिति। (to each we must use experience already gained as starting point of our work)

पाठयोजनाया: आवश्यकता

- पाठयोजना, अध्यापकशिक्षाकार्यक्रमे छात्राध्यापकानां बोधनसमये अर्हं मार्गदर्शनं करोति।
- बोधनालक्ष्याणां विषये पाठयोजना सदवगाहनं कल्पयति।
- पाठ्यांशान् क्रमपद्धतौ बोधनाय सहकरोति।
- छात्राणां पूर्वज्ञानेन सह नूतनज्ञानं योजयति।
- बोधनोपकरणानि, पद्धती:, विधानञ्च पाठ्यांशे प्रावेशयितुम् उपकरोति।
- उपाध्याय: बोधनाविषये एव स्थित्वा क्रमपद्धतौ बोधनाय सहायं करोति।
- छात्राणां प्रवर्तना: नियन्त्रयति।
- छात्राणां वैयक्तिकभेदान् आधारीकृत्य कक्ष्याबोधनकृत्यानि व्यवस्थीकरोति।
- उपाध्यायस्य तथा छात्राणां कल्पनाशक्तिं वर्धयति।
- बोधने छात्राध्यापकानाम् आत्मविश्वासं द्रढयति।

पाठयोजनाया: सूत्राणि

उचितसमये स्वीक्रियमाण: योग्य: निर्णय: एव बोधनस्य सारांश: इति गुड्लाड् (Goodlad) महोदयस्य आशय:। (The right decision at the right movementis the essence of good teaching) यद्यपि आयोजनं वैयक्तिकं तथापि कक्ष्यानिर्माणं, विषयस्वरूपं साध्यानि उद्देश्यानि उपाध्यायस्य मूर्त्तिमत्त्वम् इत्यादयो विषया: प्रभावयन्ति।

- पाठयोजना छात्राणाम् अपेक्षितप्रवर्तनाभ्यसनाय अवकाशं ददाति।
- पाठयोजना, ज्ञानं तथा नैपुण्यम् एते द्वे समन्वयति।
- पाठयोजना छात्रान् अभ्यासोन्मुखान् करोति।
- संसिद्धताया: (Readiness) परिपक्वता, पूर्वानुभव:, उन्मुखीकरणम् इत्यादीनि कारकाणि भवन्ति।

- छात्राणाम् अभिरुचिषु (Interests) अवसरेषु (Needs) सामर्थ्येषु (Abilities) वैयक्तिकविभेदान् स्पष्टीकरोति।
- विद्याविषयकानुभवान् वर्धयति।
- पाठयोजनायां १-लक्ष्याणि, २-उपकरणानि, ३. कृत्यानि, ४. मूल्याङ्कनम् च अवश्यं भवन्ति।

लक्ष्याणामाधारेण पाठबोधनम् भवत्विति शास्त्रीयपद्धतिः। शीलं, व्यक्तित्वं, प्रज्ञा इत्येते विषयाः आदर्शभूतान् छात्रान् निर्मान्ति। उपाध्यायः स्वेबोधनेन छात्रेषु प्रवर्तनापरिवर्तनम् (Behavioural Change) आनयति।

बोधनलक्ष्याणि

१. ज्ञानात्मकानि (Cognitive)—

- ज्ञानम् (Knowledge)
- अवगाहनम् (Understanding)
- विनियोगः (Application)

२. भावावेशात्मकानि (Affective)—

- अनुभूतिः (Feeling)
- उद्वेगः (Emotion)
- अभिरुचिः (Interest)
- वैखरी (Attitude)
- प्रशंसा (Appreciation)

३. मनोचलनात्मकानि (Psychomotor)—

- उपकरणानि (Aids)
- प्रतिकृतिनिर्माणम् (Models)
- चित्रपटनिर्माणम् (Drawing maps)

B.S. Bloom महोदयः बोधनलक्ष्याणि प्रवर्तनालक्ष्यरूपेण (Behavioural Objectives) परिवर्तनम् अकरोत्।

पाठ्यसोपननिर्माणे बोधनालक्ष्याणि—

१-ज्ञानम्, २-अवगाहनम्, ३-विनियोगः, ४-नैपुण्यम्, ५-वैखर्यः।

पाठयोजनायां प्रधानांशाः—

१-बोधनालक्ष्याणि २- उपकरणानां द्वारा पाठ्यांशबोधनम्

३-बोधनाभ्यासकृत्यानि ४-मूल्याङ्कनम्।

महोदयस्य अनुसारं पाठयोजनाप्रणालीनिर्माणे सूत्राणि।

१-भविष्वत जीवितकालिकदृष्टिसूत्रम् (The forward looking principle)

२-संप्रदायबद्धसूत्रम् (The Conservation Principle)

३-सर्जनात्मकतासूत्रम् (The Creative Principle)

४-संसिद्धतासूत्रम् (The Principle of preparation for life)

५-कृत्याधारसूत्रम् (The Activity Principle)

प्रस्तावना

- पूर्वज्ञानपरीक्षणम्
- अभिप्रेरणसम्पादनम्
- लक्ष्यकथनम्
- शीर्षिकाप्रकटनम्
- कुतूहलोत्पादनम्

हेर्बट पञ्चपदी—

१-प्रवेशः/सन्नाहः (Preparation)

२-बोधनम्/विवरणम् (Presentation)

३-संसर्गः (Association)

४-सामान्यीकरणम् (Generalization)

५-पुनरावृत्तिः (Recaptulation)

शिक्षणे अनुबन्धचतुष्टयम्

१-छात्रयोग्यताः २-सन्दर्भः

३-प्रयोजनम् ४-लक्ष्यस्पष्टीकरणम्

पाठप्रस्तुतीकरणम्

आदर्शवाचनम् अनुवाचनम्

त्रुटिसंशोधनम् (पठने, लेखने) कठिनपदानामवबोधः

विचारविश्लेषणम्

भाषापाठलक्ष्याणि-१-सामान्यानि, २-विशेषाणि

२.१-ज्ञानात्मकानि

२.२-अवबोधात्मकानि

२.३-अभिरुच्यात्मकानि

२.4-कौशलात्मकानि

१-सोपानानि, २-पाठ्यवस्तु, ३-लक्षिताधिगमविशेषाः, ४. अध्यापक-छात्रप्रक्रियाः, ५-मूल्याङ्कनम्।

पाठयोजनासोपानानि

१–उपोद्घातः २–प्रस्तुतीकरणम्
३–पाठविकासः ४–पुनरावृत्तिप्रश्नाः
५–गृहकार्यम्

वस्त्रेण वपुषा वाचा विद्यया विनयेन च।
वकारैः पञ्चभिर्हीनः गुरुः नायाति गौरवम्॥

प्रत्येकस्य सोपानस्य समय विभागः

अन्तरस्य अवधिः प्रायः ४५ निमेषाः

सोपानम्	–	निमेषाः	सोपानम्	–	निमेषाः
प्रस्तावना	–	४	मौनवाचनम्	–	३
उद्देश्यकथनम्	–	२	सारांशकथनम्	–	२
आदर्शवाचनम्	–	३	अनुवाचनम्	–	५
पाठप्रवर्धनम्	–	२०	गृहकार्यम्	–	३

प्लाण्डर्स कक्ष्यागतिः

- विश्लेषणात्मिका
- अंशेभ्यः पूर्णं प्रति
- कृत्रिमा
- परिणामात्मिका
- अध्यापकस्य स्वातन्त्र्यं सीमितम्।
- तार्किकपाठानामुपयोगः।
- अनुसन्धानात्मिका।

कक्ष्यागतिः

- संश्लेषणात्मिका
- पूर्णादंशं प्रति
- नियन्त्रणावश्यकता नास्ति
- स्वाभाविकी
- गुणात्मिका
- अध्यापकस्य सम्पूर्णस्वेच्छा
- मानवताभावोपेतानां पाठनामुपयोगः
- प्रतिदिनं कक्ष्यायाम् उपयोगः।

अध्यापनसूत्राणि (Teaching Maxims)

१. ज्ञातात् अज्ञातं प्रति (Known to unknown)
२. सरलात् कठिनं प्रति (Easy to difficult)
३. मूर्त्तादमूर्त्तं प्रति (Concrete to abstract)
४. मनोविज्ञानात् तर्कं प्रति (Psychological to logical)
५. विश्लेषणात् संश्लेषणं प्रति (Analysis to Synthesis)

६. अंशात् पूर्णं प्रति (Parts to whole)
७. आगमनात् निगमनं प्रति (Induction to Deducation)
८. अनुभवात् हेतुं प्रति (Empirical to Rational)
९. सूक्ष्मात् स्थूलं प्रति

अध्यापननैपुण्यानि

१. वर्णनम् – (Description)
२. विवरणम् – (Explanation)
३. विशदीकरणम् – (Expansion)
४. व्याख्यानम् – (Interpretation)
५. कथनम् - (Narration)
६. उदाहरणम् – (Examples)
७. प्रश्नकरणम् – (Questionning)
८. आडग्किाभिनयः–(Non-verbal Behaviour)
९. समाप्तिः (Closure)
१०. स्पष्टनिर्देशा:– (clear Directions)
११. निर्वहणम् – (Management)
    १. श्यामपट्टः (Black Board)
    २. कक्ष्याप्रकोष्ठः (Class-Room)
    3. अनुशासनम् (Discipline)
12. प्रेरणम् (Motivation)

गद्यपाठ	**पद्यपाठः**	**व्याकरणपाठः**	**नाटकपाठः**
कविपरिचयः	कविपरिचयः	उदाहरणद्वाराप्रस्तावः	नाटकपरिचयः
सन्दर्भः	सन्दर्भः	नियमस्वरूपम्	सन्दर्भकथनम्
अवबोधात्मकप्रश्नः	लघुलघुप्रश्नाः	सूत्रनिर्धारण	अध्यापकव्याख्या
अध्यापकव्याख्यानम्	अध्यापकव्याख्यानम्	सूत्रनिरूपणम्	सारांशकथनम्
सारांशकथनम्	सारांशकथनम्	—	छात्रअध्यापकाभिनयः
व्याकरणांशः शब्द भावः	रचनादिसौन्दर्यज्ञापनम्	—	सौन्दर्यानुभवः
विशेषांशाः	अलंकार छन्दोज्ञापनम्	—	पुनर्वाचनम्
शीर्षिकान्तरप्रकटनम्			
मौनवाचनम्	सुस्वरवाचनम्	—	अभिनयवाचनम्

बोधनपद्धतयः—

गद्यम्	**पद्यम्**	**व्याकरणम्**	**नाटकम्**
प्रवचनविधिः	दण्डान्वयः	भाष्यविधिः	प्रयोगविधिः
उद्बोधनविधिः	खण्डान्वयः	सूत्रविधिः	आदर्शनाट्यविधिः
अनुवादविधिः	टीकाविधिः	निगमनविधिः	कक्ष्याभिनयविधिः
कोशविधिः	व्याख्याविधिः	आगमनविधिः	निरीक्षणविधिः
व्युत्पत्तिविधिः	अनुवादविधिः	सहयोगविधिः	व्याख्याविधिः
तुलनाविधिः	क्रीडाविधिः	नियोजिताध्ययनम्	

ब्रूनर (*Burner*) महोदयस्य अंशचतुष्टयम्—

१–प्रेरणा

२–निर्माणम्–

विषयप्रवेशः पद्धतिः

१–क्रियात्मक दशा

२–चित्रदशा

३–प्रतीकात्मक दशा

प्रश्नकरणम् :

सरलसरलप्रश्नाः — अभिप्रेरणात्मकप्रश्नाः

बोधप्रश्नाः — अवबोधात्मकप्रश्नाः

विचारविश्लेषणात्मकप्रश्नाः — पुनरावृत्तिप्रश्नाः

गृहकार्यप्रश्नाः

वाचनम्—आदर्शवाचनम्, अनुवाचनम्, मौनवाचनम्, सस्वरवाचनम्।

सप्तककाराः प्रश्नाः —

5W-2H

Who	—	कः/का
What	—	किम्
When	—	कदा
Why	—	किमर्थम्

Where	—	कुत्र
Howmany	—	कति
Howmuch	—	कियत्

प्रश्नकरणम्—

- प्रश्नः सम्पूर्णकक्षायाः कृते भवतु।
- प्रश्नः असम्पूर्णो वा सन्देहपूर्णो वा न प्रष्टव्यः।
- प्रश्नस्य उत्तरप्रदानाय छात्राणामपेक्षितसमयः दातव्यः।
- उत्तरप्रदानाय छात्रान् नाम्ना निर्दिशतु।
- यदि एकः छात्रः समाधातुं न प्रभवति तर्हि अन्यं पृच्छतु। एवं यावत् उचितमुत्तरं नागच्छति तावत् निर्दिष्टान् छात्रान् तथैव स्थापयतु। उचितोत्तरप्राप्तेः परम् तदुत्तरं पूर्वं निर्दिष्टैः छात्रैरपि दापयतु। ततः उपवेष्टुमादेशं प्रयच्छतु।
- प्रश्नकरणं कक्षायाः आदौ मध्ये, अन्ते च उपविष्टानां छात्राणां भवतु।
- यदि समाधानं सम्यग्ददाति तर्हि समीचीनं सम्यक्, इत्यादिभिः शब्दैः प्रशंसा कार्या।

अनुशासनसम्पादने उपायाः—

- अनुशासनसम्पादने अध्यापकस्य मूर्तिमत्वमेव (Personality) प्रधानम्।
- अनुशासनसम्पादनाय निर्दिष्टतया सूत्राणि वा सिद्धान्ता वा न सन्ति।
- अध्यापकः कक्ष्यायां विद्यमानं प्रतिछात्रं निरीक्षयेत्।
- मुखं इतस्ततः भ्रामयन् कक्ष्यां परिशीलयेत्।
- पाठनसमये छात्राणां मध्ये गत्वा तान् पश्येत्।
- सर्वदा छात्रान् सक्रियान् स्थापयेत्।
- यथा लेखापनम्, प्रश्नकरणम्, श्यामफलकमार्जनम्, चित्राणां व्यवस्थापनम् इत्यादयः।
- प्रश्नकरणं सम्पूर्णकक्ष्यां प्रति भवेत्।
- सामूहिकरूपेण समाधानं न स्वीकरणीयम्।
- समाधानाय नाम्ना छात्रान् निर्दिशेत्। सः उचितं समाधानं न ददाति अन्यं आदिशतु। एवं यावत् उचितमुत्तरं तावत् पर्यन्तं छात्रान् पृच्छतु।
- प्रश्नकरणे क्रमः मास्तु। अर्थात्-सर्वदा प्रश्नकरणं प्रथमपङ्क्तौ उपविष्टानां छात्राणामेव मास्तु। आदौ, अन्ते मध्ये विद्यमानानाम् छात्राणामपि भवतु।

श्यामफलकलेखने अवधेया अंशाः—

- पाठे प्रधानविषयाः लेखनीयाः। अनावश्यकविषयैः श्यामफलकं न पूरणीयम्।
- संक्षिप्तेन संग्रहेण लेखनीयम्।
- श्यामफलके "किं लेखनीयमिति" पूर्वमेव मनसि निधाय लेखनीयम्।
- अक्षराणि सुन्दराणि स्पष्टानि, पठनयोग्यानि कक्षोचिताकाराणि च स्युः।
- सुधाखण्डाः, मार्जनी इत्यादि सामग्रीविषये पूर्वसन्नाहः करणीयः।
- समुचितप्रकाशाय व्यवस्था करणीया।
- प्रकाशस्य प्रतिबिम्बः श्यामफलके पतति चेत् छात्राणामवधानं क्षीयते।
- श्वेतसुधाखण्डापेक्षया वर्णसुधाखण्डस्योपयोगेन अधिकं प्रयोजनम्।
- श्यामपट्टः कदापि हस्तेन न मार्जनीयः। मार्जनी वस्त्रखण्डम् वा उपयुज्य परिमार्ष्टुं शक्यते।
- श्यामपट्टः सर्वदा स्थापनीयः।
- कक्ष्यातः गमनसमये श्यामपट्टः सम्मार्जनीयः।
- उपाध्यायेन श्यामपट्टः सम्मार्जनीयः।
- उपाध्यायेन श्यामपट्टस्य एकस्मिन् पार्श्वे स्थित्वा लेखनीयम्।
- सूचीदण्डेन लिखितांशान् संसूचयन् पाठनीयम्।
- प्रधानांशानामधः रेखालेखनेन छात्रः तेषु विषयेषु ध्यानं दद्यात्।
- निर्वचनानि, सूत्राणि, उदाहरणानि, कठिनपदानि, उदाहृतवाक्यानि, पारिभाषिकपदानि, सांकेतिकपदानि, समासाः, सन्धिपदानि श्यामफलके लेखितुं योग्यानि।
- श्यामफलकमार्जनम् उपरितः अधः करणीयम्। तेन सुधाखण्डस्य धूलिकणानां व्याप्तिः न भवति।
- श्यामफलकवणलेखने निर्दिष्टं वर्णम् उपायोजयेत्।
- सुधाखण्डेन लेखनसमये शब्दः नागन्तव्यः।

वेषधारणम् :

- अध्यापकः धवलवस्त्राणि (White Pant & White Full Hand shirt) धृत्वा पाठयति चेत् वरम्। धवलता स्वच्छतायाः, शुभ्रतायाः प्रतीकः।
- चित्रवर्णवस्त्रम् धृत्वा यदि पाठनाय गच्छति तदा छात्राणामवधानं नश्यति अथवा हीयते।
- शीतोलोपनेत्रधारणं (Cooling Glassess) कक्ष्यायां निषिद्धम्।
- शिरस्त्राणं (Helment, Cap) न धार्यम्।
- "टि" युतकं (T-Shirt) धृत्वा कदापि कक्ष्यायां पाठनाय न गन्तव्यम्।

- पादरक्षयोः शब्दं यथा न भवति तथा कक्ष्यायां इतस्ततः भ्रमेत्।
- स्त्रियः शाटिकां धृत्वा पाठयन्तु।
- नूपरे धर्तुं योग्याः। तत्र शब्दहीने नूपरे योग्ये।

यथार्थवस्तु—

- ध्वनिमुद्रणयन्त्रम् (Tape Recorder)
- आकाशवाणी (Radio)
- दूरदर्शनी (Television)
- चित्रमुद्रणयन्त्रम् (Video Camera)
- सान्द्रमुद्रिका (Compact Disk)
- संगणकयन्त्रम् (Computer)

गृहकार्यम् -

- सामान्यछात्राणाम् पुनर्बलनात्मकं भवेत्।
- प्रज्ञावतां छात्राणाम् अधिकज्ञानसमुपार्जनस्य अवकाशं दद्यात्।
- पाठे विद्यमानानां प्रधानांशानां कण्ठस्थीकरणाय स्थानं कल्पयेत्।
- लेखनकौशलस्य, हस्तलेखनस्य विकासाय प्राधान्यं देयम्।

नियोजनम् (Assignment) —

गृहकार्ये न केवलं पठनं, लेखनं, कण्ठस्थीकरणम् इत्यादीनां स्थानं भवेत्, किन्तु कवि-काव्यादीनां संग्रहः, सुभाषितश्लोकानां संग्रहः, सूक्तीनां संग्रहः इत्यादयोऽपि विषयाः भवितुमर्हन्ति।

बोधनोपकरणानि - सामान्यानि

- पाठ्यपुस्तकम्
- सूचीदण्डः
- श्यामपट्टः
- मार्जनी
- सुधाखण्डः

विशिष्टानि

- चित्रपटम् (Chart)
- मानचित्रम् (Map)
- तालिका (Tables)
- रेखाचित्रम् (Graphs)
- प्रतिकृतिः (Modles)

❑

२५. संस्कृतशिक्षणस्य विरोधकारणानि परिहारोपायाश्च

कठिनभाषा—संस्कृतं कठिनभाषा। अनेन कारणेन छात्राणां, शिक्षकाणां च पठने, पाठने रुचिः न भवति।

जीविकाभावः—यदि कश्चन संस्कृतं पठति, तर्हि सः कां वृत्तिं प्राप्नोति इति पृष्टे सति, एकमात्रोत्तरं भवति यत् शिक्षकत्वम्। परं तत्रापि अधुना बह्व्यः समस्याः सन्ति। संस्कृतशिक्षकस्य स्थानानां पूरणे उपेक्षाभावं प्रदर्शन्ति, सर्वकाराः। बहुषु राज्येषु संस्कृतशिक्षकस्थानानि अनेकवर्षेभ्यः न पूर्यन्ते। ये अध्यापकाः सेवानिवृत्ताः अभवन् तेषां स्थानान्यापि पुनः न पूर्यन्ते। छात्राः संस्कृतं न पठन्ति यदि पठन्ति तर्हि संख्याबहुन्यूना इति कारणद्वयं प्रदर्श्य सर्वकारः संस्कृतशिक्षकस्थानपूरणे निरासक्तिं प्रदर्शयति। कदाचित् एवमपि भवति यत् संस्कृतशिक्षकस्थानं रिक्तं भवति तत्पदम् अन्यविषयं प्रति स्थानान्तरणं भवति। एतत्सर्वं संस्कृतशिक्षायाः उपरि कुप्रभावं जनयति।

पोषणाभावः—संस्कृतस्य कृते सर्वकारेण धनं न दीयते। यद्यपि संस्कृतस्य प्रचारप्रसाराभ्यां पञ्चवार्षिक्यः योजनाः ग्रथिताः तथापि प्रत्येकरूपेण धनसाहाय्यं तु न निवेशितम्। यदि कुत्रचित् निवेशितं स्यात्, तावत् न दीयते यावत् निवेशितम्। सत्यमेतत्। अत्रापि सर्वकारस्य अभिप्रायः एवमस्ति यत् दत्तं धनमपि व्ययः न भवति, पुनः निवेशनेन को लाभः इति। अतः संस्कृतस्य पोषणमेव नास्ति। तेन जनेषु, छात्रेषु विद्यमानः निरुत्साहः द्विगुणीभूतः भवति।

वर्गभाषा—संस्कृतं केवलं ब्राह्मणानां अथवा एकस्य वर्गस्य भाषा नेयं सार्वजनीनभाषा। अतः संस्कृताय किमपि वा, किञ्चिद्वा कुर्मश्चेत् अन्ये जनाः विरोधं कुर्वन्ति इति भावना सर्वकारस्य मनसि वर्त्तते। भारतसर्वकारः यदा संस्कृतायोगस्य नियुक्तिम् अकरोत्, तदानीं तस्य आयोगस्य अध्यक्षः डॉ. सुनीति कुमार चटर्जी महोदयः तमिलनाडुराज्यं गतवान्, तदा तत्रत्याः उक्तवन्तः यदि प्रतिदिनं संस्कृतभाषायां प्रार्थनां कुर्मः, तदा अन्ये चिन्तयन्ति, एषः विद्यालयः एकस्यैव वर्गस्य कृते एव भवति इति। पश्यतु! कीदृशी दुरवस्था ? पाठ्यक्रमः समसामयिकः न। शिक्षणे वैज्ञानिकविधीनां प्रयोगाभावः।

परिहारोपायाः—संस्कृतं कठिनभाषेति छात्राः, शिक्षकाः, अभिभावकाश्च बिभ्यति। अतः संस्कृतं विद्यालयीयबोधनविषयत्वेन न स्थापनीयमिति विचारः न स्वीकरणीयम्। यतो हि प्रत्येकस्यां भाषायां अंशद्वयं भवति। एको भवति, नियमनम्, द्वितीयं भवति नियमे नियन्त्रणम्। भाषायां लिङ्गविभक्तिप्रत्ययादयः किमर्थमित्युक्ते उत्तरं दातुमेवं प्रभवामः यत् नियमार्थम् इति। ग्रीक्- फ्रेन्च इत्यादिभाषासु अपि नियमाः

सन्त्येव। विशिष्य आङ्गलभाषायां तादृशा बहवो नियमाः सन्ति। अतः न केवलं संस्कृतं किन्तु सर्वा भाषाः छात्रेभ्यः कठिना एव भवन्ति। अयं विचारः भाषाशास्त्रविद्भिरपि सुनिश्चितः।

संस्कृते सन्धिविग्रहद्विवचनाद्यंशा बालानां काठिन्ये मूलहेतव इति जनश्रुतिः। एवमेव द्विवचनप्रयोगे छात्राः बहुकाठिन्यमनुभवन्तीत्यपि विषयः प्रत्यक्षगोचर एव। विश्वे अन्यस्यां कस्यामपि भाषायां एतादृशप्रयोगः नास्तीति, इदमेव संस्कृतस्य वैशिष्ट्यमिति वयं जानीमः। परमेतादृशेन अपूर्वप्रयोगेन बालाः भ्रमिता भवन्ति खलु। अपि च धातूनां दशविधलकाराणां ज्ञानं, पुनः तत्तल्लकाराणां प्रयोगः अवश्यं कठिनायते एव। एवं प्रकारेण बहुविधविनिन्दकवचनानि अस्माकं कर्णपथे पतन्ति।

द्वितीयः किमस्ति संस्कृतं तु प्राचीनभाषा। अत्र नवीनतत्वानां प्रवेशः, प्रस्तावो वा नास्ति। अद्यतनीया विषया एव संस्कृते न दृश्यन्ते। अतः एतादृश्यां भाषायां कथं वा छात्राः अभिरुचिं प्रदर्शयन्ति। यदि विना छात्रासक्तिं, शिक्षकोऽपि असहायक एव भवति। अत्रायमुपायो विचारणीयः, पालनीयश्च यत् एकमेव पदं बहुष्वर्थेषु न प्रयोक्तव्यम्। एकः शब्दः एकस्मिन्नेवार्थे प्रयोक्तव्यः। तेन कारणेन पठनपाठनं सुकरं भवति।

संस्कृते त्रीणि वचनानि, त्रीणि लिङ्गानि भवन्ति किल। उदाहरणार्थं पश्यन्तु। एतत् शब्दस्य षष्ठी-एकवचनरूपं सुकरमेव। तत्र एतस्य-एतस्याः एतस्य इति भवन्ति रूपाणि। परं तयोः इति द्विवचन कथनेन सः प्रयोग-पुल्लिङ्गे, स्त्रीलिङ्गे अथवा क्लीबलिङ्गे इति वक्तुं न पारयामः। कुत इति चेत् सर्वत्र समानः प्रयोगः प्रकरणवशादेवात्र समाधानं मिलति।

संस्कृते नानार्थककोशा अपि भ्रमजनकाः भवन्ति। तर्हि किं समाधानमिति चिन्तने अस्माकं पुरतः एकमात्रोपायः आगच्छति-संस्कृतमाध्यमेन संस्कृतशिक्षणम्। पुनः अत्र एकः प्रश्नः नूनमुदेति संस्कृतमाध्यमेन संस्कृतशिक्षणं कथम् ? यतो हि संस्कृते पठन-पाठनार्थं गीर्वाणवाण्यां रचिता ग्रन्थाः न सन्तीति। आम् एतत्तु सत्यमेव। अन्यस्यां भाषायां विद्यमानानां पुस्तकानि पठित्वा संस्कृतमाध्यमेन पाठनं, लेखनं वा कष्टात्कष्टतरम्। छात्रास्तु नितरामशक्ता एव।

अतः अत्रेदं विचार्यते यत् समानार्थकपदकोशः झटिति संस्कृतभाषायां निर्मातव्यः। विशिष्य वैज्ञानिकपदकोशस्तु अधुनैव आवश्यकः। तत्तत्प्रान्तीयभाषासु एतादृशप्रयत्नः विहितः, सफलश्च जातः। परं संस्कृते नैतावत्पर्यन्तं कार्यारम्भः एव न जातः। अनेन संस्कृतभाषा प्रगतिपथि न गच्छति।

छात्राणां वैयक्तिकभिन्नता अपि मुख्यसमस्या अस्ति। विभिन्नभाषाभाषिणां छात्राणां कृते एकस्याः संस्कृतभाषायाः पाठने विधिः क इति। अत्रापि परिशोधकैः अनुसन्धानं कार्यम्।

वस्तुतस्तु संस्कृते लिङ्गविभक्तिवचनादिविभागः न काठिन्याय। परं तद्भाषायाः महत्त्वप्रतिपादकः। पदसौष्ठवसम्पत्तिरिति या श्रूयते सैव। तर्हि तत्तत्सन्दर्भेषु कण्ठस्थीकरणं करणीयमेव। पाश्चात्यविदुषां मते तु सर्वदा सर्वथा कण्ठस्थीकरणं निराकृतम् इति चेत् न।

भाषाध्ययनतत्त्वेषु बालकः प्रथमम् अनुकृत्य भाषते। ततः कण्ठस्थीकरणेन च। बालकेषु या स्मृतिशक्तिः वर्त्तते सा स्मृतिः संस्कृतेन अभिवर्धते। तदर्थं यत्नो विधेयः। अन्यथा सा शक्तिः निरुपयोगिनी, दुरुपयोगिनी वा भविष्यति। अतः पदरूपाणां, धातुरूपाणां तु कण्ठपाठः करणीयः एव। भारतदेशे वैदिकपरम्परायां तु एकसन्धानग्राहिणो छात्राः सन्त्येव। अर्थात् तेषां स्मृतिशक्तेः सम्यक् उपयोगः भवतीति।

भाषाशिक्षणे कश्चन वैज्ञानिकक्रमः वर्त्तते। सः क्रमस्तु अनुसार्य एव। यथा— ध्वनि-व्याकरण-भाषासौष्ठव-साहित्यानि। संस्कृतस्यापि पाठने अयमेव क्रमः अनुसरणीयः। तेन संस्कृताध्यापनं सरलं, सुकरं, समस्यारहितं च भवति।

निष्कर्षतया इदं वक्तुं शक्यं यत् संस्कृतमाध्यमेन संस्कृतशिक्षणमेव सर्वासाम् अध्यापनसमस्यानां परिष्कारमार्गः। अध्यापकः यदि अस्मिन् विषये यतते तर्हि छात्रा अपि तमनुसरन्ति।

अन्ये उपायाः —

१. संस्कृते पुस्तकानां निर्माणम्।

२. योग्यशिक्षकाणां निर्माणम्।

३. समानार्थकपदकोशस्य निर्माणम्।

४. विविधसंस्थानां मध्ये समन्वयसाधनम्।

५. उपकरणानां निर्माणम्।

६. शिक्षणे सङ्गणकविज्ञानस्य उपयोगः।

७. सेवाकालीन प्रशिक्षण कार्यक्रमणाम् आयोजनम्।

८. शिक्षकप्रशिक्षणकार्यक्रमेषु गुणवत्तायाः आयनम्।

९. छात्रेषु, अध्यापकेषु विद्यमानस्य उपेक्षाभावनायाः निष्कासः।

१०. संस्कृतभाषा प्रचारप्रसार कार्यक्रमाणां निरन्तरम् आयोजनम्।

११. विविध संस्थाभिः प्रचाल्यमानां संस्कृतकार्याणां समन्वयः।

❑

२६. संस्कृतविश्वविद्यालयाः

१. राष्ट्रियसंस्कृतसंस्थानम् मानितविश्वविद्यालयः, नवदेहली।

कुलाधिपतिः—**श्री अर्जुन सिंहः** मानवसंसाधनविकासमन्त्री, भारतसर्वकारः।।
कुलपतिः —**प्रो. राधा वल्लभ त्रिपाठी**

ध्येयवाक्यम् - योऽनूचानः स नो महान्।

अस्य संस्थानस्य अधीने दश परिसराः सन्ति।

१. श्रीसदाशिवपरिसरः, पुरी, ओडिशा।

२. राजीवगान्धिपरिसरः, शृङ्गेरी, कर्णाटकम्।

३. जयपुरपरिसरः, जयपुरम्, राजस्थानम्।

४. गुरुवायूरु परिसरः, गुरुवायूरु, केरलम्।

५. रणबीर परिसरः, जम्मू।

६. भोपालपरिसरः, भोपालः, मध्यप्रदेशः।

७. लक्नोपरिसरः, लक्नो, उत्तरप्रदेशः।

८. के. जे. सोमय्या परिसरः, मुम्बै, महाराष्ट्रम्।

९. गर्लीपरिसरः, गर्ली, हिमाचलप्रदेशः।

१०. गङ्गानाथ झा परिसरः, इलाहाबाद, उत्तरप्रदेशः।

२. राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, आन्ध्रप्रदेशः।

कुलाधिपतिः - श्रीयुत जानकी वल्लभ पटनायकः

कुलपतिः - प्रो. हरेकृष्ण शतपथी

ध्येयवाक्यम् - तमसो मा ज्योतिर्गमय।

३. श्रीलालबहादूरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली

कुलपतिः - प्रो. वाचस्पति उपाध्यायः,

ध्येयवाक्यम्-विद्यया विन्देतऽमृतम्।

४. सम्पूर्णानन्द संस्कृतविश्वविद्यालयः, वाराणसी।

कुलपतिः-प्रो. वेम्पटि कुटुम्बशास्त्री

ध्येयवाक्यम् - श्रुतं मे गोपाय।

५. जगद्गुरु रामानन्दाचार्य राजस्थान संस्कृतविश्वविद्यालयः, जयपुरम्।

कुलाधिपतिः - श्री एस. के. सिंहः

कुलपतिः - प्रो. युगल किशोर मिश्रः

कुलसचिवः - श्री मदन मोहन शर्मा

ध्येयवाक्यम् - ऋतं च स्वाध्यायप्रवचने च।

६. श्रीजगन्नाथसंस्कृतविश्वविद्यालयः पुरी, उडीशा।

कुलाधिपतिः - श्री रामेश्वर प्रसाद ठाकुर

कुलपतिः-गोपीनाथ मिश्रः

ध्येयवाक्यम् - सत्यं ज्ञानम् अनन्तम्

कुलसचिवः - श्रीयुक्त रामचन्द्र मिश्रः

७. कविकुलगुरुकालिदास संस्कृतविश्वविद्यालय, रामटेक्, महाराष्ट्रम्।

८. कामेश्वरसिंहदर्भङ्गासंस्कृतविश्वविद्यालयः, दर्भङ्गा, बिहारम्।

९. जगदगुरु आदिशङ्कराचार्य संस्कृतविश्वविद्यालयः, कालडी, केरलम्।

१०. श्री सोमनाथ संस्कृत विश्वविद्यालयः, गुजरात।

११. उत्तराञ्चल संस्कृत विश्वविद्यालयः, हरिद्वारम्।

❑

आदर्शपाठयोजना

(गद्यम्)

विद्यालयस्य नाम	:	दिनांकः	:
छात्राध्यापकस्य नाम	:	वासरः	:
		अन्तरम्	:
कक्ष्या	:	अवधिः	:
विभागः	:	विषयः	:
छात्रसंख्या	:	पाठः	:
मध्यायुः	:	शीर्षिका	:

सामान्योद्देश्यानिः–१–संस्कृतगद्यसाहित्यं प्रत्यभिरुच्युत्पादनम्।
२–विविधगद्यशैलीनां परिचयप्रदानम्।
३–शब्दभण्डारस्य वर्धनम्।
४–रचनाशक्तेः, कल्पनाशक्तेश्च वर्धनम्।
५–व्यवहारदक्षतायाः प्रदानम्।
६–भावाभिव्यक्तेः अवसरसम्पादनम्।

पूर्वज्ञानम्– : छात्रेषु गुरुभक्तिविषये, एकलव्यकथायां च पूर्वज्ञानमस्ति॥

बोधनोपकरणानि : १–पाठ्यपुस्तकम्, २–सुधाखण्डः, ३–मार्जनी, ४–श्यामपट्टः, ५–वर्णचित्रम्, ६–सूचीदण्डः।

विशिष्टोद्देश्यानि :-

ज्ञानात्मकानि : १–छात्राणां गुरुभक्तिविषये ज्ञानप्रदानम्।
२–"कृषितो नास्ति दुर्भिक्षम्, यत्ने कृते सर्वं सिद्ध्यति" इति प्रयत्नस्य महत्त्वज्ञापनम्।
३–विद्याविषये जातिमतादिनिरपेक्षवादस्य ज्ञानम्।

अवबोधात्मकानि : दृढदीक्षा, निश्चलता, अवसत्, स्म, श्रुत्वा, कृताञ्जलिः, शुश्रूषा, आकर्ण्य, अनर्थम्, न केवलं–किन्तु, श्रुत्वैतत्, प्रस्थितः, कुटीरं, यथाकथञ्चित्, मृत्तिका, एकत्र।

अभिरुच्यात्मकानि : गुरुसेवने, कार्यसाधने, दृढदीक्षायां च छात्राः रुचिं प्रदर्शयेयुः।

उपयुक्तग्रन्थाः : अमरकोशः, महाभारतम्, रूपचन्द्रिका,
(Sanskrit – English – Sanskrit Dictionary)

सोपानानि	पाठ्यबिन्दु	लक्षिताधिगमविशेषः
प्रस्तावना (Preparation)		पूर्वज्ञानपरीक्षणम्। अभिप्रेरणसम्पादनम्। ज्ञातांशस्य स्मारणम्।
उद्देश्यकथनम् (Aim of Teaching)	गुरुभक्तिः	पाठोन्मुखीकरणम्
पाठप्रस्तुतीकरणम् (Announcement of Topic)	"गुरुः ब्रह्मा... इति प्रत्यवदत्।"	पाठ्यांशस्पष्टीकरणम्।

अध्यापक–छांत्रप्रक्रिया:	श्यामफलकलेखनम्
अ– वेदा: कति ?	
छा– वेदा: चत्वार: ।	
अ– ते के ?	
छा– ते ऋग्वेद:, यजुर्वेद:, सामवेद:, अथर्ववेद:।	
अ– उपवेदा: कति ?	
छा– उपवेदा:, चत्वार:।	
अ– ते के ?	
छा– आयुर्वेद:, धनुर्वेद:, गान्धर्ववेद:, स्थापत्यवेद:।	
अ–धनुर्वेदे क: सुप्रसिद्ध: ?	
छा– धनुर्वेदे अर्जुन: सुप्रसिद्ध:।	
अ – अर्जुनस्य गुरु: क: ?	
छा– अर्जुनस्य गुरु: द्रोणाचार्य:।	
अ – अन्यं धनुर्वेदनिपुणं जानन्ति वा ?	
छा– आम्।	
अ– स: क: ?	
छा– स: एकलव्य:।	
अ– अद्य वंय "गुरुभक्ति: इति पाठं पठाम:।	
छा– "तथैव" इति वदन्ति।	गुरुभक्ति: इति
अ– भवतां संस्कृतपाठ्यपुस्तके गद्यभागे २७ पृष्ठे आदित: तृतीयपरिच्छेदपर्यन्तं पश्यन्तु।	स्पष्टतया लिखति
छा– तथैव इत्युक्त्वा स्वकीयपाठ्यपुस्तकम् उद्घाटय निर्दिष्टं पाठ्यभागं पश्यन्ति।	पृष्ठसंख्यां बृहदक्षरै: लिखति।

गुरुभक्तिः

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।
गुरुस्साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः॥

सर्वस्यापि मानवस्य कार्यसाधने दृढदीक्षा, विश्वासः, निश्चलता च अतीव प्रधानाः। एतैर्विना धनवान् बलवानपि पुरुषः न किमपि कार्यं कर्तुं समर्थः।

हस्तिनापुरप्रान्ते वने हिरण्यधन्वा नाम कश्चित् किरातनायकः अवसत्। तस्य एकलव्य नामा कुमारः अभवत्। स च युवा स्वपितृसमीपे अल्पशः धनुर्विद्यामभ्यस्तवान्। तस्यां विद्यायामधिकं प्रावीण्यं प्राप्तुं समर्थवन्तं गुरुम् अन्विष्यति स्म। धनुर्विद्यायां द्रोणाचार्य एव सर्वमहानिति बहुभ्यः श्रुत्वा कथञ्चित् तस्य समीपमुपगम्य कृताञ्जलिः एवं विज्ञापयामास "भोः गुरुदेव! अहं किरातनायकस्य हिरण्यधन्वनः पुत्रः। एकलव्य नामधेयोऽहम्। मम पितुः समीपे धनुर्विद्या मया अल्पशः अभ्यस्ता। भवतः शुश्रूषया अस्यां विद्यायामधिकतरं नैपुण्यं प्राप्तुमिच्छामि इति।

तदाकर्ण्य द्रोणाचार्यः "कुमार! त्वं किरात इति वदसि। धनुर्विद्या वेदसमाना। अस्यामपि विद्यायां प्रयोगोपसंहारमन्त्राः बहवस्सन्ति। मन्त्राणामुच्चारणदोषेण न केवलं फलाप्राप्तिः, किन्त्वनर्थमापतिष्यति। अतस्ते धनुर्विद्या न शिक्षणीया। तव श्रेयः अभिलषन्नेव कथयामि" इति प्रत्यवदत्॥

सोपानानि	पाठ्यबिन्दु	लक्षिताधिगमविशेषः
आदर्शवाचनम् (Ideal Reading)	"गुरुः ब्रह्मा... इति प्रत्यवदत्।"	सुवाचनस्य आदर्शप्रस्तुतीकरणम् श्रवणकौशलसम्पादनम्
अनुवाचनम्	"गुरुः ब्रह्मा..... इति प्रत्यवदत्।"	पठनकौशलसम्पादनम् उच्चारणसामर्थ्यसम्पादनम्।
त्रुटिसंशोधनम्	निश्चलता, धनुर्विद्या, हिरण्यधन्वा, शुश्रूषा, प्रावीण्यम्, निर्विण्णः, नमस्कृत्य।	स्पष्टोच्चारणसम्पादनम्। लेखनकौशलसम्पादनम्।

अध्यापक-छात्रप्रक्रिया:	श्यामफलकलेखनम्
अ-कक्ष्योचितस्वरेण, अल्पविराम, पूर्णविरामादिचिह्नानि, वाचननियमाँश्च अनुसृत्य प्रभावो-त्पादकरीत्या आदर्शवाचनं करोति।	
छा- शृण्वन्ति।	
अ- द्वित्रिछात्रान् अनुवाचनाय आदिशति।	
छा- निर्दिष्टाः छात्राः पठन्ति। अन्ये छात्राः शृण्वन्ति।	
अ-अनुवाचनसमये आगतदोषान् छात्रैरेव निवारयति।	
छा-दोषाणां निवारणं कुर्वन्ति।	निश्चलता, धनुर्विद्या,
अ-द्वित्रिछात्रान् एतानि पदानि श्यामफलक-लेखनाय आदिशति।	हिरण्यधन्वा, शुश्रूषा,
छा-तथा कुर्वन्ति।	प्रवीणः,
अ-लेखनसमये आगतदोषान् अन्यछात्रैः निवारयति।	निर्विण्णः, नमस्कृत्य

सोपानानि	पाठ्यबिन्दु	लक्षिताधिगमविशेषः
पाठविकासः काठिन्यनिवारणम्	वनम्	पर्यायपदज्ञानम्।
	निश्चलता	अर्थावबोधनम्।
	अवसत्	क्रियापदज्ञानम्।
	स्म	प्रत्ययप्रयोगपरिचयः।
		वाचनकौशलसम्पादनम्।

अध्यापक-छात्रप्रक्रिया:	मूल्याङ्कनम्
अ-वनम्-अरण्यम् अटवी/अरण्यम्/विपिनम्/काननम्/वनम्।	"वनम् इति पदस्य पर्यायपदानि वदत।
छा- स्वस्वसञ्चिकासु लिखन्ति।	
अ- एकं छात्रमाह्वयति। रमेश! निश्चलो भव! इत्यादिशति। सः चलनरहितः तिष्ठति। छात्राः! इदानीं रमेशः कथं तिष्ठति ?	"निश्चलता" इत्यस्य कः अर्थः ?
छा-निश्चलेन तिष्ठति।	
अ-मुनयः कथं तपः कुर्वन्ति।	मुनयः कथं तपः कुर्वन्ति।
छा-मुनयः निश्चलेन तपः कुर्वन्ति।	
अ-"निश्चलता" इति पदस्य कः अर्थः ?	
छा-एकाग्रबुद्धिः इत्यर्थः। (स्वीकृतकार्ये एव प्रवर्तनम्)	
अ-"वस्" धातोः, लङ् प्रथमपुरुष-एकवचनम्। एक. द्वि. बहु. अवसत् अवसताम् अवसन्।	अभवत्, अपश्यत्, अकथयत् - इत्यादीनां प्रथमपुरुष रूपाणि वदत।
अ- "वर्तमानकालिकक्रियायाः 'स्म' इति प्रत्यय योजनेन सा क्रिया भूतकालिका भवति। यथा—पठति (स्म) लिखति (स्म), खादति (स्म)	"स्म" प्रत्ययमुपयुज्य वाक्यद्वयं कथयतु। एकलव्यः कमन्विष्यति स्म ?

सोपानानि	पाठ्यबिन्दु	लक्षिताधिगमविशेषः
	शुश्रूषा	अर्थज्ञानम्
	न केवलम्–किन्तु	अनुप्रयोगसामर्थ्य संपादनम्।
अवबोधप्रश्न		अर्थावगमनपरीक्षणम्

अध्यापक-छात्रप्रक्रिया:	मूल्याङ्कनम्
अ- भोक्तुमिच्छा-बुभुक्षा	भोक्तुमिच्छा
पातुमिच्छा - पिपासा	—— ?
गन्तुमिच्छा - जिगमिषा	पातुमिच्छा —— ?
श्रोतुमिच्छा — शुश्रूषा	जिगमिषा —— ?
कस्य शुश्रूषया विद्या आगच्छति ?	
छा-गुरो: शुश्रूषया विद्या आगच्छति।	
अ-एकलव्य: कस्य शुश्रूषया धनुर्विद्यां प्राप्तुम् अभिलषति स्म ?	
छा-एकलव्य: द्रोणाचार्यस्य शुश्रूषया धनुर्विद्यां प्राप्तुमभिलषति स्म।	
अ- तेजस्वी न केवलं हिन्दी किन्तु संस्कृतमपि वदति। सुषमा न केवलं संस्कृतं पठति किन्तु लिखति।	
छा-कक्ष्यायां न केवलं बालका: किन्तु बालिका: अपि सन्ति।	
अ- मन्त्राणां दोषोच्चारेणेन न केवलं फलावाप्ति: किन्तु अनर्थमपि भविष्यति।	
अ- हस्तिनापुरप्रान्ते वने क: अवसत् ?	

सोपानानि	पाठ्यबिन्दु	लक्षिताधिगमविशेष:
विचारविश्लेषणम्	कार्यसाधनम्	विषयपरिज्ञानम्
	कृताञ्जलिः	विचारावगाहनम्

अध्यापक-छात्रप्रक्रिया:	मूल्याङ्कनम्
छा-हस्तिनापुरप्रान्ते वने हिरण्यधन्वा अवसत्।	
अ-एकलव्यस्य पिता क: ?	
छा-एकलव्यस्य पिता हिरण्यधन्वा।	
अ-धनुर्विद्यायां सर्वमहान् क: ?	
छा-धनुर्विद्यायां सर्वमहान् द्रोणाचार्य:।	
अ-वेदसमाना का ?	
छा-वेदसमाना धनुर्विद्या।	
अ-धनुर्विद्यायां कीदृशा: मन्त्रा: भवन्ति ?	
छा-धनुर्विद्यायां प्रयोगोपसंहारमन्त्रा: भवन्ति।	
अ-लक्ष्यसाधनमित्यर्थ: तर्हि लक्ष्यसाधने प्रधानकारणानि भवन्ति-दृढदीक्षा, विश्वास:, निश्चलता।	कार्यसाधने अतीव प्रधाना: के ?
छा-शृण्वन्ति।	
अ-पितृभ्यां, गुरुणा, वृद्धै: सादरं सविनयं व्यवहर्तव्यम्। तथैव गुरुसमीपे एकलव्य: कृताञ्जलि: (विनयेन नमस्कृत्य) प्रार्थयामास।)	कृताञ्जलि: इत्यस्य क: भाव: ?

सोपानानि	पाठ्यबिन्दु	लक्षिताधिगमविशेषः
सारांशकथनम्	समग्रपाठः	पाठस्य सिंहावलोकनम्
मौनवाचनम्	समग्रपाठः	वाचनकौशलसम्पादनम्
पुनरावृत्तिप्रश्नाः	समग्रपाठः	ज्ञातांशस्य स्पष्टीकरणम्

अध्यापक-छात्रप्रक्रिया:	मूल्याङ्कनम्
अ-हस्तिनापुरप्रान्ते वने हिरण्यधन्वा नाम किरातनायकः निवसति स्म। तस्य पुत्रः एकलव्यः। सः स्वपितुः समीपे धनुर्विद्याम् अभ्यस्तवान्। तस्यां नैपुण्यं प्राप्तुं धनुर्विद्यायां सर्वमहान्तं द्रोणाचार्यं अधिगम्य "भवतः शुश्रूषया धनुर्विद्यायां नैपुण्यं प्राप्तुमिच्छामि" इति प्रार्थितवान्। द्रोणाचार्यः, "कुमार! किरातस्य तव धनुर्विद्या न शिक्षणीया। यतः अस्यां विद्यायां शरानां प्रयोगाय उपसंहरणाय च मन्त्राः भवन्ति। यदि मन्त्राणाम् उच्चारणे दोषः आगच्छति तर्हि फलं न प्राप्नोति। अपि च अनर्थमपि सम्भविष्यति" इति उक्तवान्॥	
अ-मौनवाचनाय छात्रान् आदिशति।	
छा-मौनवाचनं कुर्वन्ति।	
अ-मौनवाचनसमये कक्षायां छात्राणां मध्ये इतस्ततः परिभ्रम्य छात्रान् परिशीलयति।	
अ-१-कार्यसाधने के प्रधानाः ?	
२-किरातनायकः हिरण्यधन्वा कुत्र निवसति ?	
३-एकलव्यः कस्य पुत्रः ?	
४-धनुर्विद्यायां सर्वमहान् कः ?	
५-एकलव्यः द्रोणाचार्यस्य समीपं गत्वा किमुक्तवान् ?	
६-"स्म" प्रत्ययस्य प्रयोगः कथम् ?	
७. "वनम्" शब्दस्य पर्यायपदानि वदत।	

सोपानानि	पाठ्यबिन्दु	लक्षिताधिगमविशेषः
गृहकार्यम्	समग्रपाठः	ज्ञातांशस्य दृढीकरणम् प्राप्तज्ञानस्य प्रयोगावसरप्रदानम् नूतनज्ञानसम्पादनम्

अध्यापक–छात्रप्रक्रियाः

अ– १–कार्यकरणे कः समर्थः ?

२– वेदसमाना का ?

३– धनुर्विद्यायां कीदृशाः मन्त्राः सन्ति ?

४– "शुश्रूषा" इति शब्दस्य कः अर्थः ?

५– न केवलं – किन्तु इति पदं स्ववाक्ये योजयत ?

६– योजयत–

(क) भोक्तुमिच्छा	– शुश्रूषा	( )
(ख) पातुमिच्छा	– बुभुक्षा	( )
(ग) गन्तुमिच्छा	– पिपासा	( )
(घ) श्रोतुमिच्छा	– जिगमिषा	( )

आदर्शपाठयोजना

(पद्यम्)

विद्यालयस्य नाम	:	दिनांकः	:
छात्राध्यापिकायाः नाम	:	वासरः	:
कक्ष्या	:	अन्तरम्	:
विभागः	:	अवधिः	:
छात्रसंख्या	:	विषयः	:
मध्यायुः	:	पाठः	:

सामान्योद्देश्यानिः–

१– संस्कृतपद्यसाहित्यं प्रत्यभिरुच्युत्पादनम्।

२– विविन्नपद्यशैलीनां परिचयप्रदानम्।

३– श्लोकपठनपद्धतेः अभ्यासः।

४– भावनाशक्तेः,सर्जनात्मकतायाः,
विमर्शनात्मकशक्तेः च वर्धनम्।

५– सौन्दर्यानुभूतेः रसानन्दस्य च
अवसरप्रकल्पनम्।

६– भाषाकौशलानां अभिवर्धनम्।

७– अलङ्काराणां विविधछान्दसां परिचयः।

८– कवेः काव्यस्य च विषये
अभिरुच्युत्पादनम्।

विशिष्टोद्देश्यानि :—

ज्ञानात्मकानि	:	१- नागः, शर्वरी, कं, प्रमदाः, जलरुहैः, तुरंगः।
अभिरुच्यात्मकानि	:	जलरुहैः, व्याकरणेन,
कौशलात्मकानि	:	पूर्णेन्दुना, नित्योत्सवैः, व्याकरणेन हंसमिथुनैः सत्पुत्रेण।
पूर्वज्ञानम् :—	:	छात्राणां सुभाषितश्लोकानां पठने भावावगमने पूर्वज्ञानमस्ति।
बोधनोपकरणानि	:	१-पाठ्यपुस्तकम् २-सुधाखण्डः ३-मार्जनी ४-श्यामपट्टः ५-वर्णचित्रम् ६-सूचीदण्डः।
विशिष्टोपकरणानि		१-नागः २-तुरंगः ३-व्याकरणग्रन्थः ४-चषकः ५-हंसमिथुनम् ६-पूर्णचन्द्रः

सोपानानि	पाठ्यबिन्दु	लक्षिताधिगमविशेषः
प्रस्तावना		पूर्वज्ञानपरीक्षणम्।
उद्देश्यकथनम्		पाठोन्मुखीकरणम्। पाठ्यांशस्पष्टीकरणम्।
आदर्शवाचनम्	नागो भाति..... लोकत्रयं विष्णुना	सुवाचनस्य आदर्श- प्रस्तुतीकरणम्। श्रवणकौशलसम्पादनम्।
अनुवाचनम्	नागोभाति...... लोकत्रयं विष्णुना	उच्चारणसामर्थ्यसम्पादनम्। पठनकौशलसम्पादनम्।

अध्यापक-छात्रप्रक्रिया:	मूल्याङ्कनम्
अ- छात्रा:! एकं सुभाषितश्लोकं वदत ?	
छा-विद्याददाति विनयं विनयाद्याति पात्रताम्। पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततस्सुखम्॥	
अ-अन्यम् एकं सुभाषितश्लोकं वदत।	
छा-अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति! व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्॥	
अ-अद्य "नागो भाति मदेन" इति सुभाषितश्लोकं पठामः।	
छा-पाठ्यपुस्तके १४ पृष्ठम् उद्घाट्य, "सुभाषितानि" इति पाठे चतुर्थं श्लोकं पश्यन्तु।	
छा-तथैव कुर्वन्ति।	
अ-गति, यति, लय, छन्दः पुरस्सरं प्रभावोत्पादकरीत्या कक्ष्योचितस्वरेण आदर्शवाचनं करोति।	
छा-शृण्वन्ति।	
अ-द्वित्रिछात्रान् अनुवाचनाय आदिशति।	
छा-आदिष्टाः छात्राः अनुवाचनं कुर्वन्ति।	
अ-अनुवाचनसमये आगतदोषान् छात्रैरेव निवारयति।	

सोपानानि	पाठ्यबिन्दु	लक्षिताधिगमविशेषः
त्रुटिसंशोधनम्	पूर्णेन्दुना नित्योत्सवैः हंसमिथुनैः सत्पुत्रेण विष्णुना	पठनलेखनकौशलयोः सम्पादनम्।
पाठविकासः काठिन्यनिवारणम्	नागः	व्युत्पत्त्यर्थज्ञानम्।
	कम्	अर्थावबोधनम्।
	पूर्णेन्दुना	सन्धिज्ञापनम्।

अध्यापक-छात्रप्रक्रियाः	मूल्याङ्कनम्
छा-एतानि पदानि श्यामफलके लेखनाय द्वित्रिछात्रान् आदिशति। लिखितेषु पदेषु दोषान् अन्यैरेव छात्रैः निवारयति।	
अ-न अगः - नागः। अगः इत्युक्ते पर्वतः। पर्वतः न, परन्तु पर्वत इव वर्तते। २- नगे भवः। नागः इत्युक्ते कः अर्थ ? (नागस्य चित्रं प्रदर्श्य बोधयति)	नागशब्दस्य व्युत्पत्त्यर्थं किम् ? "नाग" शब्दस्य अर्थ कः ?
अ-(चषके जलं संस्थाप्य बोधयति) चषके किं अस्ति ?	नागः केन भाति ? चषके किम्
छा-चषके जलम् अस्ति।	अस्ति ?
अ-चषके <u>कम्</u> अस्ति। कम् इति पदस्य कः अर्थः ?	"कम्" इत्यस्य पदस्य कः
छा-जलम् इत्यर्थः।	अर्थः ?
अ-जलं कैः भाति ?	जलं कैः भाति ?
छा-जलं जलरुहैः भाति।	
अ-पूर्णेन्दुना इति पदं विभजत ?	नित्योत्सवैः इति
छा-पूर्ण + इन्दुना।	पदं विभज्य
अ-कः सन्धिः ?	सन्धिनाम
छा- गुणसन्धिः।	वदत ?

सोपानानि	पाठ्यबिन्दु	लक्षिताधिगमविशेषः
	शर्वरी	पर्यायपदज्ञानम्।
अवबोधात्मकप्रश्नाः		अवबोधपरीक्षणम्।
विचारविश्लेषणम्	पूर्णेन्दुः	विचारात्मकशक्तेः वर्द्धनम्।
	नित्योत्सवैः	

अध्यापक–छात्रप्रक्रिया:	मूल्याङ्कनम्
अ–शर्वरी/निशा/निशीथिनी/रात्रि:/त्रियामा/क्षणदा/ क्षपा/यामिनी/विभावरी/तमस्विनी/रजनी/तमी। छा–स्वसञ्चिकासु लिखन्ति। अ–शर्वरी इत्यस्य कः अर्थः ? छा–रात्रिः इत्यर्थः। अ–शर्वरी केन भाति ? छा–शर्वरी पूर्णेन्दुना भाति ? अ–१–नागः इति शब्दस्य कः अर्थः ? २–नागः केन भाति ? ३–कम् इति शब्दस्य कः अर्थः ?	शर्वरी इति पदस्य कः अर्थः ? शर्वरी केन भाति ? "शर्वरीति पदस्य पर्यायपदानि वदत ?
४–पूर्णेन्दुना इत्यत्र सन्धिः कः ? ५–शर्वरी इति पदस्य पर्यायपदानि वदत। ६–कम् कैः भाति ? अ–पूर्णेन्दुः सम्पूर्णचन्द्रः। सम्पूर्णचन्द्रः कस्मिन् दिने भाति। छा–सम्पूर्णचन्द्रः पूर्णिमायां भाति। अ–रात्रिः केन भाति ? छा–रात्रिः पूर्णचन्द्रेण भाति ? अ–रात्रिः केन भाति ? छा–रात्रिः पूर्णचन्द्रेण भाति ? **२–नित्योत्सवैः**	सम्पूर्णचन्द्रः कदा भाति ? रात्रिः कदा भाति ?
अ–जगन्नाथमन्दिरे सदा उत्सवाः प्रचलन्ति। तादृशैः नित्योत्सवैरेव मन्दिरम् भवति। यत्र नित्यम् उत्सवाः न भवन्ति तत् मन्दिरम् न भवति।	नित्योत्सवैः किं प्रकाशते ?

सोपानानि	पाठ्यबिन्दु	लक्षिताधिगमविशेष:
	व्याकरणम्	
	लोकत्रयम्	
सारांशकथनम्	समग्र: श्लोक:	विषयावबोधनम्। समग्रश्लोकस्य अवबोध:।
	नागो भाति..... विष्णुना	उच्चारणकौशल-सम्पादनम्।

<table>
<tr><th>अध्यापक-छात्रप्रक्रिया:</th><th>मूल्याङ्कनम्</th></tr>
<tr><td>

३-व्याकरणम् :

अ-व्याकरणेन साधु-असाधु शब्दज्ञानम् भवति। व्याकरणेन साधुशब्दप्रयोगे निष्णात: भवति। अत: व्याकरणेन वाक् शोभते।

</td><td>व्याकरणेन कीदृशं शब्दज्ञानं भवति ?</td></tr>
<tr><td>

४-लोकत्रयम् :

अ-भू:, भुव:, स्व:। पाताललोकम्, भूलोकम्, स्वर्लोकम्। एतत् लोकत्रयं केन भाति ?

छा-लोकत्रयं विष्णुना भाति।

अ-
<table>
<tr><td>गज:</td><td>मदेन</td><td rowspan="2">भाति</td></tr>
<tr><td>जलम्</td><td>जलरुहै:</td></tr>
<tr><td>रात्रि:</td><td>पूर्णचन्द्रेण</td><td rowspan="4">शोभते</td></tr>
<tr><td>स्त्रिय:</td><td>शीलेन</td></tr>
<tr><td>अश्व:</td><td>वेगेन</td></tr>
<tr><td>मन्दिरम्</td><td>उत्सवै: नित्यै:</td></tr>
<tr><td>वाक्</td><td>व्याकरणेन</td><td rowspan="6">प्रकाशते</td></tr>
<tr><td>नद्य:</td><td>हंसमिथुनै:</td></tr>
<tr><td>सभा</td><td>पण्डितै:</td></tr>
<tr><td>कुलम्</td><td>सत्पुत्रेण</td></tr>
<tr><td>पृथिवी</td><td>राज्ञा</td></tr>
<tr><td>लोकत्रयम्</td><td>विष्णुना</td></tr>
</table>

अ-छात्रान् सुस्वरवाचनाय आदिशति।

छा-अध्यापकस्य आदर्शवाचनेन प्रभाविता: छात्रा: सुष्ठु सुस्वरवाचनं यति, लय, छन्द: पुरस्सरं कुर्वन्ति।

अ-समग्रकक्ष्यां निरीक्षते।

</td><td>वाक् केन शोभते ?
लोकत्रयम् किम्?
विष्णुना किम् राजते ?</td></tr>
</table>

सोपानानि	पाठ्यबिन्दु	लक्षिताधिगमविशेषः
पुनरावृत्तिप्रश्नाः	समग्रः श्लोकः	ज्ञातांशस्य स्पष्टीकरणम्।
गृहकार्यम्	समग्रः श्लोकः	ज्ञातांशस्य दृढीकरणम्। लेखनकौशलसम्पादनम्। कल्पनाशक्तेः वर्धनम्।

अध्यापक-छात्रप्रक्रिया:
अ-१-नागः इति शब्दस्य कः अर्थः ? २-नागः केन भाति ? ३-जवेन कः प्रकाशते ? ४-सभा कैः भाति ? ५-शर्वरी इति पदस्य कः अर्थ ? ६-श्लोके पृथिवी - अर्थकः शब्दः कः ? अ- (क) १-कम् इति पदस्य अर्थः कः ? २-मन्दिरं कैः भासते ? ३-जवेन कः भाति ? ४-श्लोके स्त्री अर्थकः शब्दः कः ? ५-"रात्रिः" शब्दस्य पर्यायपदानि वदत। (ख) १-शर्वरी —— भाति। २-कुल —— प्रकाशते। ३-पण्डितैः —— राजते। ४-विष्णुना —— भासते। ५-नद्यः —— विभान्ति। (ग) योजयत। १- नागः (————) पूर्णेन्दुना। २- कुलं (————) नृपेण। ३- शर्वरी (————) हंसमिथुनैः। ४- नद्यः (————) मदेन। ५- वसुधा (————) सत्पुत्रेण।

आदर्शपाठयोजना

(व्याकरणम्)

विद्यालयस्य नाम	:	दिनांक:	:
छात्राध्यापकस्य नाम	:	वासरः	:
कक्ष्या	:	अन्तरम्	:
विभागः	:	अवधिः	:
छात्रसंख्या	:	विषयः	:
मध्यायुः	:	पाठः	:

सामान्योद्देश्यानि:-

१- संस्कृतव्याकरणे अभिरुचेः उत्पादनम्।

२- व्याकरणस्य प्रयोगे प्रेरणासम्पादनम्।

३- व्याकरणसूत्रेषु ज्ञानप्रदानम्।

४- साध्वसाधुशब्दज्ञानम्।

५- उदाहरणद्वारा सूत्रनिर्माणे क्षमतासम्पादनम्।

६- रचनाशक्तेः वर्धनम्।

७- चतुर्षु कौशलेषु सामर्थ्यसम्पादनम्।

विशिष्टोद्देश्यानि—

१- वृद्धिसन्धिविषये ज्ञानावगाहनम्।

२- वृद्धिसन्धेः उदाहरणान्वेषणे प्रेरणाप्रदानम्।

३- वृद्धिसन्धिसूत्रनिर्माणनिरूपणयोः सामर्थ्यसम्पादनम्।

४- पाठ्यपुस्तके विद्यमानेषु विभिन्नपाठेषु वृद्धिसन्धियुक्तपदानामन्वेषणे प्रोत्साहः।

बोधनोपकरणानि : पाठ्यपुस्तकम्, श्यामपट्टः, सुधाखण्डः, सूचीदण्डः, मार्जनी, चित्राणि।

पूर्वज्ञानम् : छात्राणां सन्धिविभाजनं, संयोजने, तथा दीर्घसन्धौ, गुणसन्धौ च ज्ञानं वर्तते।

पद्यपाठः

नागो भाति मदेन कं जलरुहैः पूर्णेन्दुना शर्वरी
शीलेन प्रमदा जवेन तुरगो नित्योत्सवैर्मन्दिरम्।
वाणी व्याकरणेन हंसमिथुनैर्नद्यः सभा पण्डितैः
सत्पुत्रेण कुलं नृपेण वसुधा लोकत्रयं विष्णुना॥

सोपानानि	पाठ्यबिन्दु	लक्षिताधिगमविशेष:
प्रस्तावना	पूर्वज्ञानम्	अभिप्रेरणसम्पादनम्
उद्देश्यकथनम्	पूर्वोदाहरणानां नियम (सूत्र) सम्पादनम्	पाठोन्मुखीकरणम्

अध्यापक-छात्रप्रक्रियाः	मूल्याङ्कनम्
अ-सुषमा विद्यालयं गच्छति।	तस्यैव इतिपदं
वाक्येऽस्मिन् सन्धियुक्तं पदं किम् ?	विभजत ?
छा-'विद्यालयम्'	"नैतावत्"
अ-विद्यालयम् इति पदं विभजत ?	भाग्येनैतत् चौषधैः
छा-विद्या + आलयम्	हस्तेनैव चैतम्
अ-कः सन्धिः ?	पदानि विभजत ?
छा-दीर्घसन्धिः।	
अ-देवेन्द्रः पुस्तकं पठति।	
"देवेन्द्रः" इति पदं विभजत ?	
छा-देव + इन्द्रः	
अ—कः सन्धिः ?	
छा-गुणसन्धिः।	
अ-तथैव, एकैकम्, जातीयैक्यता, गङ्गौघः, दिव्यौषधम् इत्यत्र कः सन्धिः ?	
छा-न जानीमः।	
अ-अद्य वयम् एकैकम्, तथैव, जातीयैक्यता, गङ्गौघः, दिव्यौषधम् इत्यादीनामुदाहरणानाम् आधारेण नियमं पठामः।	
छा-पाठ्यांशे अभिरुचिं प्रदर्शयेयुः।	

सोपानानि	पाठ्यबिन्दु	लक्षिताधिगमविशेषः
पाठप्रस्तुतीकरणम्	तथैव, एकैकम् जातीयैक्यता, गङ्गौघः, दिव्यौषधम्	अभिप्रेरणसम्पादनम्
पाठप्रवर्धनम्	एकैकम् तथैव जातीयैक्यता गङ्गौघः द्विव्यौषधम् महौषधम्	अ - ए - इति वर्णयोः स्थाने ऐकारादेशज्ञानसम्पादनम्
निष्कर्षः	दत्तानि उदाहरणानि	कल्पनाशक्तेः अभिवर्धनम्
सूत्रीकरणम्	दत्तानि उदाहरणानि	सूत्ररचनाशक्तेः संवर्धनम्
सूत्रनिरूपणम्	वृद्धिसन्धेः सूत्रम् उदाहरणपदानि	सूत्रावगाहनम्

अध्यापक-छात्रप्रक्रिया:

अ-पाठ्यवस्तूनि उदाहरणानि पदानि सर्वाणि श्यामफलके लिखति।

छा-लिखितानि पदानि स्वसञ्चिकासु लिखन्ति।

अ- अ + ए = ऐ एक + एकम् = एकैकम्

अ- पूर्वपदे अन्तिमवर्णः कः ?

छा-ककारोत्तरवर्त्ती वर्णः अकारः

आ + एव = तथा + एव = तथैव

अ + ऐ = जातीय + ऐक्यता = जातीयैक्यता

आ + ओ = गङ्गा + ओघः = गङ्गौघः

आ + औ = दिव्य + औषधम् = दिव्यौषधम्

आ + औ = महा + औषधम् = महौषधम्

अ- निष्कर्षं वदन्तु।

छा- अ/आ + ए = ऐ अ/आ + ऐ = ऐ

अ/आ + ओ = औ अ/आ + औ = औ

अ-पूर्वोक्तनिष्कर्षस्य आधारेण सूत्रं कथयन्तु।

अकार-आकारयोः एकारऐकारे परे ऐकारादेशः भवति।

अकार-आकारयोः ओकारऔकारे परे औकारादेशः भवति।

अ-"वृद्धिरेचि" इति सूत्रं, वृत्तिं च परिचाययति।

छा-स्वनिष्कर्षं सूत्रं, पाणिनीयसूत्रञ्च तुलनात्मकतया परिशीलयन्ति।

सोपानानि	पाठ्यबिन्दुः	लक्षिताधिगमविशेषः
अनुप्रयोगः		पठितांशस्य स्पष्टीकरणम्
गृहकार्यम्		पठितांशस्य दृढीकरणम्

अध्यापक–छात्रप्रक्रिया:

१– चैव २–ममैव ३–अरभ्यैव ४– आवृतैव ५– क्षपणैकम्,

६– देवौजसः

अ– अधोलिखितानि पदानि विभजत ?

१– उपैति, क्षणणैकदक्षाम्, चैनम्, तस्यैव, अमितौजसः,

२– शृत्वैतत्,

३– जीवितैषिणाम् हस्तेनैव,

४– वृद्धिसन्धेः सूत्रं विशदयत ?

❑

आदर्शपाठयोजना

(नाटकम्)

विद्यालयस्य नाम	:	दिनांकः	:
छात्राध्यापकस्य नाम	:	वासरः	:
कक्ष्या	:	अन्तरम्	:
विभागः	:	अवधिः	:
छात्रसंख्या	:	विषयः	:
मध्यायुः	:	पाठः	:

सामान्योद्देश्यानि—

१- छात्राणाम् उचितावरोहावरोहणपुरस्सरं संवादकरणाय ज्ञानप्रदानम्।

२- अभिनयकलायाः परिचयप्रदानम्।

३- मानवव्यवहारे परिस्थित्यनुगुणं व्यवहारपरिवर्तनस्य अवसरप्रदानम्।

४- मानवचरित्रस्य परिचयः।

५- भावाभिव्यक्तौ क्षमतासम्पादनम्।

विशिष्टोद्देश्यम्—

१- छात्राणां भासमहाकविना विरचितस्य "अभिषेक" नाटकस्य परिचयः।

२- रावण-विभीषणयोः स्वभावस्य ज्ञानप्रदानम्।

पूर्वज्ञानम् : छात्रैः मातृभाषायां, संस्कृतभाषायां च अनेकानि नाटकानि पठितानि। अपि च नाटकस्य विषयम् अभिनयद्वारा अवगन्तुं पारयन्ति।

बोधनोपकरणानि : पाठ्यपुस्तकम्, श्यामपट्टः, सुधाखण्डः, सूचीदण्डः, मार्जनी, चित्राणि।

पाठ्यांशः —

विभीषणः — प्रसीदतु प्रसीदतु महाराजः। अस्ति काचिद्विवक्षा महाराजस्य हितमन्तरेण।

रावणः – उच्यताम्। तच्छ्रेयो वयमपि श्रोतारः।

वि – सर्वथा राक्षसकुलस्य विनाशोऽभ्यागत इति मन्ये।

रा – केन कारणेन ?

वि – महाराजस्य विप्रतिपत्त्या।

रा – का मे विप्रतिपत्तिः ?

वि – ननु सीतापहरणमेव।

रा – सीतापहरणमेव को दोषः स्यात् ?

वि – अधर्मश्च।

रा – 'च' शब्देन सावशेषमिव ते वचनम्। तद्ब्रूहि।

वि – तदेव ननु।

रा – विभीषण किं गूहसे! मम खलु प्राणैः शापितः स्य यदि सत्यं न ब्रूयाः।

वि – अभयं दातुमर्हति महाराजः।

रा – दत्तमभयम् उच्यताम्।

वि – बलवद्विग्रहश्च।

रा – (सरोषम्) कोऽत्र ? मामनवेक्ष्य सौभ्रात्रं शत्रुपक्षमुपस्थितम्।
नोत्सहे पुरतो द्रष्टुं तस्मादेतं निरस्यताम्॥

वि – प्रसीदतु प्रसीदतु महाराजः। अहमेव यास्यामि।

प्रस्तावना : संस्कृतभाषायाम् अनेकानि नाटकानि लिखितानि आसन्। यथा कालिदासस्य अभिज्ञानशाकुन्तलम्, भवभूतेः उत्तररामचरितं तथैव भासस्य नाटकानि। भासेन आहत्य त्रयोदश नाटकानि विरचितानि। तेषु नाटिकाश्च सन्ति। एकाङ्कं नाटकमेव नाटिका। अद्यतनपाठः अभिषेकनाटकात् संगृहीतः। पाठेऽस्मिन् विभीषणस्य वचनेन क्रुद्धः रावणः तं स्व-समीपात् निष्कासयति स्म। विभीषणः स्वयमेव ततः निर्गच्छति।

विषयोपस्थापनम् : **पाठ्यांशः**

आदर्शवाचनम् : अध्यापकः सम्पूर्णं पाठम् उचितभावभङ्गिमया, कक्षाभिनयेन च आदर्शवाचनं करोति।

अनुवाचनम् : अध्यापकः द्विछात्रान् उत्थाप्य एकेन रावणस्य, अपरेण विभीषणस्य वाक्यानि वाचयति। ततः अन्येन छात्रद्वयेनापि एवम् अनुवाचनम् कारयति।

अध्यापकव्याख्या : समासः – विग्रहवाक्यानि – राक्षसकुलस्य – राक्षसानां कुलम्, तस्य राक्षसकुलस्य, सीतापहरणम् – सीतायाः अपहरणम्, सावशेषं – अवशेषेण सहितम्, शत्रुपक्षम् – शत्रोः पक्षः, तम्।

सन्धिविच्छेदः : तच्छ्रेयः = तत् + श्रेयः, कोऽत्र = कः + अत्र, नोत्सहते = न + उत्सहते, ममानवेक्ष्य = मम + अनवेक्ष्य।

पदोक्तिः : प्रसीदतु - अनुगृह्णातु, विवक्षा - वक्तुमिच्छा, श्रेयः - मङ्गलं, कल्याणं, विप्रतिपत्तिः - विरोधः, अनवेक्ष्य- अनवलोक्य, पुरतः - अग्रे निरस्यताम्- अपसारयताम्।

भावविश्लेषणात्मकप्रश्नाः

१- विभीषणः किं वक्तुमिच्छति ?

२- रावणेन विभीषणं किमकथयत् ?

३- राक्षसस्य कुलनाशः केन कारणेन भवति।

४- रावणस्य विप्रतिपत्तिः का ?

५- "बलवद्विग्रहश्च" इति वचनं शृत्वा रावणः किमर्थं क्रुद्धः ?

६- क्रुद्धेन रावणेन किमुक्तम् ?

७- अनेन संवादेन रावणस्य स्वभावः कीदृशः इति ज्ञायते ?

८- अस्य पाठस्य पठनद्वारा विभीषणविषये भवान् किं ज्ञातवान् ?

कक्ष्याभिनयवाचनम् :

कैश्चित् छात्रैः पात्रोचितं पाठस्य वाचिकाभिनयं कारयति।

❑

सन्दर्भग्रन्थसूची

१. अर्जुनवर्म देव, (१९८३), अमरुकशतकम्, मोतीलाल बनारसीदास, वाराणसी।

२. नारायण राम आचार्यकाव्यतीर्थ, (२००२), सुभाषितरत्नभाण्डागारम्, चौखम्बा संस्कृतप्रतिष्ठान, ३९ यू.ए., बंगलो रोड, जवहगर नगर, दिल्ली।

३. डॉ. प्रभा शङ्कर मिश्र, (१९८४), संस्कृत शिक्षण, हरियाणा साहित्य अकादमी, चण्डीगढ़।

४. डॉ. ब्रह्मानन्द त्रिपाठी, (२००३), अनुवादचन्द्रिका, चौखम्बा सुरभारती प्रकाशन, वाराणसी।

५. डॉ. भोलाशङ्कर व्यास, (१९९१), संस्कृतभाषा, चौखम्बा विद्याभवन, गोपाल मन्दिर लेन, ३९, यू.ए., बंगलो रोड, जवहगर नगर, दिल्ली।

६. पं. मोतीलाल जोशी, डॉ. मञ्जु शर्मा, (२००१), संस्कृतशिक्षण, देवनागर प्रकाशन, जयपुर।

७. डॉ. रघुनाथ सफाया, (१९९७), संस्कृतशिक्षण, हरियाणा साहित्य अकादमी, चण्डीगढ़।

८. डॉ. रमाकान्तत्रिपाठी, (२००१), अनुवादरत्नाकरः, चौखम्बा विद्याभवन, वाराणसी।

९. रामनिवास आर्य एवं राम प्रसाद, (२००२), प्राचीन भारत में विज्ञान और प्रौद्योगिकी, विज्ञान भारती, ए-१०, तुलसी भवन, सायन, मुम्बै-४०००२२

१०. श्री रा. देवनाथः, डॉ. भुवनेश-उपाध्याय, (१९९१-९२), व्याकरणशिक्षणविधयः, भारतीयविद्यासंस्थान, वाराणसी।

११. वासुदेव शास्त्री, (१९९८), क्रियात्मक संस्कृत शिक्षण, राष्ट्रिय संस्कृत संस्थान, ५६-५७, इन्स्टिट्यूशनल् एरिया, जनकपुरी, नवदेहली।

१२. डॉ. विद्याधर शर्मा गुलेरी, (२०००), संस्कृत में विज्ञान, संस्कृतभारती, माता मन्दिर गली, झण्डेवाल, नवदेहली।

१३. डॉ. वि. मुरलीधरशर्मा, (२००३), संस्कृतशिक्षणसमस्याः, राष्ट्रिय संस्कृत विद्यापीठम्, तिरुपतिः।

१४. डॉ. विश्वासः, (२००५), कौशलबोधिनी, संस्कृतभारती, माता मन्दिर गली, झण्डेवाला, नई दिल्ली-११००५५

१५. डॉ. सत्यनारायण आचार्यः, (२००५), संस्कृतशोधप्रविधिः, श्रीमती सौदामिनी त्रिपाठी, सिद्धमहावीरपटना, पुरी।

१६. डॉ. सत्यव्रत सिंह, (१९८२), साहित्यदर्पणः, चौखम्बा विद्याभवन, गोपाल मन्दिर लेन, ३९ यू.ए., बंगलो रोड्, जवहर नगर, दिल्ली।

१७. संस्कृतभारती, (२००१), भारतस्य विज्ञानपरम्परा संस्कृतभारती, माता मन्दिर गली, झण्डेवाल, नवदेहली।

१८. श्री हेच्. देवीरप्पा, (१९५७), नीतिसूत्राणि, प्राच्यपरिशोधन-प्रकाशनसंस्था, मैसूर् विश्वविद्यालयः, मैसूर्।

१९. Apte, D.G. and Dongre, P.K., (1960), Teaching of Sanskrit in Secondary School, Acharya Book Depot, Baroda.

२०. Bhatia, K., Bhatia. B.D., The Principles and Methods of Teaching, Doaba House, 1688, Nai Sadak, Delhi.

२१. Encyclopedia of Educational Research, (1950), A.E.R.A., The Macmillan Co., IVth Edition.

२२. Dr. K.K. Mishra, (1997) Sanskrit Studies in India, Rastriya Sanskrit Sansthan, New Delhi.

२३. Monier Williams, (2002), Sanskrit Manual, Publishing house, Jaipur.

२४. National Council for Teacher Education, (2004), New Delhi.

२५. संस्कृतायोगस्य प्रतिवेदनम्।



डॉ. कम्भम्पाटि साम्बशिवमूर्तिः

सहाचार्यः, शिक्षाविभागः
जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः
जयपुरम् - 302026 (राजस्थान)

पितरौ : वेङ्कटलक्ष्मीः लक्ष्मीनारायणावधानी

जन्मस्थानम् : आगिरिपल्लि, कृष्णा-आन्ध्रप्रदेशः

शैक्षिक योग्यताः : साहित्यविद्याप्रवीणा, एम.ए., (व्याकरण) एम.ए. (तेलुगु), एम.ईडि, डिप्लोमा हिन्दी, विद्यावारिधिः (पीहेच्.डी.)।

प्रकाशितग्रन्थाः :
1. श्री रामस्तुतिरत्नमाला
2. उच्चस्वरनिर्णयः (वैदिकव्याकरणग्रन्थः)
3. गोदावरीपुष्करमाहात्म्यम्
4. शिववर्णमालास्तोत्रम्
5. जनसंख्याशिक्षा
6. सांख्यिकी
7. प्रायोगिकं मनोविज्ञानम्
8. Organising of Residential Schools

विशेषक्षेत्रम् : कृष्णयजुर्वेदस्य तैत्तरीयशाखायाः अध्ययनम् स्मार्त्तप्रक्रियाः

सम्पर्कसूत्रम् : 09928525565